'''तदभावे स्वयं वापि मूर्तिं कृत्वा हरेः क्वचित् परिचर्यां सदा कुर्यात् तद्रूपं तत्र च स्थितं साकारव्यापकत्वात् च मन्त्रस्यापि विधानतः श्रीकृष्णं पूजयेद् भक्त्या यथालब्धोपचारकैः', 'क्वचिद्' देशविशेषे सत्परिपन्थिनाम् अभावयुक्ते 'हरेः मूर्तिं कृत्वा' भजेत्. अयमेव अस्य मार्गस्य प्रकारः उत्तमो

यद् मूर्तौ कृतं सर्वं भगवति कृतं भवति. तत्र मूर्तेः भगवत्त्वं त्रेधा निरूपयति 'तद्रूपम्'इति. वस्तुविचारेण सर्वस्यापि भगवद्रूपत्वाद् विशेषस्तु अयम् 'एनम् उद्धरिष्यामि' इति तदा मृदादेः प्रादुर्भूतः. भक्तिमार्गानुसारेण आह 'तत्र स्थितम्' मूर्तौ स्थितं परं यत्र हस्तः तत्र हस्तः, तत्तदवयवेषु तत्तदवयवाः. तत्र हेतुः साकारव्यापकत्वात् च. व्यापकं साकारं ब्रह्मेत्यतः सर्वे कटकाद्युपचाराः भगवदवयवेष्वेव साक्षात्कृताः भवन्ति. उपासनामार्गेणापि भगवद्भजनं भवतीति आह 'मन्त्रस्यापि विधानतः' न्यासादिपूर्वकं सर्वपूजा. मूर्तौ विशेषम् आह 'श्रीकृष्णम्'इति मूर्त्यन्तरे द्व्यन्तरितम्. 'यथा'वद् मुख्यतया प्राप्तेः उपचाराः कर्तव्याः.''

(त.दी.नि.प्र.२।२२८-२२९).

(घ. ''आत्मनि ब्रह्मरूपे तु... तस्मात् स्थानात् च नश्यति''श्लोकोक्त सेवकके स्वरूपकी इतिज्ञातव्यता)

''एतत् सर्वं प्रयत्नेन गृहस्थस्य प्रकीर्तितम्. अन्येषां सम्भवेत् तु स्याद् यतेः पर्यटनं वरम्. विक्षेपाद् अथवा अशक्त्या प्रतिबन्धादपि क्वचिद् अत्याग्रहप्रवेशे वा परपीडादिसम्भवे तीर्थपर्यटनं श्रेष्ठं सर्वेषां वर्णिनां सदा... गृहं सर्वात्मना त्याज्यं तत् चेत् त्यक्तुं न शक्यते कृष्णार्थं तद् नियुञ्जीत कृष्णः संसारमोचकः, धनं सर्वात्मना त्याज्यं तत् चेत् त्यक्तुं न शक्यते कृष्णार्थे तत् प्रयुञ्जीत कृष्णो अनर्थस्य वारकः. गृहस्थस्य एतद् मुख्यम्. एवं कुर्वन् सकुटुम्बो भगवत्सायुज्यम् अश्नुते. ब्रह्मचारिप्रभृतीनामपि सेवकसाधनसम्पत्तौ एतत् कर्तव्यम्... संन्यासिनस्तु पूर्वापेक्षयापि अग्रिमएव उत्तमः एवम् इति आह 'यतेः पर्यटनं वरम्'... (१.दोष)'विक्षेपाद्'इति स्वतःप्रवृत्तिरहितानि इन्द्रियाणि बलाद् भगवति योज्यमानानि विक्षेपं जनयन्ति विग्रहकर्षितानि. (२.दोष)जरया व्याधिभिः वा यदा 'शक्त्य'भावः. (३.दोष)लोकाः वा 'प्रतिबन्धं' कुर्वन्ति.

> (४.दोष)**स्वस्य वा (गृहादिषु) परम: आग्रह: उत्पद्यते येन तमसि प्रविष्टो भगवन्तं न स्मरति.** (५.दोष)**लोकानां वा 'पीडां' कुर्यात्. तत्र पूजा त्यक्तव्या तदा अन्यत्रापि तथात्वे परदेशे शून्यदेवालये पूजा विधेया. तत्रापि दोषसम्भवे तीर्थपर्यटनं कर्तव्यम्... तदा यत्रैव गत्वा सेवा सम्पत्स्यते तत्रैव सेवा कर्तव्या... गृहं-धनम् इति पूर्वाधिकारद्वयाभावे तृतीयं** (अनुकल्पिकथा)**पक्षम् आह 'अथवा सर्वदा शास्त्रं श्रीमद्भागवतम् आदरात् पठनीयं प्रयत्नेन सर्वहेतुविवर्जितं वृत्त्यर्थं नैव युञ्जीत प्राणै: कण्ठगतैरपि तदभावे यथैव स्यात् तथा निर्वाहम् आचरेत्... बाह्याभ्यन्तरभेदेन रूपे भेदद्वयं मतं नाम्नि चैकं तत: त्रेधा भक्तिमार्गो निरूपित:...** (आनुकल्पिक)**प्रपत्तिमार्गम् आह जगन्नाथे पाण्डुरंगे श्रीरंगे वेंकटे तथा यत्र पूजाप्रवाह: स्यात् तत्र तिष्ठेत तत्पर:..."**
>
> (त.दी.नि.प्र.२।२४६-२५१).

यहां प्रसंगोपात्त श्रीगोपीनाथजी भी "**प्रेम्णोपदेशश्रवणात् प्रपत्ति: प्रेमकारणम्**" (साध.दीपि.१४) ऐसे विधानद्वारा प्रपन्नाधिकारीको वर्णाश्रमधर्माचारोंका भक्तिशास्त्रोंके अनुकूल अनुष्ठानार्थ अन्वाचय दिखला कर नवधा भक्तिके अन्तर्गत सप्तविधा श्रवण कीर्तन स्मरण पादसेवन अर्चन वन्दन तथा दास्य के अनुष्ठानकी अनुज्ञा प्रदान करते हैं. यह निजजनककी तरह ही जगन्नाथ द्वारिका श्रीरंग व्रजमण्डल में जहां पूजाप्रवाहका सातत्य हो वहां बसनेपर भार देते हुवे अन्तमें "**देवात्मसम्पद: पुंस: भक्ति: भवति नैष्ठिकी यया 'सर्वात्मभावा'ख्या परा सिद्धि: स्वयं भवेत्**" (साध.दीपि.१४-४०) इसी तरहका उपदेश भी देते हैं. यों पिता और दोनों आत्मजोंकी उपदेशरीतिमें भागवतोपदिष्ट रीतिसे विशेष कोई अन्तर सिद्ध नहीं होता है.

जैसे कपिलगीतामें भक्तिके तामस-राजसादि भेदोपभेद दरसाये गये

हैं या जैसे भक्तिहंसमें नवधा भक्तिके छह प्रभेद दरसाये गये हैं, वैसे सेवाके बारेमें भी समझने हों तो सर्वप्रथम सिद्धान्तमुक्तावलीमें ही तीन भेद तो कण्ठोक्त मिलते ही हैं : १.आत्मानन्दसमुद्रस्थश्रीकृष्णमार्गस्थ सेवक द्वारा की जाती सेवा उत्तम, २.संसारी सेवकद्वारा की जाती सेवा मध्यम; तथा, ३.कृष्णेतरलौकिकार्थी द्वारा की जाती क्लेशरूपा सेवा आदिम कोटिकी होती है. ४.लाभपूजार्थ की जाती कृष्णसेवा अभक्तिरूप पापाचरणरूपा ही होती है.

महाप्रभुरचित 'सेवाफल' ग्रन्थके सन्दर्भमें इस कृष्णसेवाके उत्तममध्यमादिम प्रभेद समझने हों तो वहां तीन फल अलौकिकसामर्थ्य सायुज्य सेवोपयोगिदेह वैकुण्ठादि लोकोंमें दिखला कर इनके साथ-साथ सेवामें बाधक भी तीन गिनाये गये हैं. भोग उद्वेग और प्रतिबन्ध. इन सेवाबाधकोंमें भोगकी बाधकता निजवित्तके भगवत्सेवामें विनियोग करनेके बावजूद अन्यान्य ममतास्पद विषयोंके भलीभांति समर्पण विनियोग न कर पानेके कारण दुर्घटित हो जाती है. अन्यथा सांसारिक विषयोंका भगवत्समर्पणोत्तर उपभोग तो 'अलौकिक भोग' कहलाता है. इसी तरह सेवामें उद्वेग प्रकट होना अहन्ता या ममता के अतिरेकवश दो कारणोंके कारण सम्भव होता है. इनमें निवेदन समर्पण और विनियोग के स्वरूपोंका भलीभांति ज्ञान न होनेपर जो उद्वेग हो सकते हैं, उनका निवारण तो अपनी अहन्ता-ममताको भगवान्‌की पुष्टिसे सँवार लेनेपर शक्य हो जाता है, निरुद्विग्न भगवत्सेवार्थ. निबन्धोक्त विक्षेपादि पञ्चविध दोष अहन्ता-ममताके सुसमायोजनके अभावमें सेवाबाधक बन जानेकी सीमा तक बढ़ जाती हैं, अन्यथा साधक होनेपर भी. और तब सेवा अपना पुष्टिरूप खो कर मर्यादामार्गीय क्लेशरूपा बन जाती है. वह भी सेव्य श्रीकृष्णको आत्मानन्दसमुद्रस्थतया निहारनेके बजाय धर्मार्थकाममोक्षपूरकतया निहारनेके कारण ही होता है.

(तन्त्रोक्त भक्तिलक्षण और उसके भेदोपभेद)

भागवतसुबोधिनीमें महाप्रभुका एक विधान मिलता है कि

‘‘वैष्णवतन्त्रवचनात् ‘माहात्म्यज्ञानपूर्वकः सुदृढः सर्वतोऽधिकस्नेहो भक्तिः. सुदृढसर्वतोऽधिकस्नेहस्तु आत्मत्वेन ज्ञाते भवति माहात्म्यज्ञानन्तु सृष्ट्यादिभिः’’ (भाग.सुबो. १।१।१). यह भक्तिलक्षण श्रीमन्मध्वाचार्यने ‘महाभारततात्पर्यनिर्णय’ उद्धृत किया है परन्तु आकरस्थल गवेषणीय है. इस लक्षणके अनुसार भक्तिके प्रभेद तत्त्वार्थदीपनिबन्धमें यों दरसाये गये हैं :

> ‘‘[१]एवं सर्वं ततः सर्वं स इति ज्ञानयोगतो यः सेवते हरिं प्रेम्णा श्रवणादिभिः उत्तमः. [२]प्रेमाभावे मध्यमः स्याद् [३]ज्ञानाभावे तथा [४]उभयोरपि अभावेतु पापनाशः ततो भवेत्. एवं सर्वं निश्चित्य सर्वं भगवतएव सएव सर्वम् इति वैदिकगौणमुख्यज्ञानयुक्तः प्रेम्णा श्रवणादिप्रकारेण भजते स भक्तिमार्गे उत्तमः. शास्त्रार्थज्ञानाभावेऽपि प्रेम्णा भजने मध्यमः. प्रेमाभावे मध्यमः इति वा ज्ञानाभावे तथा मध्यमः इति अर्थः; आदिमो वा. उभयोरभावे पापनाशकत्वं धर्मत्वं नतु भक्तिमार्गः इति अर्थः’’.
>
> (त.दी.नि.प्र.१।१०१-१०२).

यहां भी भक्तिका उत्तमाधिकार ‘पुष्टिप्रवाहमर्यादा’ ग्रन्थकी एकवाक्यताके साथ निर्धारित करना हो तो उत्तम पुष्टिपुष्टिरूप ही लिया जाना उचित है ज्ञानसाहचर्यवशात्. स्वतन्त्रा शुद्धपुष्टि, जो भक्तिहंसप्रतिपाद्य है, उसे अभिप्रेत नहीं मानना चाहिये. मध्यमा भक्तिके बारेमें सप्रेम या समाहात्म्यज्ञान नवधा भक्तिका अनुष्ठान मिश्रपुष्टिकी कोटिमें आयेगा जो ‘सेवाफल’ग्रन्थोक्त फलोंका प्रापक न हो कर मर्यादामार्गीय फलप्रद होगा. परन्तु तृतीय उभयरहित नवधाभक्तिका अनुष्ठान, महाप्रभुके अनुसार भी भक्तिमार्गीय न हो कर कर्ममार्गीय सिद्ध हो रहा है.

(शाण्डिल्य-नारद-भक्तिसूत्रोक्त भक्तिलक्षण तथा भेदोपभेद)

शाण्डिल्यभक्तिसूत्रकार भी सर्वप्रथम भक्तिकी परिभाषा इस तरह

देते हैं :

> **“सा परानुरक्तिः ईश्वरे... ज्ञानम् इति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितत्वात्... द्वेषप्रतिपक्षभावाद् ‘रस’शब्दात् च रागः. न क्रिया कृत्यनपेक्षणाद् ज्ञानवद्... भक्तिः प्रमेया श्रुतिभ्यः पुराणेतिहासाभ्यां च.”**
>
> (शां.भ.सू.१-१९).

यहां भक्तिको रागात्मिका दरसाते हुवे उसे ज्ञानकर्मसे पृथक् स्वीकारा गया है. यद्यपि भक्तिके महात्म्यज्ञानपूर्वक सुदृढसर्वतोऽधिकस्नेहरूप होनेका उल्लेख कण्ठतः नहीं मिलता है फिरभी ‘ईश्वर’पदसे अभिधेयत्वेन निर्देशके कारण भक्तिके प्रमुख आलम्बनविभावका माहात्म्यज्ञानविषय होना ध्वनित होता है. ऐसे माहात्म्यज्ञानविषयीभूत ईश्वरमें भक्ति ‘परानुरक्ति’रूपा होती है, ऐसे निरूपणके कारण सुदृढ़सर्वतोऽधिकस्नेहको भी अभिप्रेत माना जा सकता है. जहां तक श्रुतिप्रमाणित माननेका प्रश्न है तो ‘श्रुति’पद अनिवार्यतया वेद-वेदान्तके वचनके अभिप्रायवश लेनेपर वेदके पूर्वकाण्डगत विधि मन्त्र नामधेय निषेध अर्थवाद रूपी वचनोंके अन्तर्गत तो ‘यजेद्’-‘जुहुयात्’सदृश क्रियापदघटित विधिवचनोंमें तो क्रियारूप होनेके अस्वीकारवश भक्ति प्रमेय बन नहीं पायेगी. और विहित कर्मानुष्ठानमें प्रयोगसमवेत अर्थोंके स्मारक मन्त्रवचनोंमें तो परमेश्वरके विभूतिरूप कर्मांगभूत देवता ही विवक्षित होते हैं. अन्यथा प्रयोगासमवेत अर्थोंके स्मारक होनेकी आपत्ति खड़ी होगी. अतः शब्दोंकी असंकुचित महावृत्तिसे अर्थात् महातात्पर्यवृत्तिसे परमेश्वरको अभिप्रेत माननेपर भी प्रयोगसमवेतार्थके रूपमें केवल अभिधावृत्तिसे तो वाच्य माना नहीं जा सकता. अतः भक्तिके श्रुतिप्रमेय होनेका अभिप्राय अभिधावृत्तिको छोड़े बिना तात्पर्यवृत्त्या ही लेना उचित होगा. ‘भक्ति’रूप नामधेयवचनसे, भगवद्विभूतिरूप देवताओंके बारेमें भक्तिसाहचर्यकी कथा तो हमने देख ही ली है. सर्वाधिक महत्त्वपूर्ण यहां **“भजनीयेन अद्वितीयम् इदं, कृत्स्नस्य तत्स्वरूपत्वात्”**

(शा.भ.सू.८७) इस सूत्रकी श्रौत पृष्ठभूमि **“सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वा अभिवदन् यद् आस्ते”** (तैत्ति.आर.३।१२।२) श्रुत्युक्त ही है. ऐसे वचनोंके फलितार्थका विचार करनेपर भक्ति भी उस सर्वनामा सर्वकर्मा सर्वरूप परमात्माका ही अन्यतम नाम-रूप-कर्म होनेके सूत्ररूपमें श्रुतिप्रमेय सिद्ध होती है. सो वह तो गौणी भक्ति कहलायेगी. अन्य निषेध और अर्थवाद-वचनोंके तो प्रमेयतया भक्तिको निहारना अप्रासंगिक होगा. हां, भगवदवतारचरित्रोंके इतिहास और पुराणों के वचनोंसे प्रमेयात्मना भक्तिका विवक्षित होना तो निर्विवाद सिद्ध है ही.

भक्तिके मुख्या-गौणी प्रभेद शाण्डिल्यभक्तिसूत्रकारने भी सूचित किये हैं **“देवभक्तिः इतरस्मिन् साहचर्यात्. गौण्या तु समाधिसिद्धिः. हेया रागत्वाद् इति चेन्न उत्तमास्पदत्वात् संगवद्. तदेव कर्मिज्ञानयोगिभ्यः आधिक्यशब्दात्. भक्त्या भजनोपसंहाराद् गौण्या परायै तद्हेतुत्वाद्. रागार्थं प्रकीर्तिसाहचर्याच्च इतरेषाम्. अन्तराले तु शेषाः स्युः उपास्त्यादौ च काण्डत्वाद्”** (शां.भ.सू.१७-२४, ५६-५८). भगवद्गीतामें जैसे कहा गया है कि अन्यान्य देवताओंकी भक्ति करनेवाले भी अन्ततः तो नदीसागरन्यायेन भगवान्की ही भक्ति करते हैं परन्तु वह परमेश्वरभजनकी निष्काम भक्ति करनेकी विधिसे नहीं. अतः उनकी ‘भक्ति’पदसे अभिधेय मुख्या भक्ति न हो कर वह ‘गौणी भक्ति’ कहलाती है. मुख्या उत्तमा भक्ति तो परमेश्वरमें अनुरागरूपा होती है जो कर्म ज्ञान योग आदिसे अधिक श्रेष्ठ होती है. गौणी भक्तिको परा भक्तिके अंगतया उपादेय माना जा सकता है. अस्तु.

नारदभक्तिसूत्र तो महाप्रभु श्रीवल्लभाचार्योपदिष्ट भक्तिके सिद्धान्तोंका देवर्षि नारदके नाम्ना विरचित ग्रन्थ है या नारदभक्तिसूत्रोंके अनुसन्धानमें महाप्रभुने षोडशग्रन्थ आदि कृतिओंमें पुष्टिभक्तिका स्वरूप प्रतिपादित किया यह निश्चय नहीं हो पाता! इस ग्रन्थमें परमप्रेमरूपा भक्तिके

विविध लक्षणोंके उल्लेखपूर्वक स्वाभिमत लक्षण यों दिया गया है “**‘पूजादिषु अनुरागः पाराशर्यः, कथादिषु इति गर्गः, आत्मरत्यविरोधेन इति शाण्डिल्यः. नारदस्तु तदर्पिताखिलाचारिता तद्विस्मरणे परमव्याकुलतेति यथा व्रजगोपिकानाम्**’’ (ना.भ.सू.१६-२१) तुलनीय हो जाता है “**‘सेवा हि सेवकधर्मः... साच फलरूपा साधनरूपा च आस्ते. तत्र मानसी सा परा फलरूपा इति अर्थः. यथा व्रजसीमन्तनीनाम्**’’, “**‘कृष्णवियोगजनिततापक्लेशानन्दतिरोभावोऽहं भगवते... दारागारादि... आत्मना सह समर्पयामि**’’, “**‘निवेदिभिः समर्प्यैव सर्वं कुर्यादिति स्थितिः... तस्माद् आदौ सर्वकार्ये सर्ववस्तुसमर्पणम्**’’, “**‘यच्च दुःखं यशोदायाः नन्दादीनां च गोकुले गोपिकानान्तु यद् दुःखं तद् दुःखं स्याद् मम क्वचित्**’’ (सिद्धा.मु.प्र.१. गद्यमन्त्र, सिद्धा.रह.५-६, निरो.लक्ष.१).

एतदर्थ तुलनात्मक दृष्टिसे अवलोकनार्थ कतिपय सूत्रोंका संकलन उदाहरणीय है :

> “[1]**निरोधस्तु लोकवेदव्यापारन्यासः, तस्मिन् अनन्यता तद्विरोधिषु उदासीनता, [2]अन्याश्रयाणां त्यागो अनन्यता, [3]सातु कर्मज्ञानयोगेभ्योऽपि अधिकतरा, फलरूपत्वात्, [4]अव्यावृत्तभजनात्. [5]मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद् वा, [6]लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदत्वात्, गौणि त्रिधा गुणभेदाद् आर्तादिभेदाद् वा, [7]सर्वदा सर्वभावेन [8]निश्चिन्तितैः भगवानेव भजनीयः [9]स कीर्त्यमानः शीघ्रमेव आविर्भवति अनुभावयति च भक्तान्. [10]गुणमाहात्म्यासक्ति-स्मरणासक्ति-रूपासक्ति-पूजासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्तिः-आत्मनिवेदनासक्ति-[11]तन्मयतासक्ति-परमविरहासक्तिरूपा एकधापि एकादशधा भवति.**”
>
> (नार.भ.सू.८-१०, २५-२६, ३८, ५६, ७९, ८२).

तत्त्वार्थदीपनिबन्ध षोडषग्रन्थ सुबोधिनी ग्रन्थोंमें पुष्टिभक्तिका विवेचन करते हुवे महाप्रभु भी —

[१] **“देहिकान् सकलान् भावान् निजां क्रीडां दैहिकीं परित्यज्य हरिप्राप्त्यै यदेव स्यात् तदेव हि वैदिकं लौकिकं चापि”**

[२]**“अन्यस्य भजनं तत्र स्वतो गमनमेव च प्रार्थना कार्यमात्रेऽपि ततो अन्यत्र वर्जयेत्”.**

[३]**“यतो भक्तिव्यतिरेकेण ज्ञानं कर्म वा न फलसाधकम् अतः आवश्यकत्वात् च मुख्यत्वाद् भक्तिरेव उपदेष्टव्या”.**

[४]**“बीजदार्ढ्यप्रकारस्तु गृहेस्थित्वा स्वधर्मतो अव्यावृत्तो भजेत् कृष्णं पूजया श्रवणादिभिः”.**

[५]**“महतां कृपया यावद् भगवान् दययिष्यति तावद् आनन्दसन्दोहः कीर्त्यमानः फलाय हि”.**

[६]**“क्लिष्टोऽपि चेद् भजेत् कृष्णं लोको नश्यति सर्वथा”,“लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति पुष्टिमार्गस्थितो यस्मात्”.**

[७]**“सर्वदा सर्वभावेन भजनीयो व्रजाधिपः स्वस्य अयमेव धर्मो हि नान्यः क्वापि कदाचन”.**

[८]**“चिन्ता कापि न कार्या निवेदितात्मभिः कदापीति”.**

[९]**“महतां कृपया यद्वत् कीर्तनं सुखदं सदा... गुणगाने सुखावाप्तिः गोविन्दस्य प्रजायते... क्लिश्यमानान् जनान् दृष्ट्वा कृपायुक्तो यदा भवेत् तदा सर्वं सदानन्दं हृदिस्थं निर्गतं बहिः... हृद्गतःस्वगुणान् श्रुत्वा पूर्णः प्लावयते जनान्”.**

[१०]**नवधाभक्तिः + संयोग-विप्रयोगानुभूती.**

[११]**“अन्तर्निष्ठा वा विरहो वा द्वयमेव नतु तासाम् अन्या लौकिकी अवस्था”.**

(त.दी.नि.३।१०।७१-७२, वि.धै.आ.१४. भाग.सुबो.१।५।१३. भ.व.२. निरो.लक्ष.४. सिद्धा.मुक्ता.१७, नवर.६. चतुश्लो.१. नवर.१ निरो.लक्ष.५-८.

भाग.सुबो. १०।४४।५८).

सर्वभावेन की जाती भगवत्सेवामें वात्सल्यभाव सख्यभाव दास्यभाव माधुर्यभाव योजित होते हैं. कतिपय सेवा दास्यभावसे तो अन्य वात्सल्यभावसे. गुणासक्ति पूजासक्ति और आत्मनिवेदनासक्ति का भी विनियोग मंगलासे शयनपर्यन्त की जाती सेवामें सर्वथा योजित होता ही है. इस तरह देखा जा सकता है कि नारदभक्तिसूत्र और महाप्रभु के बीच कितनी घनिष्ठ परस्परानुरूपता है!

इन शाण्डिल्यभक्तिसूत्र और नारदभक्तिसूत्र के अलावा अन्य भी स्वामिहरिहरानन्दारण्यकृत परमभक्तिसूत्राणि और अज्ञातकर्तृक भक्तिमीमांसासूत्र भी आचार्य बलदेव उपाध्यायने प्रकाशित करवाये हैं, साथ ही साथ पद्मपुराण(४।८५।४-२४, ५।१५।१६४-१९आन.आश्र.) और स्कन्दपुराण (प्रभास.१०७।२-१६) से भी भक्तिलक्षण और भक्तिके भेदोपभेद संकलित-प्रकाशित करवाये हैं. उनके साथ तुलनात्मक विमर्श यहां अनभिप्रेत होनेसे आलेखविस्तार शक्य नहीं है. फिरभी संक्षेपमें अन्यान्य वेदान्तसम्प्रदायाभिमत विविध भक्तिलक्षणोंको उद्धृत कर प्रस्तुत आलेखका उपसंहार करेंगे :

> [१]**"भगवद्भजनपरेषु अर्थार्थ्यार्तजिज्ञासुज्ञानिषु अन्तिमस्य ज्ञानलक्षणरूपत्वम्", "अपिच एनम् आत्मानं निरस्तसमस्तप्रपञ्चम् अव्यक्तं संराधनकाले पश्यन्ति योगिन:. संराधनञ्च भक्तिध्यानप्रणिधानाद्यनुष्ठानम्... ननु संराध्य-संराधकभावाभ्युपगमात् परेतरात्मनो: अन्यत्वं स्याद्... कर्मसु उपाधिभूतेषु सविशेषाइव अवभासन्ते नच स्वाभाविकीम् अविशेषात्मतां जहति. एवम् उपाधिनिमित्तएव अयम् आत्मभेद: स्वतस्तु ऐकात्म्यमेव".**
>
> [२]**"कस्मात् पुन: तद् न गृह्यते? यत: तद् अव्यक्तं**

दुर्विज्ञेयम् अतिसूक्ष्मम्... अव्यक्तं चेद् अनवगतमेव स्याद् न इति उच्यते... संराधनकाले पश्यन्ति. ‘संराधनं’=भक्तिः ध्यानादिना परिचर्या”, “आदित्यं रुद्रम् अन्यां वा देवतां ये युञ्जते तेषां योगिनामपि सर्वेषां मद्गतेन अन्तरात्मना मां गतेन मदासक्तचेतसा श्रद्धावान्=आस्तिक्यबुद्धिः भजते यो मां स मे युक्ततमो मतः”.

[३]“अत्यर्थप्रियानुध्यानरूपसम्यक्प्रीणने सति ब्रह्मस्वरूपं गृह्यते” (भक्तिः)”,“श्रीमति पुण्डरीकनयने स्वस्वामिनि अत्यर्थप्रियानुभवरूपा परा भक्तिः”

[४]“फलं किञ्चिदपि अनभिलष्यन् ‘किम् एतद् अलीकम् अनुतिष्ठसि ?’ इति पर्यनुयुज्यमानोऽपि निरन्तरभगवद्भक्तिवेधविद्रुतान्तःकरणतया वेपमानतनुः विस्फारितनयनयुगलपरिवर्तमानसलिलसम्पातः तूष्णीम्भावेनैव उत्तरं प्रयच्छति. सएव अव्यभिचारिण्या भगवतो महेश्वरस्य अग्रशक्त्या भक्त्या पवीत्रीकृतो न अन्यः”.

[५]“भक्त्यर्थानि अखिलान्येव भक्तिः मोक्षाय केवला, मुक्तानामपि भक्तिर्हि नित्यानन्दस्वरूपिणी. ज्ञानपूर्वः परः स्नेहो नित्यो भक्तिः इति ईर्यते”,“प्रीतिश्च गुणोत्कर्षज्ञानादेव विशेषतो दृष्टा, न अभेदज्ञानात्. अभेदज्ञानाद् अप्रीतिरेव उत्तमानां भवति. घातयन्ति हि राजानो ‘राजाहम्’ इति वदन्तं ददति च सर्वम् अभिप्रेतं गुणोत्कर्षं वदतः. न तादृशी प्रीतिः ईड्यस्य विष्णोः गुणोत्कर्षज्ञातरि यादृशी स्यात्. तत्प्रीणनाद् मोक्षम् आप्नोति”.

[६]“सर्वेशे भगवति तद्धर्माद् द्रुतस्य मनसो धारावाहिकवृत्तिः भक्तिः”.

[७]“अन्याभिलाषशून्यत्वे सति ज्ञानकर्माद्यनावृतत्वे सति आनुकूल्येन श्रीकृष्णानुशीलनं भक्तिः”.

[८]“आराध्यत्वप्रकारकं ज्ञानं भक्तिः”.

(१.गी.शां.भा.१८।५४, ब्र.सू.शां.भा.३।२।२४-२५, २.ब्र.सू.भास्क.-भा.३।२।२३-२४, गीताभा.६।४८. ३.ब्र.सू.रा.वेदा.सा.गी.रा.भा.१८।५४. ४.गी.अर्थसं.१४।२६. ५.महाभा.ता.निर्ण.१।१०६-१०७, विष्णु.त.विनि. ६.भक्तिरसा.१।३. ७.भक्ति.रस.सि.१।१।११. ८.किर.प्र.मंग.).

भक्तिमार्गमें जैसे भगवान्‌के वपुका भक्तिभावात्मक होना निरतिशय महत्त्वपूर्ण आवश्यकता है. वैसे ही भक्तिका भगवदात्मिका होना भी उतनी ही महत्त्वपूर्ण कथा है. इन सभी आचार्योंको अभिमत भक्तिके विलक्षण लक्षणोंपर लक्ष्यपात करनेपर परमात्माकी ऐकान्तिकी आत्मरतिके बहुभवनकी अद्भुत लीला ही ये लगती हैं! :

भक्तभावविभाविताकृतिरूपतासु विभिन्नता
स्वांशजीवकृते हि मार्गे वरणभेदकृता मता।
वरणहेतुकभक्तिलक्षणचिन्तनेषु विलक्षणा
चैत्यवपुषि च लीलया ते स्वात्मरत्याविष्कृता॥

उपसंहारमें श्रीमद्‌विठ्ठलनाथ प्रभुचरणविरचित प्रस्तुत भक्तिहंसके उपक्रमोपसंहारके श्लोकोंमें तथा मध्यमें भी अभ्यासपूर्वक ग्रन्थकर्ताके प्रतिपाद्यविषयका सूचन तथा निष्कर्ष प्रकट करते जो—

“मन्त्रोपासन-वैदिकतान्त्रिकदीक्षार्चनादिविधिभिः यः अस्पृष्टो रमते”,

“उपास्तिं मन्यन्ते मधुमथनभक्तिं निजकृतार्थतां तत्र उपास्यं परमपुरुषं चापि सुविदः द्वयोः सारूप्यात् तद्भ्रमहतिकृते”,

“मन्त्रोपासनायाअपि भगवद्धर्मत्वं स्यात्... नहि कर्मांगत्वेन क्रियमाणस्य भगवत्स्मरणस्य भक्तिरूपत्वं वक्तुं शक्यं कर्ममार्गीयत्वात्. अपरञ्च वरांगनावशीकरणादिकं फलत्वेन श्रूयते नहि पुरुषोत्तमभक्तेः तत् फलीभवितुम् अर्हति”.

ये विधान किये हैं वे अपने अग्रज श्रीमद्गोपीनाथ प्रभुचरणके **''यस्य अयम् अनुगृह्णाति भगवान् आत्मभावित: स जहाति मतिं लोके वेदे च परिनिष्ठिताम्. अनुग्रहे नियोज्यो अत:... अत: तदनुरोधेन रतिरासो यथा भवेत् तदर्थं वरणं कार्यं श्रीगोपालमहामनो:... स्मृत्वा स्वीयवियोगाग्निं तापदाहो भवाम्बुधौ तत: सर्वं समर्प्यैव श्रीगोपालमनुं श्रयेत्''** (साध.दीपि.५४-५८) के विधानको लक्ष्यमें रख कर प्रकट किये हैं. अर्थात् ऐसी धारणाको अमान्य घोषित करनेको ही किये हुवे ये विधान हैं. ऐसी अविमृष्ट धारणा कयी लोगोंकी कर्णोपकर्ण सुनी जाती है. क्योंकि भक्तिहंसग्रन्थमें ग्रन्थकार पुरुषोत्तमको वैदिक-तान्त्रिक मन्त्रोपासनाओंमें मन्त्रप्रतिपाद्यतया या मन्त्राधिष्ठातृतया मन्त्राधीन होना पुरुषोत्तमके बारेमें अस्वीकार करते हैं. इसी तरह वैदिक-तान्त्रिक विधिओंसे विहित कर्मानुष्ठानसे भी कर्मजन्यतया कर्मोद्देश्यतया अथवा कर्मप्राप्य फलतया कर्मानुष्ठानके आधीन माना नहीं जा सकता. अन्यथा श्रुति-गीतादिके **''नायम् आत्मा प्रवचनेन लभ्यो न मेधया... यमेव एष वृणुते तेन लभ्य:''.''नाहं वेदै: न तपसा न दानेन नच इज्यया शक्य एवंविधो द्रष्टुम्''** (कठोप.१।२।२३, भग.गीता ११।५३) ऐसे वचनोंमें प्रतिपादित निरंकुश भागवत्स्वातन्त्र्यका अपलाप हो जायेगा. इस विषयमें प्रमुख अनुपपत्ति यही है कि मन्त्रोपासना और विहित कर्मानुष्ठान का सकाम होनेके कारण कामपूर्तिपर्यवसायी होते हैं नकि पुरुषोत्तमपर्यवसायी, यह मानी गयी है.

इस उपर्युक्त युक्तिवादको अपने अग्रजके साथ मतभेद जतानेके लिये प्रकट किया मान कर चलें तो क्या 'पुरुषोत्तमसहस्रनामस्तोत्र'रूप भागवतसहस्रनामके कर्ता स्वयंके जनकपिता महाप्रभु श्रीवल्लभाचार्यके साथ भी तदात्मज प्रभुचरणका मतभेद मान लेना? क्योंकि सुस्पष्ट शब्दोंमें कहा गया है **''श्रवणादिनवकमपि अधिकारिभेदेन क्रियमाणं सत् कर्मज्ञानोपासनाभक्तिमार्गीयत्वेन अनेकविधं भवति. तथाहि भागवतसहस्रनामादिश्रवणकीर्तनयो: फलत्वेन हि चत्वारो(** विनियोगो समस्तेषु पुरुषार्थेषु वै मत: पु.स.ना.६**)ऽपि**

अर्थाः उच्यन्ते'' (भक्तिहंस). यदि पुरुषोत्तमनामसहस्रस्तोत्रके उपसंहारमें **''किं बहूक्तेन भगवान् नामभिः स्तुतषड्गुणः आत्मभावं नयति आशु भक्तिं च कुरुते दृढां यः कृष्णभक्तिमिह वाञ्छति साधनौघैः नामानि भासुरयशांसि जपेत् स नित्यः''** (पु.स.ना.२५३-२५५) फलश्रुतिके कारण पुरुषोत्तमसहस्रनाम विभूतिपरक न हो कर पुरुषोत्तमपरक ही ठहरता हो तो साधनदीपिकाकार अग्रजके भी **''स जहाति मतिं लोके वेदे च परिनिष्ठिताम्. अनुग्रहे नियोज्यो अतः... अतः तदनुरोधेन रतिरासो यथा भवेत् तदर्थं वरणं कार्यं श्रीगोपालमहामनोः... स्मृत्वा स्वीयवियोगाग्निं तापदाहो भवाम्बुधौ ततः सर्वं समर्प्यैव श्रीगोपालमनुं श्रयेत्''** ये वचन सर्वविध सन्देहोंसे परे मानने चाहिये. अन्यथा **''गिरित्रमोक्षं कथयेत् शृणोति वा विमुच्यते संसृतिभिः तथा अरिभिः''** (भाग.पुरा.१०।८८।४७) वचनमें पुरुषोत्तम श्रीकृष्णके चरित्रका भी अरिदमनार्थ विनियोग उपदिष्ट होनेसे पुरुषोत्तम श्रीकृष्णको भी विभूतिरूप मानना पड़ेगा. समग्र श्रीमद्भागवतपुराणके पाठकी फलश्रुति भी **''विप्रो अधीत्य आप्नुयात् प्रज्ञां राजन्य उदधिमेखलां वैश्यो निधिपतित्वं शूद्रः शुद्ध्येत पातकात्''** (भाग.पुरा.१२।१२।६४) इस वचनमें भक्तीतर प्रयोजनके पूर्त्यर्थ पठनीय कही गयी होनेसे गोपालमन्त्रकी तरह श्रीमद्भागवत महापुराण भी दशविधलीलायुत परमानन्द पुरुषोत्तम श्रीकृष्णका प्रतिपादक माननेके बजाय विभूतिलीलाके गानरूप मानना पड़ेगा.

अतः वैदिक-तान्त्रिक सभी मन्त्रोंका मन्त्रदीक्षोद्दिष्ट या मन्त्रप्रतिपाद्य अर्थका पुरुषोत्तम होना या न होना अर्थात् विभूति होना केवल मन्त्रनिर्भर न हो कर मन्त्रानुष्ठानी अधिकारीपर ही बाहुल्येन निर्भर होता है. इसी तरह वैदिक-तान्त्रिक विधिविहित कर्मोंके अनुष्ठानका उद्देश्य या फल भी केवल कर्मपर निर्भर न हो कर अधिकारीपर बाहुल्येन निर्भर होता है. अतएव **''उत्पन्नः तल्लक्षणार्थोपलब्धेः लोकवत्''** (ब्र.सू.३।३।३०) सूत्रके भाष्यमें स्वयं प्रभुचरणने ही इसी गोपालमन्त्रको विभूतिप्रतिपादक माननेके बजाय परब्रह्म पुरुषोत्तमका प्रतिपादक माना है.

ब्रह्मसूत्रभाष्य विद्वन्मण्डन तथा सिद्धान्तमुक्तावलीके प्रकाशमें भी ऋग्वेदके कई मन्त्रोंके पुरुषोत्तम तथा उनकी पुष्टिलीला के परक व्याख्या की गयी होनेके कारण भी वैदिक मन्त्रसे अस्पृष्ट रमण ऐकान्तिकतया नहीं हो सकता. कथञ्चिद् अस्पृष्ट तो कथञ्चित् प्रतिपाद्यतया जपहोमादि कर्मसमवेतार्थतया स्पृष्ट भी हो ही सकता है, चाहे मन्त्रविध्यधीनतया कर्मसमवेतमन्त्रार्थतया कर्मनियतिवश प्राप्य हो या न भी हो. यह स्वयं प्रभुचरणकृत वैदिक मन्त्र और विधि की बीजभूत गायत्रीमन्त्रकी व्याख्यासे स्पष्टतया सिद्ध होता है “**श्रीकृष्णः स्वात्मनः सर्वम् उत्पाद्य विविधं जगत्, तदासक्तांशबोधाय शब्दब्रह्म अभवत् स्वयम्. तत्र सर्गादिभिः क्रीडन् नित्यानन्दरसात्मकः निजभावप्रकाशाय गायत्रीरूप उद्बभौ, सा षड्गुणयुतं सर्ववेदबीजं गुणातिगं, सर्वावतारूपं हि सर्वतत्त्वोपबृंहितम्**” (गायत्रीव्या.१-३). थोड़ेसे बौद्धिक धैर्य धरके विचारणीय है कि यह वैदिक मन्त्र प्रभुचरणके हिसाबसे विभूतिपरक कैसे हो सकता है? वैदिक-तान्त्रिक मन्त्र तथा विधि से पुरुषोत्तमके सर्वथा अस्पृष्ट रमणकी उक्तिका अभिप्राय, अतः, अधिकारिभेदावलम्बित ही लेना सिद्धान्तदृष्ट्या उपपन्न कथा है. अन्यथा भक्तिहेतुनिर्णय और भक्तिहंस दोनों ही ग्रन्थ “**मूरख हेतु कुशब्द वितण्ड्यो**” (वल्लभाख्या.५।२) न्यायेन विसम्प्रदायी जनोंद्वारा दिये जाते मुरारीदासोंके त्रासनिवारणार्थ ही केवल लिखा गया मानना पड़ेगा. अस्तु.

एतावता पिता और दोनों पुत्रोंके मतोंमें परस्पर विमतिकी कथा कथमपि उपपन्न हो नहीं सकती.

तृणानि विषयाः बाह्यास्तद्गावस्त्विन्द्रियाण्यपि॥
नन्दनन्दन गोपाल! हृन्मे वृन्दावनं कुरु॥१॥
अज्ञे ज्ञानाय शास्त्रज्ञे दम्भदर्पनिवृत्तये॥
ब्रह्मज्ञे मुक्तयेऽन्यत्र भक्त्यर्थं भक्तिरीरिता॥२॥
भक्तिर्भक्तिव विज्ञेया भक्त्यर्थं न कृता यदा॥

सृष्टिर्विभावलीलेयं भक्तेस्तदनुभावता ॥३॥
स्रष्टुश्चान्तर्बहिष्ठत्वात् प्रियरूपबहिष्ठता ॥
जीवान्तस्स्थस्नेहरूप-स्रष्टुर्भक्तिस्वरूपता ॥४॥
नाधिकारो ज्ञानमार्गे ब्रह्माऽस्मीति न रोचते ॥
पित्राप्ताः निधयो गेहे तेनाहं भगवान् सदा ॥५॥
श्रीमद्विट्ठलनाथो मादृशान् भक्तिज्ञानरहितान् वै ॥
भक्तिज्ञानं दत्त्वा वृन्दावर्त्म निर्दिशति यः ॥६॥

पौषशुक्ला प्रतिपदा
वि.सं.२०७८

गोस्वामी श्याम मनोहर
पार्ले-मुंबई

* * *

विषयानुक्रमणिका

ग्रन्थक्रम पृष्ठक्रम

१.भक्तिहेतुनिर्णयः १-२०
  मंगलाचरणम् १-७
  पूर्वोत्तरपक्षौ ७-१९
  उपसंहारश्लोकाः १९-२०
२.भक्तिहंसः २१-९१
  मंगलाचरणम् २१-२४
  पूर्वोत्तरपक्षौ २५-८८
  उपसंहारश्लोकाः ८९-९१
३.षड्विंशतिपत्राणि ९२-१२४
४.परिशिष्टम् १२५-१८९
  क.प्रभुचरणकृतरामनवमीउत्सवनिर्णय-
    -गोस्वामिश्रीपुरुषोत्तमचरणकृत-
    -भट्टश्रीबलभद्रशर्मकृतव्याख्योपेतः १२५-१५८
  ख.सुश्री मैत्री गोस्वामी संकलित
    प्रवचन सारांश १५९-१८९
५.अमृतवचनावली २०४-२३६
६.उद्धृतवचनानुक्रमणिका २३७-२४६

* * *

।। श्रीकृष्णाय नमः ।।

।। श्रीविट्ठलेश्वरप्रभुचरणविरचितः ।।

।। भक्तिहेतुनिर्णयः ।।

ब्रह्मादिदुर्लभकथं राधामानापनोदकं कृष्णम् ।।
तदनुग्रहैकलभ्यां भक्तिञ्च नुमस्तदीयाँश्च ।। १ ।।

ननु इदम् अनेकप्रमाणविसंवादीव भाति, यद् अनुग्रहेतरसाधनासाध्यत्वं भक्तौ. तथाहि एकादशस्कन्धे एकोनविंशे ''श्रद्धा अमृतकथायां मे''(भाग.पुरा.११।१९।२३) इत्युपक्रम्य ''इष्टं दत्तं हुतं जप्तं मदर्थं यद् व्रतं तपः, एवं धर्मैः मनुष्याणाम् उद्धव! आत्मनिवेदिनाम्. मयि संजायते

।। श्रीकृष्णाय नमः ।।

।। श्रीरघुनाथचरणविरचिता ।।

।। भक्तिहेतुविवृतिः ।।

नमो भक्तिरसास्वाददात्रे वल्लभसूनवे ।
कलिकल्मषघातिन्यै तद्वाण्यै च नमः सदा ।।

भक्तेः असाधारणकारणं निश्चिकीर्षवो नुतिरूपं मंगलम् आचरन्ति ब्रह्मादि...इति. उत्तमाधिकारिणामपि ब्रह्मादीनां श्रोतुं दुर्लभा कथा यस्य. राधायाः मानं चित्तसमुन्नतिम् अपनुदति इति तथा. तं **कृष्णं नुमः** स्तुमः इति अर्थः. किञ्च तस्यैव कृष्णस्यैव अनुग्रहेणैव एकेन लभ्यां प्राप्याम्. इदमेव अग्रे विवादकारणसंशयबीजवाक्यं ज्ञेयम्. **भक्तिञ्च नुमः**तदीयांश्च तस्यैव अनन्यभक्तान् इति अर्थः.

अनुग्रहेतरयागादिसाधनानामेव भक्तिहेतुत्वमिति वादी शंकते- ननु इति. **अनुग्रहैकलभ्यां भक्तिम्** इति यद् वचनम् उक्तं तत् **''श्रद्धा अमृतकथायां मे''** (भाग.पुरा.११।१९।२३) इत्यादिवक्ष्यमाणैः **अनेकैः** बहुभिः **प्रमाणैः** शब्दरूपैः सह **विसंवादीव** विरुद्धार्थकमिव **भाति** इति. **'इव'** शब्देन तत्त्वापरिचयः सूचितः.

भक्तिः को अन्यो अर्थो अस्य अवशिष्यते'' (भाग.पुरा.११।१९।२४) इत्यत्र भगवद्धर्माणां यागदानादेश्च भक्तिहेतुत्वं श्रूयते. तत्रैव पूजाप्रकारम् उक्त्वा ''भक्तियोगं सः लभते एवं यः पूजयेत माम्'' (भाग.पुरा.११।२७।५३) इति भगवता उक्तम्. दशमस्कन्धे सप्तचत्वारिंशे च ''दान-व्रत-तपो-होम-जप-स्वाध्यायसंयमैः, श्रेयोभिः विविधैश्च अन्यैः कृष्णे भक्तिर्हि साध्यते'' (भाग.पुरा.१०।४७।२४) इति उद्धववाक्ये दानादेः तथात्वम् उच्यते. ''जन्मान्तरसहस्रेषु तपो-ध्यान-समाधिभिः, नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते''(द्र.सुबो.१०।८।१९) इत्यत्र पापाभावस्यापि तथात्वम् उच्यते. एकादशएव ''यथा अनुष्ठीयमानेन त्वयि भक्तिः नृणां भवेत्, स्वधर्मेण अरविन्दाक्ष! तद् मम आख्यातुम् अर्हसि'' (भाग.पुरा.११।१७।२) इति प्रश्ने, वर्णाश्रमधर्मान् निरूप्य, ''इति मां यः स्वधर्मेण भजेद् नित्यम् अनन्यभाक्, सर्वभूतेषु मद्भावो मद्भक्तिं लभते अचिराद्'' (भाग.पुरा.११।१८।४४) इति उपसंहारात् पूर्वोक्तधर्माणां भक्तिहेतुत्वं निश्चीयते.

नच भक्त्युत्पत्तौ स्वरूपयोग्यतासम्पादकत्वेन धर्मेषु तद्धेतुत्वम् उपचर्यते इति वाच्यं, जीवत्वेनैव तत्र स्वरूपयोग्यत्वात् सर्वेषाम्, ''देवो असुरो मनुष्यो वा'' (भाग.पुरा.७।७।५०) इति वाक्याद्, आगन्तुकधर्माणां क्वचिदपि तत्सम्पादकत्वादर्शनाच्च. धर्मवतामपि

ननु घटादिकार्ये यथा दण्डत्वमेव कारणतावच्छेदकं, न दृढत्वम्, तस्य स्वरूपयोग्यतासम्पादकत्वाद्, एवम् अत्रापि भक्त्युत्पत्तिं प्रति अनुग्रहस्यैव कारणत्वं, नतु धर्मादीनामपि. तेषां स्वरूपयोग्यतासम्पादकत्वेन अन्यथासिद्धत्वाद् औपचारिकं कारणत्वमिति चेत् तत्र आह **नच** इति. **जीवत्वेनैव** इति. जीवत्वमेव स्वरूपयोग्यतावच्छेदकं, नतु धर्मादिमत्त्वमपि इति भावः. **''देवो असुरो मनुष्यो वा''** (भाग.पुरा.७।७।५०) इति सामान्येन निर्देशाद् इति अर्थः. **आगन्तुक...** इति. साहजिकाच्छिद्रत्वादिकं घटादिषु जलाहरणादियोग्यतासम्पादकं, नतु अन्तरोत्पन्ननीलपीतादि यथा, तथा अत्रापि जीवत्वस्यैव तथात्वं न धर्मवत्त्वस्यापि इति भावः.

भक्त्यभावेन व्यभिचाराद् अकारणत्वं चेद् ब्रवीति भवान्; तदा, धर्मसहकारित्वम् अनुग्रहस्य अंगीकरोतु. नहि सहकारिविरहेण कार्याभावो अकारणतासम्पादको, दण्डादेरपि घटादौ तथात्वप्रसंगात्.

‘‘भक्त्यैव तुष्टिम् अभ्येति विष्णुः न अन्येन केनचित्’’, (महाभा.तात्प.नि.भाग.१।११७) ‘‘भक्त्या तुतोष भगवान् गजयूथपाय’’ (भाग.पुरा.७।९।९) ‘‘प्रीयते अमलया भक्त्या हरिः अन्यद् विडम्बनम्’’ (भाग.पुरा.७।७।५२) इत्यादिवाक्यैः वैपरीत्यश्रवणाच्च भक्तौ धर्मसम्पत्तिः हेतुः, भक्तिः अनुग्रहे, इति युक्तम् उत्पश्यामः. नच धर्मरहितानामपि भक्तिदर्शनाद्, न एवम् इति वाच्यं, कार्येण जन्मान्तरीयतदनुमानसम्भवात्. नच अन्योन्याश्रयः, वाचनिकं हि एतत्, पूर्वोक्तवाक्यैः असन्दिग्धधर्मकारणतानिश्चयात्. नच अनुग्रहहेतुत्वेन

ननु धर्मवत्त्वादिहेतोः भक्तिमत्त्वसाध्याभाववद्गामित्वेन व्यभिचाराद् असाधको अयं हेतुरिति यत् तव मतं तन्न सम्यक्, यतो अस्माभिः अनुग्रहस्य धर्मादिसहकारित्वम् उच्यते, घटादिकार्ये दण्डादेरिव. अतः सहकार्यभावनिबन्धनकार्याभावो न कारणताहानिदः. तथा सति दण्डादेरपि अकारणत्वं स्यात्. पूर्वम् अनुग्रहसहकृतो धर्मो हेतुरिति वादी साम्प्रतम् अनुग्रहस्य तोषरूपत्वम् अंगीकृत्य तत्र भक्तिः हेतुरिति वैपरीत्यम् अंगीकृत्य तस्यां भक्तौ धर्मो हेतुरिति अभिप्रेत्य आह **भक्त्यैव** इत्यारभ्य **उत्पश्यामः** इत्यन्तेन. धर्मस्य अनैकान्तिकत्वम् आशंक्य समाधत्ते **नच** इति. **कार्येण** इति, भक्तिरूपकार्येण इति अर्थः. **तदनुमानं** भक्तिहेतुधर्मानुमानम्. व्याप्तेः अव्यभिचारघटितत्वाद् हेतोः अव्यभिचरितत्वग्रहे जन्मान्तरीयधर्मसिद्धिः, जन्मान्तरीयसिद्ध्यधीनश्च अव्यभिचारग्रहेति अन्योन्याश्रयलक्षणो दोषो ज्ञेयः. **वाचनिकम्** इति. अन्योन्याश्रयदोषः तदा उच्येत यदि अनुमानैकसमधिगम्यं भक्तिहेतुत्वं धर्मस्य स्यात्. नतु एवम् अस्ति, किन्तु एतज्जन्मान्तरीयधर्मरूपकारणज्ञानं **वाचनिकं** शाब्दम् इति अर्थः. सच शब्दो ‘‘**जन्मान्तरसहस्रेषु**’’ इत्यादिकः. ननु धर्मस्य स्वाव्यवहितकार्यानुग्रहएव हेतुत्वं युक्तं, नतु व्यवहितेऽपि इत्यतः आह **नच** इति. यद्वा, अनुग्रहस्य हेतुत्वे सिद्धे **तद्धेतुत्वं** = भक्तिहेतुत्वं

तद्धेतुत्वं तेषु उच्यते इति वाच्यम्, एवं बोधकप्रमाणाभावात्, साक्षात् तत्कारणत्वबोधकस्य उक्तत्वात्.

किञ्च, 'अनुग्रहो' नाम धर्मान्तरं फलदित्सैव वा? न आद्यः, मानाभावाद् गौरवात् च. न इतरः, तस्याः नित्यत्वेन तत्सहकार्यनंगीकाराच्च, सर्गादावेव भक्तिसम्भवेन अधुनैव भक्तिमत्त्वानुपपत्तेः, तस्याः मुक्तिचरमकारणत्वेन तेषां द्वितीयजन्मासम्भवेन आधुनिकभक्तदर्शनानुपपत्तेश्च. आद्यपक्षेऽपि इदं दूषणं ज्ञेयम्. भगवद्धर्माणां नित्यत्वांगीकारात्. तस्य जन्यत्वोक्तौतु परमतप्रवेशः. धर्माणामेव तज्जनकत्वसम्भवाद्

तेषु धर्मेषु न उच्यते इति नच वाच्यम् इति योजना....**प्रमाणाभावाद्** इति. अनुग्रहस्य साक्षाद्धर्मजन्यत्वम्, अनुग्रहद्वारा धर्माणां भक्तिहेतुत्वम् इत्यस्मिन् अर्थे प्रमाजनकं किमपि न अस्ति इति अर्थः. प्रत्युत साक्षात्कारणत्वे प्रमाणसद्भवात्. तानि च प्रमाणानि मूलएव उदाहृतानि "**श्रद्धा अमृतकथायां मे**" (भाग.पुरा.११।११।२३) इत्यादीनि.

"धर्मजन्यो अनुग्रहः" इति वादिनाम्, अनुग्रहस्य किं संस्कारादिवद् जन्यधर्मरूपत्वम् इच्छारूपत्वं वा? इति विकल्प्य एकैकशो दूषयति **किञ्च** इत्यादिना. **न आद्यः** इति. प्रयाजादिजन्यापूर्ववद् अनुग्रहोऽपि जन्यधर्मएव अस्मिन् अर्थे प्रमाणानुपलब्धेः. अनुपपत्त्यभावेऽपि अक्लृप्तपदार्थकल्पने गौरवदोषप्राप्तिः अतो न प्रथमः पक्षः. **न इतरः** इति. **इतरः** = फलदित्सापक्षः. **तस्याः** इति. भगवदिच्छायाः नित्यत्वं धर्मिग्राहकमानसिद्धम्. तादृश्याश्च अनित्यधर्मकारणसहकारित्वं विरुद्धम्. नहि नित्यस्य अनित्यकारणसहकारित्वं क्वचिद् घटपटादिषु दृष्टचरम्. दूषणान्तरम् आह **सर्गादौ** इति. यो जीवो अग्रे भक्तो भावी सोऽपि सृष्ट्यारम्भएव मुक्तिचरमकारणं भक्तिं प्राप्य मुक्तएव स्याद् नतु इदानीम् उपलभ्येतापि, तत्कारणेच्छायाः सर्वदा सत्त्वाद् इति अर्थः. **आद्य...** इति. 'अनुग्रहो' भगवद्धर्मविशेषः कश्चन इति अस्मिन्नपि पक्षे भगवद्धर्माणां नित्यत्वेन सर्गादावेव मुक्तिसम्भवेन आधुनिकभक्तदर्शनानुपपत्तिः इति भावः. **तस्य** इति, भगवद्धर्मानुग्रहस्य

इच्छायाः तथात्वे पूर्वोक्तदूषणापत्तिः, नित्यत्वात् तस्याः. तस्याश्च ज्ञानजन्यत्वनियमेन नित्यसर्वविषयकज्ञानवद् इच्छायाश्च जन्यत्वम् अनुपपन्नम्. किञ्च, अनुग्रहस्य अनियतत्वे निःशंका तदर्थिप्रवृत्तिः न स्यात्, स्वविषयकानुग्रहास्तित्वस्य ज्ञातुम् अशक्यत्वाद्; ज्ञाने च प्रवृत्त्युच्छेदः. तथाच ‘‘अस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे, भक्तिः उत्पद्यते पुंसः शोकमोहभयापहा’’ (भाग.पुरा.१।७।७) इत्यादिना तदर्थं व्यासस्य श्रीमद्भागवते प्रवृत्तिः इति उक्तिः च विरुद्धा स्यात्. किञ्च,

---

जन्यत्वकथने परेषां भगवद्दृष्टिबहिर्मुखानां **मते** सिद्धान्ते प्रवेशः स्वीकारो भवेद् इति शेषः. किञ्च, जनकत्वमपि अनुग्रहं प्रति धर्माणामेव वाच्यं, नतु इच्छायाः, तस्याश्च नित्यत्वादेव **पूर्वोक्तदूषणस्य** सर्गादावेव मुक्त्यापत्तिरूपस्य प्रसंगः स्याद् इति अर्थः. अत्र हेतुः **नित्यत्वात् तस्याः** इति. ननु भवतु अनित्यत्वम् इच्छायाः तथा सति न उक्तदूषणापत्तिः इति चेत्, तत्र आह **तस्याः च** इति. इच्छायाः जन्यत्वोक्तौ जनकत्वन्तु तत्समानाधिकरणसमानविषयज्ञानस्यैव वाच्यं, तच्च अनुपपन्नम्. भगवन्निष्ठयोः तयोः नित्यत्वं सर्वविषयकत्वं च धर्मिग्राहकमानसिद्धम् इति अर्थः. जन्यत्वे बाधकान्तरम् आह **किञ्च** इत्यारभ्य **तथात्वञ्च अग्रे** इत्यन्तेन. **अनुग्रहस्य** इति. अनुग्रहस्य जन्यधर्मान्तरत्वम् आश्रित्य इदं वचनम्. **अनियतत्वे** किञ्चिद् धर्मस्य व्याप्यत्वज्ञानाभावे तद्व्यापकानुग्रहस्य अनुमातुम् अशक्यत्वाद् **निःशंका** तदधीनभक्त्यर्थिप्रवृत्तिः भक्तौ न स्यात्. धूमादर्शने पर्वतीयवह्न्यर्थिप्रवृत्तिवद् इति अर्थः. तदेव स्पष्टीकर्तुम् आह **स्वविषयक...** इति. ननु भक्तौ पक्षपातश्रद्धातिशयत्वादिना तत्कारणानुग्रहास्तित्वं ज्ञायतां ततो न क्वापि प्रवृत्तौ अनुपपत्तिः इति चेत् तत्र आह **ज्ञाने च** इति. भक्तिसाधने इति शेषः. भक्तिकारणानुग्रहास्तित्वनिश्चये अनायासेनैव सेत्स्यन्त्यां भक्तौ कायक्लेशसाध्ये श्रवणादौ साधने न कोऽपि प्रवर्तेत इति भावः. श्री भागवते व्यासस्य भक्त्यर्थितया प्रवृत्तिवचनं विरुद्धं स्यात्, अतः प्रमाणविरुद्धोऽपि अयम् अर्थो ज्ञेयः दूषणान्तरमपि आह **किञ्च** इति. अनुग्रहैकलभ्यत्वमेव भक्तौ न साधनसाध्यत्वमपि इति या त्वदुक्ता रीतिः तया प्रणालिकया शास्त्रार्थज्ञाने उच्यमाने तदभिनिविष्टस्य कर्तव्याकर्तव्ययोः अर्थयोः

त्वदुक्तरीत्या शास्त्रार्थज्ञाने श्रौतविधिनिषेधांगीकारानुपयोगज्ञानाद् भक्त्यर्थिषु सदाचारोच्छेदप्रसंगः. नच इष्टापत्तिः, भक्त्यतिशयोत्तरकालीनत्वाद् एवंभावस्य. अतएव भरतस्य अतथात्वं पूर्वं, तथात्वञ्च अग्रे. तस्माद् अकामोपहताखिलवर्णाश्रमधर्मैः अनेकजन्मसञ्चितैः सत्त्वशुद्धौ अञ्जनाभ्यासजनितनयनतिमिरोपहतौ वस्तुतत्त्वज्ञानमिव भगवद्भक्तिरेव परमपुरुषार्थः इति शास्त्रार्थज्ञानम्. ततः तदर्थमेव वर्णाश्रमधर्मकरणे भगवद्भक्तिः, तयाच अनुग्रहः, तेनच मुक्तिः इति राजवर्त्मविदुषां

विधायकनिषेधकशास्त्रयोः उपयोगो न स्यादेव, अकिञ्चित्करत्वाद् इति अर्थः. एवं गुरुशिष्यपरम्परया भक्तिम् उपादित्सूनां सन्ध्यावन्दनादिशिष्टाचारोच्छेदः स्यात्, सः न्याय्यो न भवति इति अर्थः. ननु सर्वात्मभावपूर्विकानन्यभक्तौ सर्वधर्मत्यागे समीहितसिद्धिः इति चेत्, तत्र आह नच इति. **भक्त्यतिशयो** भक्त्युद्रेकः, तदनन्तरं स्वयमेव जायमानत्वात्. **एवंभावस्य** सर्वधर्मत्यागपूर्वकावस्थानस्य. ज्ञानपूर्वकं तथा आचरणे प्रत्यवायएव. तथाच स्मर्यते, **''श्रुतिस्मृती ममैव आज्ञे यः ते उल्लंघ्य वर्तते, आज्ञोच्छेदी मम द्वेषी मद्भक्तोऽपि न मे प्रियः''** (वाधूलस्मृति.१९५) इति.

अस्मिन् अर्थे प्राचीनाचरितं प्रमाणयन्ति. **अतएव** इति **भरतस्य** जडभरतस्य, **अतथात्वं** सर्वधर्मत्यागाकरणं, **पूर्वं** राजशरीरदशायाम्. **तथात्वं** सर्वत्यागपूर्वकम् अवस्थानम्, **अग्रे** पश्चाद् ब्राह्मणदशायाम्. स्वमतम् उपसंहरति भक्तेः साधनसाध्यत्ववादी, **तस्माद्** इति. **कामैः** विषयलालसैः न **उपहता** विषयीकृता **अखिलाः** सर्वे ये वर्णानाम् आश्रमाणां च धर्माः तैः साधनभूतैः **अनेकजन्मोपार्जितैः सत्त्वस्य** अन्तःकरणस्य **शुद्धौ** जातायां सत्यां भगवद्भजनमेव **पुरुषार्थः** इत्येवंरूपं शास्त्रार्थं निश्चिनोति. **''जन्मान्तरसहस्रेषु''** इत्यादिवचनाद् एवंविधनिश्चयस्य उचितत्वात्. अत्र दृष्टान्तः : बाह्यदृष्टिदोषाणां निवारकाञ्जनप्रक्षेपजनिततन्निवृत्तौ घटादिवस्तुयाथार्थ्यज्ञानमिव, तदनन्तरं भक्त्यर्थमेव वर्णाश्रमधर्मानुष्ठानं, तेन भक्तिः फलम्. **तयाच** भक्त्या जनितो **अनुग्रहो** भगवन्निष्ठो जीवविषयकः तेन मोक्षः इत्येवंविधं राजपथं जानतां शंका-शूकरूपतस्करोपद्रवाभावाद् न ज्ञानरूपधनस्य स्तेयम् इति एवंवादिनि

न ज्ञानधनमोषः कथञ्चन इति स्थिते वदामः : त्वदुक्तचित्तशुद्धावपि एकेषां ज्ञानमार्गिता, केषाञ्चिद् भक्तिनिष्ठतैव इत्यत्र को हेतुः ? इति उच्यताम्.

नच शुद्धौ तारतम्यं वाच्यं, तत्तुल्यता, यतो ज्ञानस्यापि; अन्यथा उत्पत्तिः न स्याद् इति विचारय.

तस्माद् आद्यप्रवृत्तिर्या भक्तावनुपपत्तितः ।
केवलानुग्रहात् सेति मन्तव्यं प्रतिवादिना ।।२।।

प्रत्यवतिष्ठमाने ब्रूमः इति अर्थः. **त्वदुक्त...** इति. अकामोपहतधर्मैः इति अर्थः. **ज्ञानमार्गिता** भक्तिम् अनादृत्य ज्ञानमार्गैकनिष्ठता इति अर्थः. अन्यथा एकत्र उभयसद्भावप्राशस्त्यं विरुद्धचेत. तदुक्तं निबन्धे आचार्यचरणैः **"ज्ञानी चेद् भजते कृष्णं तस्माद् न अस्ति अधिकः परः"** (त.दी.नि.१।१४) इति. **भक्तिनिष्ठता** भक्तिमार्गैकनिष्ठता. अत्र उभयोः वैलक्षण्यं सार्वजनीनम्. तच्च न कारणैक्ये घटते, अतः तद्वैविध्यम् अवश्यं वाच्यम् इति अर्थः. ननु क्लृप्तचित्तशुद्धावेव अवान्तरभेदेन तद्वैविध्यम् उच्यतां नतु अक्लृप्तहेत्वन्तरमपि इत्यतः आह **नच** इति. **तत्तुल्यता** इति, शुद्धयापादकधर्मादीनाम् उभयत्रापि साम्येन उपलम्भाद् इति अर्थः. **ज्ञानस्यापि** इति. चित्तशुद्धिः भक्तौ स्वातिरिक्तम् अपेक्षते यदि तदा ज्ञानोत्पत्तावपि तथात्वापत्तिः इति भावः.

स्वसिद्धान्तम् आह **तस्माद्** इति. अनुपलब्धसाधनस्य जीवस्य सृष्ट्यारम्भे इयं प्रथमतया **प्रवृत्तिः भक्तौ या दृश्यते सा केवलानुग्रहात्** साधनान्तरासहकृतादेव भवति, साधनानाम् अनुपलम्भात्, प्रकारान्तरेण उपपत्त्यभावाद् इति अर्थः. ननु अनुमितिसद्भावात् कथं न साधनान्तरोपलम्भः ? तथाहि विवादाध्यासिता प्रवृत्तिः अनुग्रहेतरपूर्विका, क्रियात्वाद्, भुजिक्रियावद् इति चेद, न, प्रतिपक्षसद्भावात्. तथाहि पूर्वोक्ता प्रवृत्तिः न अनुग्रहेतरपूर्विका भक्त्यर्थिक्रियात्वात्. नारदप्रह्लादादिक्रियावद् इति. अस्य अनुग्राहकं

ननु एवमपि मदुक्तमेव अनुवदति भवान्. यतो "अनुग्रहरूपसहकारिविशेषं प्राप्य सत्त्वशुद्धिरेव भक्तिं जनयति, अप्राप्य तं न ताम्" इति वदति. अन्यथा शुद्धेः पूर्वमेव भक्त्युत्पत्तिप्रसंगस्य दुर्वारत्वम् इति चेत्, तर्हि आवश्यकत्वाद् लाघवात् च अनुग्रहएव तद्धेतुः अस्तु. कृतं शुद्ध्यादिभिः. नच विनिगमकाभावाद् दण्डचक्रादेः घटकारणतावद् अत्रापि वाच्यं, तत्र अन्योन्यसापेक्षतयाएव कार्यजनकत्वात् तथात्वम् उच्यते. न इह तथा, साधनरहितानामपि भक्तिदर्शनात्. नच जन्मान्तरीयतदनुमानं तेषु इति वाच्यं, इतरसाधननिषेधश्रवणात्. तथाहि "न रोधयति मां योगो न सांख्यं धर्मः उद्धव! न स्वाध्यायः

प्रमाणं "**यमेव एषः वृणुते**" (कठोप.१।२।२३) इति पूर्वोक्तश्रुतिः अनुसन्धेया.

भ्रान्तः शंकते ननु इति, शुद्ध्यनन्तरभाव्य**नुग्रहरूपसहकारिविशेषं प्राप्य** इति अर्थः. तम् अनुग्रहं अप्राप्य **तां** भक्तिम् इति अर्थः **अन्यथा** इति, अनुग्रहसहकारिविलम्बनिबन्धनो भक्त्युत्पत्तिविलम्बो यदि न उच्यते तदा उक्तदोषः स्याद् इति अर्थः. **आवश्यकत्वाद्** इति. "**यमेव एषः वृणुते**" (कठोप.१।२।२३) इत्यादिप्रमाणान्यथानुपपत्त्या अनुग्रहस्य सर्वकारणापेक्षया पूर्वभावित्वम् अवश्यम् अभ्युपेयम् अतः आवश्यकत्वाद् लघुनि प्रमाणानां पक्षपातः इति न्यायाच्च. अनेकधर्मादीनां कारणत्वे गौरवं, तदपेक्षया वरम् एकस्यैव अनुग्रहस्य, "तद्धेतोरेव अस्तु किं तेन" इति न्यायाद् इति अर्थः. यथा घटकारणदण्डचक्रकुलालादीनाम् एकत्रैव कारणता वैशिष्ट्यनिश्चायकाभावाद् अविशेषेण सर्वेषां कारणत्वम् एवम् अनुग्रहस्यापि धर्मादिसहभावएव किं न स्याद् इति आशंक्य आह **नच** इति. **तत्र** इति, घटोत्पत्तौ चक्रादीनां सहभावेनैव कार्यकारित्वं दृष्टम् अतः तत्र दृष्टानुरोधेन **तथा** कल्पनम् उचितम्, **प्रकृतेतु** न तथा, साधनराहित्येऽपि भक्तिसद्भावाद् इति अर्थः. ननु "समाप्तिदर्शनाद् जन्मान्तरीयमंगलानुमानवद् अत्रापि भक्तिकार्यदर्शनात् तत्कारणं धर्मादिरूपं प्राक्तनं कल्प्यतां, तथाच न व्यभिचारः स्याद्" इत्यतः आह **नच** इति. **इतर...** इति. अनुग्रहेतरसाधनानाम् इति अर्थः. तथा सति हेतोः स्फुटमेव साध्याभाववद्गामित्वम् इति भावः.

तपः त्यागो न इष्टापूर्तं न दक्षिणाः, व्रतानि यज्ञः छन्दांसि तीर्थानि नियमाः यमाः यथा अवरुन्धे सत्संगः सर्वसंगापहो हि मां, सत्संगेन हि दैतेया यातुधानाः खगाः मृगाः'' (भाग.पुरा.११।१२।१-३) इति उपक्रम्य, अग्रे भगवता उच्यते ''ते न अधीतश्रुतिगणा न उपासितमहत्तमाः अव्रतातप्ततपसः सत्संगाद् माम् उपागताः, ये अन्ये मूढधियो नागाः सिद्धाः माम् ईयुः अञ्जसा'' (भाग.पुरा.११।१२।७-८) इति. अत्र पूर्वोक्तानां जन्मान्तरीयतत्सत्त्वे ''ते न अधीत...'' इत्यादिना तन्निषेधो न उपपद्यते. किञ्च, ''यद् न योगेन सांख्येन दान-व्रत-तपो-ऽध्वरैः, व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद् यत्नवानपि'' (भाग.पुरा.११।१२।९) इति साधनरहितप्राप्तस्वरूपस्य इतरसाधनाप्राप्यत्वं श्रीगोकुलप्राणनाथेन उक्तमिति अन्वयव्यतिरेकव्यभिचारोक्तेः न तद्धेतुत्वगन्धोऽपि. अत्र निःसाधनानां ''केवलेन हि भावेन'' (भाग.पुरा.११।१२।८) इत्यादिना स्नेहभक्तिनिरूपणाद् भक्तेः तदसाध्यत्वम् अवसीयते.

ननु ''जन्मान्तरसहस्रेषु'' इत्यादिवाक्यानां का गतिः? उच्यते : भगवता स्वप्राप्त्यर्थं मार्गद्वयं प्रकटितं : मर्यादारूपं पुष्टिरूपं च. तत्र

अनुमानप्रकारस्तु ''इयं भक्तिः साधनपूर्विका, भक्तित्वात् साधनमार्गीयभक्तिवद्-'' इति. अत्र साध्याभावप्रमित्यर्थं **''न शोधयति मां योगः''** (भाग.पुरा.११।१२।९) इत्यादिप्रमाणप्रदर्शनं ज्ञेयम्.

ननु श्रीगोकुलस्थानामपि अन्यैः कैश्चिदपि अज्ञातः सुसूक्ष्मो धर्मादिरिव प्राक्तनो भविष्यति इत्यतः न साध्याभावः इति चेद्, न, एवं सति **''ते न अधीतश्रुतिगणाः न उपासितमहत्तमाः''** (भाग.पुरा.११।१२।७) इत्यादि सर्वज्ञेश्वरवचनं विरुद्ध्येत. नहि **भगवतोऽपि** अज्ञातपदार्थः कश्चन सम्भवतीति. व्यतिरेकव्यभिचारप्रदर्शनाय **''यद् न योगेन''** (भाग.पुरा.११।१२-।९) इत्यादि ज्ञेयम्. तत्र एवं ज्ञेयं : यत्र साधनपूर्वकत्वाभावः तत्र भक्तित्वाभावः इति. गोकुलवासिष्वेव साधनपूर्वकत्वाभावेऽपि भक्तिमत्त्वसद्भावाद्, भक्तेः साधनसाध्यत्वप्रतिपादकवाक्यानां सर्वथा वैयर्थ्यम् आशंक्य समाधत्ते **भगवता**

येषां जीवानां मर्यादायाम् अंगीकारः, तेषां साधनक्रमेणैव भगवत्प्राप्तिः. यथा आसुरावेशिनामपि मुक्तिं ददत् स्वरूपं दृष्टवतोऽपि मुचुकुन्दस्य दोषवर्णनपूर्वकं तद्रहिताग्रिमजन्मनि स्वप्राप्तिकथनम्. येषाञ्च पुष्टिमार्गे अंगीकारः तेषां केवलानुग्रहेणैव, न साधनापेक्षा इति सिद्धान्तः. यथा व्रजादिस्थिताः. तत्र-तत्र अंगीकारेच इच्छैव हेतुः, स्वतन्त्रेच्छत्वाद् न अन्यनियम्यता. तथाच साधनवाक्यानि मर्यादामार्गपराणि इति ज्ञेयम्. तत्र अंगीकृतानां तथैव प्रवृत्तिः, तथैव फलं च. एतेन ''भक्त्यर्थिषु सदाचारोच्छेदप्रसंगः'' इति दूषणं निरस्तं वेदितव्यम्. येषु जीवेषु यथा भगवदिच्छा, तथैव तेषां प्रवृत्तेः आवश्यकत्वात्. अतएव भक्त्यर्थिनां निःशंकप्रवृत्त्यभावप्रवृत्त्युच्छेदौअपि निरस्तौ.

अपरञ्च, ''तस्मान् मद्भक्तियुक्तस्य योगिनो वै मदात्मनो न ज्ञानं नच वैराग्यं प्रायः श्रेयो भवेद् इह, यत् कर्मभिः यत् तपसा ज्ञानवैराग्यतश्च यद् योगेन दानधर्मेण श्रेयोभिः इतरैरपि, सर्वं मद्भक्तियोगेन मद्भक्तो लभते अञ्जसा स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति, न किञ्चित् साधवो धीराः भक्ताः हि एकान्तिनो मम वाञ्छन्त्यपि मया दत्तं कैवल्यम् अपुनर्भवम्'' (भाग.पुरा.११।२०।३१-३४)

इति. **येषाञ्च** इति. **पुष्टिः** अनुग्रहः. **तेषां** केवलः साधनरहितो यो गुर्वनुग्रहः तन्मात्रेणैव भक्तौ प्रवेशः. **यथा** इति, गुर्वनुग्रहलभ्यत्वं व्रजातिरिक्तस्थले ज्ञेयम्. अन्यथा ''न उपासितमहत्तमाः'' इति विरुद्ध्येत. **व्रजादिस्थिताः** इत्यत्र, ''व्रजः आदिः येषाम्'' इति जहत्स्वार्थलक्षणबहुव्रीहिणा व्रजस्य उपलक्षणत्वं ज्ञेयम्. तत्र-तत्र इति. पुष्टिमर्यादयोः प्रवेशाप्रवेशयोः इति अर्थः. एकस्य तथात्वे अन्यस्य अतथात्वे स्वतन्त्रेच्छैव हेतुः. एवं व्यवस्थितौ साधनसाध्यत्वप्रतिपादकवचनविरोधो अधिकारिभेदेनैव परास्तः. अतएव न सदाचारोच्छित्तिदोषोऽपि इति तात्पर्यम्. **येषु** इति. **अतएव** इति. यतो भगवदिच्छाधीनत्वं प्रवृत्तेः अतो भगवता यो यस्मिन् मार्गे प्रवर्तितः सः पुनः पुनः तदर्थमेव यतते श्रद्धते च भगवदनुग्रहलब्धविश्वासाद् निःशंकः साधने सदाचारे च प्रवृत्त्युपपत्तिरपि इति भावः. मर्यादामार्गीयव्यवस्थाम्

इत्यादिवाक्यैः ज्ञानवैराग्यरहितानामेव भक्तिकथनाद् भक्तेः कल्पतरुस्वभावत्वेन इतरसकलसाधनसाध्यसाधकत्वोक्तेः च न इतरसाधनसापेक्षता भक्तौ. "भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (भाग.पुरा.५।६।१८) इति श्रीशुकवचनैः मुक्तिसाधनपूर्णानामपि भगवद्दाने भक्तिप्राप्तिः, अदानेच अप्राप्तिः इति निरूपणादपि अनुग्रहेतरसाधनासाध्यत्वं भक्तौ निश्चीयते. उक्तमार्गद्वये च अंगीकारो अनुग्रहेणैव इति न मर्यादामार्गेऽपि भक्तेः साधनबलसाध्यत्वम्; अन्यथा, "जायस्व म्रियस्व" (छान्दो.उप.५।१०।८) इति तृतीयमार्गएव अंगीकारं कथं न कुर्यात्?

उक्त्वा पुष्टिमार्गीयाम् आह **अपरञ्च** इति. **ज्ञानवैराग्यरहितानामेव** इत्यत्र. तद्रहितानामपि इति युक्तं नोचेत् तद्राहित्यम् अधिकारशरीरप्रविष्टं स्यात्. **इतर...** इति. अनुग्रहेतराणि यानि सर्वाणि साधनानि कर्माणि तैः प्रत्येकसमुदायाभ्यां साध्यं प्राप्यं यत् फलं तत्साधकत्वं सर्वसाधनराहित्यसहितभक्तेरेव, न अन्यस्य इत्यतो युक्तं कल्पतरुत्वम्. **मुक्तिसाधन...** इति. वशीकृतमुक्तीनां वशीकृतसाधनानाम् इति अर्थः, मुक्तिहेतुपूर्णानाम् इति वा. यदि सा भक्तिः भगवदनुग्रहं विना प्रकारान्तरलभ्यापि स्यात् तदा सर्वदुर्लभमोक्षपर्यन्तं धावद्भिः किमिति न प्राप्ता. **"सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यते"** (भग.गीता ४।३३) इति गीतावचनाद् मुक्तैरपि प्रार्थ्यभक्तौच अनुग्रहेतरासाध्यत्वम् इति भावः. **उक्तमार्ग...** इति. पुष्टिमर्यादयोः इति अर्थः. वस्तुतो मूलान्वेषणे क्रियमाणे मर्यादामार्गेऽपि भक्तिः अनुग्रहैकलभ्या, न साधनलभ्या. साधनकथनन्तु अनुग्रहरूपकल्पवृक्षस्य शाखाविस्तारः एतावान् इति ज्ञापनार्थं नतु स्वातन्त्र्येण भक्तिजनकत्वकथनार्थम्. इदन्तु त्वयापि भक्तिमार्गीयेण अवश्यम् अभ्युपेयम् इतितु रहस्यम्. **अन्यथा** इति, भगवदनुग्रहं विना साधनानां भक्तिजनकत्वोक्तौ **"जायस्व म्रियस्व"** (छान्दो.५।१०।८) **"मृत्वा पुनः मृत्युम् आपद्यन्ते अर्द्यमानाः स्वकर्मभिः"** (   ) इत्याद्युक्तो यः तृतीयमार्गः प्रवाहाख्यः तत्रापि कथं न अंगीकारं कुर्यात्. साधनमात्राचरणस्य तुल्यत्वाद् इति अर्थः.

पुष्टौ साधनानां व्यभिचारादेव न हेतुत्वं शंकितुमपि शक्यम् इति अलम् उक्तिभिः. एवं सति साधनमार्गकरणं यतः तद् वक्ष्यते "पोषणं तदनुग्रहः" (भाग.पुरा.२।१०।१४) इति वाक्यात् पोषणलीलायाः स्वतन्त्रत्वाद् "यस्य अनुग्रहम् इच्छामि" (द्र.स्क.पुरा.१।३।२।१६) इति वाक्याच्च अनुग्रहो धर्मान्तरमेव. अनुग्रहानुरूपाच इच्छा सर्वत्र सहकारिणी. सहकारिनिरपेक्षानुग्रहसाध्या भक्तिः इत्यपि गुडजिह्विका. वस्तुतस्तु "कार्यमात्रम् इच्छाधीनमेव" इति त्वयापि उररीकार्यम्. तथाहि, यदा-यदा यद् यत् कार्यं भवति, भावि, अभूद् वा,

---

ननु अनुग्रहस्य उभयत्रापि आवश्यकत्वे मर्यादायामेव साधनोपदेशः पुष्टावपि कथं न इत्यतः आह **पुष्टौ** इति, "**न रोधयति मां योगः**" (भाग.पुरा.११।१२।१) इत्यादि पूर्वोक्तवचनैः **साधनानां** व्यभिचारित्वम् अन्वयव्यतिरेकाभ्यां स्फुटमेव. अतः तत्र तद्धेतुत्वं **शंकितुमपि** असम्भावि इति सिद्धान्तः. **एवं सति** इति, अनुग्रहैकलभ्यत्वे तुल्येऽपि सति मर्यादायां यत् **साधनमार्गस्य** साधनाचरणस्य **करणम्** उपदेशो येन अभिसन्धिना तद् वक्ष्यते पूर्वं ज्ञापितमपि **वस्तुतस्तु...** इत्यादिना स्फुटं कथयिष्यते इति अर्थः. स्वैकदेशिमतं निरस्यति, **पोषणम्** इति. सर्गविसर्गादिवद् अनुग्रहस्यापि धर्मान्तरत्वमेव उचितम्. तथा सति **अनुग्रहानुरूपा** अनुग्रहपूर्विका भक्तकार्येच्छा सा **सर्वत्र** तत्तन्मार्गीयभक्तकार्यमात्रे **सहकारिणी** कारणान्तरम् अपेक्ष्य कार्यजनिका इति अर्थः. भक्तिरूपे कार्ये परम् इयान् विशेषो यद् अन्यनिरपेक्षानुग्रहसाध्यत्वम् इति अर्थः. आपातरमणीयम् इति अर्थः. अत्र अस्वरसबीजं कार्यमात्रस्य इच्छाधीनत्वे अनुग्रहस्यापि कार्यत्वात् तदिच्छाधीनत्वमेव उचितम्. तस्माद् अवान्तरव्यापारत्वमेव अनुग्रहस्य भक्तौ जनयितव्यायां कारणन्तु इच्छैव इति भावः.

वस्तुतस्तु इति. सहकारिनिरपेक्षानुग्रहवादिनामपि **उररीकार्यम्** अंगीकर्तव्यम् इति अर्थः. तत्र उपपत्तिप्रकारम् आह **तथाहि** इति. **यदा** इति. यस्मिन् यस्मिन् काले, येन-येन इत्यपि ज्ञेयं, वीप्सायां द्विरुक्तिः. **यद् यद्** इति कार्यनिर्देशः. मुख्यकर्तुः भगवतः एकत्वेन वीप्साविषयत्वाभावात्

तत्तत्कालोपाधौ क्रमिकेणैव तेन तेन हेतुना, तत् तत् कार्यं करिष्ये इति ततः पूर्वं भगवदिच्छा अस्ति, आसीद् इति वा मन्तव्यम्. अन्यथा तच्चिकीर्षामात्रस्य नित्यत्वेन युगपत् सकलकार्योत्पत्तिप्रसंगः. नच इतरकारणासमवधानाद् न तथा इति वाच्यं, तस्यापि कार्यत्वेन तच्चिकीर्षायाअपि पूर्वम् अवश्यं वाच्यत्वात्. तस्याः कार्यमात्रे कारणत्वात् तदपि युगपत् स्यात्. नच तत्पूर्वक्षणः प्रतिबन्धकः इति वाच्यं, तत्प्रागभावकाले अग्रिमकार्योत्पत्तिप्रसंगात्.

कर्मैव कर्तृत्वेन विवक्षितम्. **भवति** इति, वर्तमानकालोपाधिः. भावी इति भविष्यत्कालोपाधिः, **अभूद्** इति, अतीतकालोपाधिः एतेषु यथायथं **क्रमिकेणैव** क्रमप्राप्तेनैव हेतुना तत्तकार्यं करोमि करिष्यामि इत्येवं प्रकारिका **भगवदिच्छा अस्ति आसीद्** इति मन्तव्यं, सत्यसंकल्पत्वाद् भगवतः. **ततः पूर्वं** तत्कार्योत्पत्तेः प्रागेव इति अर्थः. **अन्यथा** इति, कालोपाधिक्रमिककार्यानंगीकारे. साधारणकारणचिकीर्षायाएव हेतुत्वे प्राप्ते तत्कार्यकारणोभयविषयिण्योः तयोः सर्वदा सत्त्वाद् एककालमेव सकलकार्योत्पत्तिप्रसंगदोषः प्रसज्येत इति अर्थः.

ननु दण्डादिषु एकस्य असत्त्वेऽपि घटानुत्पत्तिवद् अत्रापि चिकीर्षेतरकारणासमवधानाद् न युगपदुत्पत्तिप्रसंगः इत्यतः आह **नच** इति. **तस्यापि** इति. चिकीर्षेतरकारणसमवधानस्यापि इति अर्थः. समवधानस्यापि कार्यत्वात् तत्कारणचिकीर्षायाः पूर्ववद् अत्रापि सत्त्वात् पुनरुक्तदोषएव इति अर्थः.

ननु प्रतिबन्धकसत्त्वात् तत्र न कार्योत्पत्तिः इति चेत् तत्र आह **नच** इति. **तत्पूर्वक्षणः** इतरकारणसमवधानाव्यवहितपूर्वक्षणः इति अर्थः. **तत्प्रागभावकाले** इति. सामग्रीसमवधानाव्यवहितपूर्वक्षणात् प्राक्काले प्रतिबन्धकाव्यवहितपूर्वक्षणस्य असत्त्वात् तदानीं कार्योत्पत्तिप्रसंगः इति अर्थः. ननु यस्मिन् यस्मिन् क्षणे यद् यत् कार्यं जायते तत्तत्कार्यं तत्तत्क्षणाधिकरणकं भवति, तादृशकार्यं प्रति तस्यैव कार्यस्य प्रागभावेन अवच्छिद्यते विशेष्यते अन्यस्मात् पृथक् क्रियते इति यावत्, सः प्रागभावावच्छिन्नः कालः,

नच तत्तत्क्षणाधिकरणकतत्तत्कार्यं प्रति तत्तत्प्रागभावावच्छिन्नस्थूलकालोपाधिः तथा सृष्टौ प्रलयकालइव इति वाच्यम्, एवं हि प्रलयाभावस्य सृष्टौ हेतुत्वमिति तत्पूर्वकालसत्त्वनियमेन तदधिकरणकालस्य प्रलयसृष्टिकालातिरिक्तत्वापत्तेः. प्रतिबन्धकाभावस्य कारणत्वेन तत्पूर्वक्षणवर्तित्वस्य अवश्यं वाच्यत्वात्. कार्यतदभावातिरिक्तकालस्य च उक्तानि अन्यतराभावेनैव परास्तत्वात्. नच एवं वक्तुं शक्यम्,

---

सच सूक्ष्मोऽपि सम्भवति इत्यतः स्थूलो महान् यः कालः सएव उपाधिरूपः प्रतिबन्धको भवतु, यथा प्रलयकाले सिसृक्षायां सत्यामपि सृष्टिप्रागभावावच्छिन्नो अनेकमन्वन्तरपरिमितः स्थूलकालोपाधिः प्रतिबन्धकः, अन्यथा तत्रापि सृष्टिः केन प्रतिबध्येत. यथा च संजिहीर्षायां सत्यामपि प्रलयप्रागभावावच्छिन्नः स्थूलः सृष्टिकालः प्रतिबन्धकः अन्यथा तत्रापि प्रलयप्रसंगाद्; एवम् अत्रापि सामग्रीसमवधानाधिकरणक्षणप्रागभावावच्छिन्नः स्थूलकालोपाधिः प्रतिबन्धको अस्तु इति चेत्, तत्र आह नच इति. एवं हि इति. सृष्टिप्रलययोः तमःप्रकाशवत् परस्परं विरुद्धस्वभावत्वाद् एकस्य सत्त्वे अपरस्य असत्त्वं वाच्यं, ततः सृष्टौ भवितव्यायां प्रतिबन्धकाभावत्वेन प्रलयाभावो हेतुः वाच्यः, सच स्वकार्यात् पूर्वकाले सत्त्वं नियतम् अपेक्षते, अतः सृष्टिकारणप्रलयाभावाधिकरणीभूतकालस्य न प्रलयाधिकरणत्वं, तदसत्त्वात्. नापि सृष्ट्यधिकरणत्वं जनिष्यमाणत्वात् तस्याः. अतः उभयानधिकरणस्यापि सत्त्वाद् अतिरिक्तकालसिद्धिप्रसंगः स्यात्. सच प्रकृतानुपयुक्तत्वाद् व्यवहाराविषयत्वाद् न शक्यवचनः इति अर्थः.

ननु एवंविधोऽपि कालः कुतो न इत्यतः आह कार्य... इति. कार्यं सृष्टिः, तदभावः प्रलयः, ताभ्याम् अतिरिक्तस्य तदुभयानधिकरणस्यापि कालस्य, उक्तौ यौ सृष्टिप्रलयौ तयोः मध्ये एकस्यापि अधिकरणं न भवति. एतदुभयव्यवहारातिरिक्तव्यवहाराभावात् तत्साधकं कार्यान्तरमपि न अस्ति इत्यतः सुतरां तत्सिद्ध्यभावः इति अर्थः. ननु यस्मिन् कालोपाधौ यत् कार्यं जायते तत्कालोपाधिप्रागभावः तत्कार्ये प्रतिबन्धकः इति चेत्,तत्र आह नच इति. तस्य इति. कार्याधिकरणकालोपाधिकप्रागभावस्य,

अप्रसिद्धेः. नच तत्तत्कालोपाध्यभावएव प्रतिबन्धकः, तस्य प्रागभावरूपत्वेन प्रतियोगिसामग्र्याएव च तन्नाशकत्वेन तत्सत्त्वे तत्सत्त्वासम्भवात्. नच उत्तरक्षणचिकीर्षितघटस्य अधुनैव अकरणे उत्तरक्षणाभावएव त्वयापि प्रतिबन्धको वाच्यः, इच्छाभावस्यैव तथात्वेऽपि ''सविशेषणे हि'' (लौ.न्या.सा.१५७) इति न्यायेन क्षणाभावएव पर्यवसानाद् इति वाच्यं, क्लृप्तकारणैः कार्योत्पत्तिसम्भवे येन कार्याभावः तदभावस्य हि प्रतिबन्धकाभावत्वेन कारणत्वं दाहे मण्यभावस्येव; दण्डाद्यभावे घटानुत्पादेऽपि न तेषां प्रतिबन्धकाभावत्वेन कारणता, किन्तु दण्डत्वादिना. प्रकृतेऽपि तत्क्षणविशिष्टेच्छायाः हेतुत्वेन पूर्वं तदभावात् तद्विशिष्टतल्लक्षणहेत्वभावादेव कार्याभावः.

प्रतियोगिप्रतिबन्धकत्वोक्तौ कारणसामग्र्याएव स्वकार्यप्रतिबन्धकत्वात् कार्यं किमपि न उत्पद्येतैव इति अर्थः.

ननु भाविकार्याधिकरणक्षणस्यापि कारणत्वात् तदभावप्रयुक्तः इदानीन्तनकार्याभावः इति चेत् तत्र आह नच इति. **क्लृप्तकारणैः** इति. श्रुतिसिद्धम् इच्छायाः कारणत्वम् अतः तस्याएव कारणत्वम् उचितम्. बहुत्वाभिधानन्तु विषयभेदाभिप्रायेण ज्ञेयम्. इच्छायाः भावरूपत्वाद् लाघवम्. क्षणाभावस्य प्रतियोगिनिरूपणाधीननिरूपणत्वात् तस्य कारणत्वे गौरवम्. यत्रापि न आन्तरीयकतया कारणत्वं प्राप्तं तत्रापि न सम्मुखेन, किन्तु प्रतिबन्धकाभावत्वेनैव कारणता. यथा दाहकार्ये उत्तेजकाभावविशिष्टमणेः प्रतिबन्धकत्वाद् उत्तेजकाभावविशिष्टमण्यभावस्य प्रतिबन्धकाभावत्वेनैव कारणता, न स्वरूपेण. तर्हि दण्डादीनामपि किम् एवमेव कारणता न इति आह **दण्डाद्यभावे** इति. **प्रकृतेऽपि** इति. इच्छायाएव कारणत्वपक्षेऽपि तत्तत्कार्याधिकरणक्षणविशिष्टायाएव हेतुत्वं वाच्यं, तेन कार्यप्रागभावकाले विशेष्यसत्त्वेऽपि उभयाभावस्य सत्त्वाद् विशेषणाभावापत्तौ विशिष्टाभावः इति न्यायात्. यत्सत्त्वे यत्सत्त्वं यदभावाद् यदभावः तत् तद्धेतुकम् इति अभिप्रेत्य

ननु एवमपि ‘‘सविशेषणे हि’’ इति न्यायेन क्षणस्यैव कारणत्वम् आयाति. किञ्च, इच्छात्वेनैव लाघवात् कारणत्वम् इच्छायाः, नतु तद्विशिष्टत्वेन गौरवात्, तथाच तत्क्षणलक्षणसहकार्यभावाद् न इच्छामात्रेण अन्यदा तत्कार्यम् इति चेद्, अत्र वादी प्रष्टव्यः. तत्क्षणाभावे को हेतुः इति. तत्साधनाभावः इति चेद् वदेत् तदा तत्रापि एवं प्रश्ने, तेन तत्तत्साधनपरम्पराभावएव हेतुः वाच्यः. साधनपरम्परा च साध्यपरम्परायाम्. एवञ्च सति तत्तत्परम्परासत्त्वासत्त्वयोः भगवदिच्छैव केवला हेतुरिति तेनापि मन्तव्यम्. अन्यथा तयोः आकस्मिकत्वप्रसंगात्.

ननु अजन्यायाः तस्याः केवलायाः तथात्वे सर्वाभावएव स्यात्,

क्षणस्यैव कारणत्वम् आशंकते ननु इति. **एवमपि** विशेपणासत्त्वाद् विशेष्यासत्त्वे उच्यमानेऽपि. ‘‘**सविशेषणे हि प्रसक्तौ विधिनिषेधौ विशेषणम् उपसंक्रामतो विशेष्ये बाधके सति**’’ (लौ.न्या.सा.१५७) इति न्यायात् क्षणस्यैव कारणत्वम् आगतम्. **किञ्च** इति दूषणान्तरम्. येनापि इच्छायां कारणत्वं वाच्यं तेनापि **इच्छात्वेनैव** नतु तत्तत्क्षणविशिष्टेच्छात्वेनापि, **गौरवग्रस्तत्वात्**. घटकारणतायां दण्डत्वेनैव यथा न दृढदण्डत्वेनापीति. कार्योत्पत्तौतु क्षणलक्षणसहकारिम् अपेक्ष्यैव कार्यकारित्वं न तन्मात्रेण इति चेद् ब्रूयात् तदा **प्रष्टव्यः** सः इति अर्थः. **साधनपरम्परा च** इति. साधनमेव साध्यत्वेन ज्ञेयम्. **एवञ्च** इति. यत्र यत् कार्यं जायते तेन कार्येण तत्पूर्वतरपूर्वतमसाधनपरम्परा अस्ति इति ज्ञायते. साच क्वचिद् विश्रान्ता वाच्या अन्यथा [१]अनवस्थादोषः आपतेत्. अस्तु प्रामाणिकी सा इति चेत्, ‘‘**सो अकामयत बहु स्यां प्रजायेय**’’ (तैत्ति.उप.२।६) इत्यादिश्रुतिविरोधाद् न तथा. तथा सति प्रमाणान्तरसिद्धत्वाद् अनन्यगतिकत्वात् त्वयापि कारणत्वेन इच्छा अवश्यं वाच्या. **अन्यथा** इच्छायां कारणताव्यवस्थितौ अनुच्यमानायां तयोः साधनसाध्यपरम्परासत्त्वासत्त्वयोः कार्यतदभावयोः वा आकस्मिकत्वं स्यात्. तथा सति बाह्यमतप्रवेशः स्याद् इति भावः.

---

[१] अव्यवस्थादोषः इति क ग घ पुस्तकेषु.

सर्वं वा युगपत् स्याद् इति चेद्, अत्र एवं ज्ञेयम्. त्वदुक्तरीत्या हि सर्गादिकारणे विमर्शः पर्यवस्यति. तच्च, श्रुति-सिद्धप्रकारकमेव अंगीकर्तव्यम् आस्तिकैः. तत्रच केवलेच्छायाएव हेतुत्वम् उच्यते. तथाहि वाजसनेयिशाखायां ''आत्मैव इदम् अग्रे आसीत् पुरुषविधः सो अनुवीक्ष्य न अन्यद् आत्मनो अपश्यद्'' (बृह.उप.१।४।१, शत.ब्रा.१४।४।२।१) इति उपक्रम्य, अग्रे पठ्यते ''सः वै नैव रेमे, तस्माद् एकाकी न रमते, सः द्वितीयम् ऐच्छत्, स ह एतावान् आस, यथा स्त्रीपुमांसौ सम्परिष्वक्तौ सः इममेव आत्मानं द्वेधा आपातयत् ततः पतिश्च पत्नी च अभवताम्'' (बृह.उप.१।४।३,शत.ब्रा.१४।४।२।४) इत्यादि. अत्र द्वितीयसृष्टौ इच्छामात्रस्यैव हेतुत्वम् उच्यते रमणेच्छायाश्च तदिच्छाप्रयोजकत्वम्. तथाच स्वक्रीडार्थमेव जगत्करणम् इति अर्थः सम्पद्यते. अतएव श्रीभागवतेऽपि ''क्रीडाभाण्डं विश्वम् इदं यस्य विभूम्नः'' (भाग.पुरा.४।७।४३) ''क्रीडार्थम् आत्मनः इदं त्रिजगत् कृतं ते स्वाम्यन्तु तत्र कुधियो अपरे ईश! कुर्युः'' (भाग.पुरा.८।२२।२०) इत्याद्युक्तम्. एवं सति वस्तुनियमाभावे वैचित्र्याभावेन क्रीडाऽसम्भवात् तदर्थं

वादी स्वमतं सदोषम् आज्ञाय सिद्धान्तिमतं स्वीकृत्य शंकते ननु इति. परस्परविरुद्धसर्गसंहारयोः सिसृक्षासंजिहीर्षालक्षणोभयकारणयोः सर्वदा सत्त्वात् सार्वकालिकी सृष्टिरेव स्याद् वा सार्वकालिकः प्रलयो वा इत्यत्र कथं समाहितिः इति प्रश्ने उत्तरं **त्वदुक्त...** इति. सर्वं स्यात् सर्वमपि न स्याद् इत्येवंविधा या त्वदुक्तप्रश्नरीतिः तयातु रीत्या सर्गप्रलययोः **कारणे** निश्चीयमाने **विमर्शो** विचारः, इदम् उपपन्नं न वा इति एवंविधः **पर्यवस्यति** सम्भवति इति अर्थः. **तच्च** इति तद्विचारणमपि वक्ष्यमाणश्रुत्यादिषु यः सृष्ट्यादिप्रकारः उक्तः तेनैव प्रकारेण **आस्तिकैः** परलोकमतिमद्भिः कर्तव्यम् इति अर्थः. तथा सति सिद्धम् इच्छायाएव सर्वकारणत्वम् इति भावः. **तदिच्छा...** इति. सृष्टीच्छाप्रयोजकत्वम् इति अर्थः. **एवं सति** इति. स्वक्रीडार्थमेव जगन्निर्माणम् इति एवंरूपे अर्थे सिद्धे सति. जगत्कारणेच्छारूप-**वस्तुनियमाभावे** तन्निबन्धनं जगद्वैचित्र्यं न स्याद् तदभावे च क्रीडापि न स्यात् इति अर्थः. **तदर्थम्** इति. वैचित्र्यपूर्वकक्रीडार्थम्.

कालावच्छेदे सति तदा तां तां लीलां करोति करिष्यति अकरोद् इति अन्यज्ञापनार्थं च तदवच्छेदिकां सूर्यादिगतिं विधाय तथा करोति इति श्रुत्यर्थापत्त्या अवसीयते. एवं सति यदा यथा येन यत्र यद् भवति, नश्यति, न भवति वा, तदा तथा तेन तत्र तद् भवतु, नश्यतु, मा भूद् इति सृष्टेः पूर्वमेव नियमः कृतः, इति न सर्वस्य अभावो युगपद्भावो वा प्राप्तावसरः. यतः साधनानां साध्यसाधनक्षमत्वं तत्तत्साध्यसाधकत्वनियमश्च तत्कृतएव, नतु स्वाभाविकः. अतएव कर्तृत्वमपि ईश्वराधीनमेव इति श्रुतिः आह ''एष उ एव साधु कर्म कारयति तं यम् एभ्यो लोकेभ्यः उन्निनीषति'' (कौषी.ब्रा.उप.३।८) इत्यादिना. व्यासोऽपि ''परात्तु तच्छ्रुतेः'' (ब्र.सू.२।३।४१) इत्यादिना इममेव अर्थं निर्णीतवान्. यथाच एतत् तथा विद्वन्मण्डने प्रपञ्चितम् अस्माभिः.

ननु न इदं मदुक्ते बाधकम्, ईदृशस्यैव साधनत्वस्य कर्मस्वपि वक्तुं शक्यत्वाद् इति चेत्, स्याद् एतद् एवं यदि तन्निषेधो न

कालस्य अवच्छेदकत्वे सति, तदा-तदा तत्तत्कालावच्छेदेन अतीतानागतवर्तमानत्वादिज्ञापनाय तद्भेदकसूर्यादिगतिं कालपरिमित्यर्थं विधाय यथा इदानीम् अस्मदादीनां वर्तमानत्वादिना प्रतीतिः उत्पद्येत तथैव भगवान् करोति इति वैदिकवाक्यात् श्रुत्यर्थस्य इच्छाकारणत्वस्य अनुपपत्त्या **अवसीयते** निश्चीयते इति अर्थः. एवं सति **यत्र यदा यद् यथा प्रतीयते तत् तत्र तदा** तथैव इति **नियमः** सृष्ट्यारंभएव भगवता कृतः इति पूर्वोक्तसर्वाभावयुगपद्भावौ न प्रसज्येयाताम् इति अर्थः. इदानींतनानां कर्तृत्वम् अस्मदादीनामपि ईश्वराधीनमेव न स्वाधीनम् इति आह **यतः** इति. **साधनानां** धर्मादीनां स्वर्गादिफलसम्पादनसामर्थ्यं नियतफलसाधकत्वं च भगवदेककर्तृकमतः सर्वकर्तृत्वं तस्यैव इत्यत्र श्रुतिं प्रमाणयन्ति ''**एष उ वा**'' (कौषी.ब्रा.उप.३।८) इत्यादिना.

ननु मन्मतेऽपि ईश्वरप्रेरितानां कर्मणां साधनत्वे न किञ्चिद् बाधकम्

स्याद् इत्युक्तम्. श्रुतिश्च ''न अयम् आत्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन'' (कठोप.१।२।२२, मुण्ड.उप.३।२।३) इति इतरसाधननिषेधं कृत्वा ''यमेव एषः वृणुते तेन लभ्यः'' (कठोप.१।२।२२, मुण्ड.उप.३।२।३) इत्यादिना भगवदनुग्रहैकलभ्यत्वं भगवति आह. किञ्च, ''न कर्हिचिद् मत्पराः शान्तरूपे नंक्ष्यन्ति नो अनिमिषो लेढि हेतिः, येषाम् अहं प्रियः आत्मा सुतश्च सखा गुरुः सुहृदो दैवम् इष्टम्'' (भाग.पुरा.३।२५।३८) ''तान् न उपसीदत हरेः गदया अभिगुप्तान् न एषां वयं नच वयः प्रभवाम दण्डे'' (भाग.पुरा.६।३।२७) इत्यादिवाक्येषु भक्तानां कालानधीनत्वश्रवणादपि न कर्मसाध्यत्वं भक्तौ. कर्मणां तत्तत्कालएव विधानेन तदधीनत्वात्. कालसाध्यसाधनसाध्यफलस्यापि तत्परिच्छेद्यत्वनियमात् स्वर्गादेरिव ब्रह्मभावस्यापि कालसाध्यत्वात् तत्साध्यम् उक्तावपि तथात्वम्. अपरञ्च, ''यदा यम् अनुगृह्णाति भगवान् आत्मभावितः सः जहाति मतिं लोके वेदे च परिनिष्ठिताम्'' (भाग.पुरा.४।२९।४६) इति वाक्यात् तादृशानुग्रहएव भक्तिमार्गे लोकवेदातीतत्वज्ञानं विश्वासश्च इति, तद्रहितेषु तदधिकनिरूपणं व्यर्थमिति तद्वत्सु स्वज्ञानलेशमात्रम् एतेन प्रकाशितम् इति अलं विस्तरेण.

गोपीशपदसर्वस्वः पितृपादाब्जसेवकः।।
निर्णतवान् भक्तिहेतुं निगूढाशयविठ्ठलः ।। १ ।।

अस्ति, अतः तेषामपि कारणत्वम् अस्तु इत्यतः आह **स्याद्** एतद् एवम् इति. भवेद् एवं कर्मणां कारणत्वं यदि साक्षाद्वचनोत्थो **निषेधो** न उपलभ्येत. तस्मात् सिद्धं भगवदिच्छाधीनत्वम्. किञ्च कालाधीनसाधनस्य क्षयिष्णुत्वाद् भक्तेरपि तत्फलत्वोक्तौ स्वर्गादितत्फलवद् भक्तिमुक्त्यादीनामपि क्षयिष्णुत्वापत्तिः अतो न अधिकं वाच्यम् इति अर्थः.

तद्रहितेषु भक्तिविश्वासादिरहितेषु इति अर्थः. **तद्वत्सु** भक्तिमार्गे लोकवेदातीतत्वज्ञानविश्वासवत्सु इति अर्थः.

अहं कुरंगीदृग्भंगिसंगिनांगीकृतोऽस्मि यः ।
अन्यसम्बन्धगन्धोऽपि कन्धरामेव बाधते ।। २ ।।

।। इति श्रीमद्विट्ठलेश्वरदीक्षितविरचितो ।।
।। भक्तिहेतुनिर्णयः सम्पूर्णः ।।

भक्तिहेतुं विनिश्चित्य प्रवृत्तो भजनेतु यः ।
तन्मनस्तोषकारिण्यस्त्वियं कृतिरखण्डिता ।।
श्रीविट्ठलपदाम्भोजस्मृतिमात्रहृताशुभः ।
कृतवान् रघुनाथोऽहं भक्तिहेतुप्रकाशनम् ।।

।। इति श्रीश्रीमद्वल्लभनन्दनचरणैकशरणश्रीरघुनाथस्य कृतौ ।।
।। भक्तिहेतुविवृत्तिः समाप्ता ।।

◆

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमद्विठ्ठलेशप्रभुचरणप्रणीतो ॥

॥ भक्तिहंसः ॥

श्रीमद्रघुनाथप्रणीतया भक्तितरंगिण्या श्रीमत्पुरुषोत्तमप्रणीतेन तत्तीर्थेन स्वतन्त्रेण विवेकेन च संगतः

जयन्ति पितृपादाब्जरेणवो यत्प्रसादतः ॥
भक्तिः प्राप्ता तदन्याध्वमोहाभावश्च पण्डितैः ॥१॥

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

यदंघ्रिसंगिसंगेन निसंगाः संगिनोऽङ्गिनः ॥
भवन्ति भागिनो भक्तेः तमीशं विट्ठलं नुमः ॥१॥
भक्तिभागीरथीतीरि हंसाः कंसारिसारिणः ॥
रुवन्ति रुचिरारावा यद्भुतं तदुदीर्यते ॥२॥

अथ कर्मज्ञानोपासनामात्रपराणां तत्तन्मतानुसारिभक्तिपदार्थवादिनां याथार्थ्यम् अविदुषां मतं निरसिसिषवो भक्तिमतसिद्धं तत्पदार्थं निरूपयन्तः प्रयोजनभेदेन मंगलद्वयम् आचरन्ति **जयन्ति** इति. ते **पितृपादाब्जरेणवो**

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

श्रीविट्ठलेश्वरं नत्वा रघुनाथं दयापरम् ॥
तीर्थं भक्तितरंगिण्याः करोति पुरुषोत्तमः ॥१॥

ग्रन्थप्रयोजनं वदन्तो मंगलम् अवतारयन्ति **अथ** इति. **प्रयोजनभेदेन** इति. भक्तिप्राप्तिः प्रथमस्य प्रयोजनम्. तत्र हेतुः श्रीमदाचार्यचरणानां प्रसादः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

प्रणम्य श्रीविट्ठलेशचरणाब्जरजांस्यहम् ॥
विवेकं भक्तिहंसीयं दर्शये तत्कृपाबलात् ॥१॥

अथ गीतायां **''पुरुषः सः परः पार्थ! भक्त्या लभ्यस्तु अनन्यया''** (भग.गीता ८।२२) इति वाक्ये पुरुषोत्तमस्य अनन्यभक्तिलभ्यत्वकथनात् तदिच्छूनां भक्तिपदार्थज्ञानस्य आवश्यकत्वेन लोकप्रसिद्धेभ्यः आराध्यत्वज्ञानोपा-

मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिविधिभिः यः।।
अस्पृष्टो रमते निजभक्तेषु सः मेऽस्तु सर्वस्वम्॥२॥

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

जयन्ति. येषां प्रसादतः **पण्डितैः** सदसद्विवेकचतुरैः भक्तिः प्राप्ता ज्ञाता च. किञ्च, ततो भक्तिमार्गाद् अन्ये ये अध्वानः प्राप्त्युपायाः [1]शुष्ककर्मज्ञानादयः तेषु यो मोहो वैचित्यम् इदं सम्यग् इदं वा इति एवंविधं तदभावः तद्विषयकभ्रान्त्यभावः. **च** शब्देन प्राप्तिः **समुच्चिता**॥१॥

मन्त्रोपासन...इति. कर्मकाण्डान्तःपाति [2]कामोपाधिकस्य गायत्र्यादेः

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति भक्तीच्छुभिः तत्र परमभक्तिः तदुक्तिषु विश्वासश्च कर्तव्यः इति तेन सूचितम्. मंगलन्तु वस्तुनिर्देशरूपम्. भगवति सर्वस्वत्वबुद्धिः द्वितीयस्य. अत्रापि आशीर्मुखेन तादृशी बुद्धिः कार्या इति सूच्यते. **कर्मज्ञानादयः** इत्यादिपदेन उपासनायोगसांख्यसंग्रहः.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

सनाश्रवणादिभ्यो भिन्नं भक्तिपदार्थं भक्तिहंसग्रन्थेन निर्णिनीषन्तो विवक्षितभक्तेः इदानीं श्रीमदाचार्यप्रसादादेव प्राप्तिः इति ज्ञापयितुं तादृशमेव मंगलम् आचरन्ति **जयन्ति** इति. **तदन्याध्वमोहाभावः** इति. तस्याः भक्तेः सकाशाद् **अन्ये ये अध्वानः** कर्मज्ञानोपासनाद्याः तेषु यो मोहः स्वेष्टसाधनत्वबुद्धिदार्ढ्यं तदभावः. [3]एतेन भक्तेः अनन्यत्वं विवृत्तम्. इतरसाधननिष्ठाराहित्यपूर्वकत्वं तद् इति. अथवा प्रसादः पाण्डित्येऽपि हेतुः. तेन पूर्वं विचारसामर्थ्यं प्राप्य ततो भक्ताः जाताः इति अर्थः. एतेन भगवद्भक्तीच्छुभिः तत्र भक्तिपूर्वकं तदुक्तिषु विश्वसनीयम् इति प्राथमिकी कक्षा सूचिता. **मंगलन्तु** अत्र वस्तुनिर्देशरूपम्॥१॥

अग्रिमां कक्षाम् उपदेष्टुं प्रस्तुतं वादम् उपक्षिपन्तो मंगलान्तरम् आहुः **मन्त्र**...इति. मन्त्रोपासनं गायत्र्यादेः यस्य कस्यचिद् मन्त्रस्य पुरश्चरणपूर्वकं

---

[1] तीर्थे गृहीतप्रतीकानुरोधाद् इह शुष्कपदं न अस्ति इति तन्मतं प्रतिभाति. [2] कामौपाधिकस्य इति ख.ग. [3] एतेन भक्तितुल्यत्वं निवृत्तम्. इतरसाधननिष्ठाराहित्यपूर्वकं तदिति इति ख.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

यस्य कस्यचिद् मन्त्रस्य पुरश्चरणपूर्वकं साधनम् उपासनम् इति उच्यते. **वैदिकी** दीक्षा सौमिकी. **तान्त्रिकी** पञ्चरात्राद्यागमोक्ता:. **अर्चनं** द्रव्यादिना अन्यद्वारा कारणम्. एतै: विधिभि: **अस्पृष्टो** अनधीनो भक्तिमात्राधीन: सन् निजभक्तेषु यो रतिं मन्यते सर्वस्वास्पदीभूत: सएव अस्तु इति अर्थ:॥२॥

ननु किम् अनेन अपूर्वग्रन्थपरिश्रमेण; यत: स्वस्वमते तत्तत्पदार्थानां

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

''यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्, स: वै दुर्ब्राह्मणो ज्ञेयम्'' (कूर्मपुरा.२।२१।२७) इति **''अदीक्षितस्य वामोरु कृतं सर्वम् अनर्थकम्''** (नार.पुरा.उ.भाग.२२।६०) **''दीक्षाहीनो नरो मृत:''(दीक्षया रहितो नर: इति नार.पुराणे.२२।६०)** इत्यादिवाक्येषु दीक्षाभावे निन्दास्मरणात् तस्या: पृथङ्निर्देशे इति आशयेन आहु: वैदिकी इत्यादि. मूले **अर्चनादि**...इत्यादि पदेन जप: संगृह्यते. ''[1]**परिहाप्यापि वेदांस्त्रीन् कर्माणि विहितानि च. गायत्रीमात्रम् आश्रित्य द्विजो भवति निर्भय:''** (वै.गृ.सू.१।२६६) इत्यादौ जपादपि भयाभावोक्ते: तस्याअपि उक्ततुल्यकक्षत्वात्॥२॥

निर्णीतत्वेन इति. परमफलसाधनतया निर्णीतत्वेन इति अर्थ:

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

साधनम्. **वैदिकी** दीक्षा सौमिकी. नारायणाष्टाक्षरादिदीक्षा वा. तान्त्रिकी पञ्चरात्राद्यागमोक्ता:. अर्चनं स्वयम् अन्यद्वारा वा प्रतिमादिपूजनम्. आदिपदेन दानादीनि अन्यानि. तेषां विधिभि: [2]चोदनाभि: अस्पृष्ट: [3]फलत्वविधेयत्वोद्देश्यत्वै: असंबध्यमानत्वात् [4]तदनधीन:. निजभक्तेषु स्वीयत्वेन अंगीकृतेषु भक्तेषु **रमते** तदधीन: सन् क्रीडति. स: मे सर्वस्वम् अस्तु [5]आत्मात्मीयज्ञातिधनरूपो अस्तु इति अर्थ:. भगवति सर्वस्वत्वबुद्धि: द्वितीयाकक्षा. सा आशीर्मुखेन सूच्यते॥२॥

अत्र भगवति मन्त्रोपासनाद्यसम्बन्धम् असहमान: चोदयति—

(पा.भे.)[1]. परिहाप्याऽपीति क.परिहायेति स्यात्. [2]. शास्त्रादिभि: इति ख. [3].कर्मत्वेति ख. [4].अस्पृष्ट: इति ख. [5].सकलपदार्थविषयोरूपो अस्तितु इति अर्थ: इति ख.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

निर्णीतत्वेन सन्देहाभावाद् अप्रसिद्धसाधने अप्रामाण्याद् अनारम्भएव श्रेयान् इति चेत्, सत्यम्. भवेदेव त्वदुक्तं यदि सन्देहाभावपूर्वकं निर्णयः स्यात्, तदेव न उपलभामहे. तथाहि “**श्रोतव्यो मन्तव्यो...**” (बृह.उप.२।४।५) इत्याादिवाक्यैः श्रवणादीनां विधेयत्वं श्रूयते, यागादिवत्. “**श्रवणं कीर्तनं विष्णोः**” (भाग.पुरा.७।५।२३) इत्यादिषु भक्तिरूपत्वञ्च. तथाच भवत्यत्र सन्देहः, किम् इदं श्रवणं द्विरूपम् एकरूपम् अनुभयरूपं वा इति. द्विरूपत्वे अप्रार्थितफलप्राप्तिः अधिकारविरोधश्च. एकरूपत्वे उभयत्र विधानवैयर्थ्यात्. तृतीयस्य अशक्यवचनत्वात्. केचन् ज्ञानरूपत्वं तच्छेषत्वं च भक्तेः निरूपयन्ति. केचन् शुद्धस्नेहरूपत्वं स्वतन्त्रफलत्वम् इति अनेकप्रकारकसन्देहप्राप्तेः तत्परिहाराय युक्तएव अयम् आरम्भः इति अभिसन्धाय साक्षेपं विचारम्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

अप्रसिद्धसाधने इति. अप्रसिद्धस्य तत्तद्विध्यस्पर्शस्य साधने इति अर्थः. **भक्तिरूपत्वञ्च** इति चकाराद् अविहितत्वम्. “**इति पुंसा अर्पिता विष्णौ भक्तिः चेद् नवलक्षणा क्रियते भगवति अद्धा तन्मन्ये अधीतम् उत्तमम्**” (भाग.पुरा.७।५।२४) इति वाक्ये सिद्धार्थानुवादेन विध्यभावात्. **तथाच** इति विधानाविधानाभ्याम् इदम् इति भक्तिरूपम्. नच श्रुतौ ‘आत्म’पदाद् अत्रच विष्णुपदाद् विषयभेदेन श्रवणभेदात् सन्देहानुदयः शंक्यः, ‘आत्म’पदस्य विष्णौ विशिष्यशक्तेः. “**दत्तं दुर्वाससं सोमम् आत्मेशब्रह्मसम्भवान्**” (भाग.पुरा.४।१।१५) इति ज्ञापकात्. “**सर्वे वेदाः यत्पदम् आमनन्ति**” (कठोप.१।२।१५) “**वेदैश्च सर्वैः अहमेव वेद्यः**” (भग.गीता १५।१५), “**सर्वत्र प्रसिद्धोपदेशात्**” (ब्र.सू.१।२।१) “**सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषाद्**” (ब्र.सू.३।३।१) इति श्रुतिस्मृतिन्यायैः विषयभेदनिरासात्. नच प्रमाणभेदाद् भेदः, अप्रयोजकत्वात्. उक्तवाक्येषु सर्वपदोक्तेः. नच क्रमभेदाद् भेदः शंक्यो, मननादेः इतरोपलक्षकत्वस्यापि शक्यवचनत्वात्. स्वाध्यायादीनामपि श्रुतौ दर्शनात्. पुराणस्य उपबृंहणत्वेन नानाशाखोक्तसाधनसंग्राहकत्वे बाधकाभावाच्च इति. श्रवणादीनां लक्षणम् अग्रे वाच्यम्. **अशक्यवचनत्वाद्**

ननु किम् इदम् अपूर्वतरमिव उच्यते, सत्यम्. [1]अपूर्वतरमपि श्वभ्रकूपपतितभेकसदृशां त्वादृशां, नतु विदुषाम्. पूर्वमेव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

आरभन्ते — **ननु** इति. इदम् इत्यनेन विध्यस्पर्शो भक्त्यधीनत्वं यद् उक्तमिव इत्यनेन वास्तवाज्ञानं सूचितम्. तदनुपदं स्वयमेव वक्ष्यन्ति. भूच्छिद्रायितात्पकूपस्थमण्डूकतुल्यानाम् अनेकप्रमाणसिद्धत्वं दर्शयन्ति. **तथाहि** इत्यादिना. "**ऋतञ्च स्वाध्यायप्रवचने च**" (तैत्ति.उप.१।९) इति अनुवाकोक्तमुख्यतपस्तु अस्य स्वाध्यायप्रवचनयोरेव **प्रसिद्धेः** आदौ तन्निषेधपूर्वकमेव साधनलभ्यत्वं निषिध्यते.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति. "**परस्परविरोधे हि न प्रकारान्तरस्थितिः**" (न्या.कुसु.३।८) इति न्यायात् **तथा** इति अर्थः. एवं भक्तेः धर्मविषयकः सन्देहो दर्शितः. स्वरूपविषयकं फलविषयकं च दर्शयितुं मतानि आहुः — **केचन** इति. उपासनाभक्तिवादिनः **केचन** इति. शुद्धभक्ताः श्रुतौ प्रथमतः प्रवचननिर्देशस्य हेतुं प्रकाशयन्ति **ऋतम्** इत्यादि. अस्मिन् अनुवाके एतयोरेव अभ्यासाद् उपसंहारे "**तद्धि तपः तद्धि तपः**" (तैत्ति.उप.१।९) इति कथनाद् हि यस्माद् हेतोः तत् ते स्वाध्यायप्रवचने तपः तस्मात् तएव अनुष्ठेये इति

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

ननु इत्यादि. **इदं** विध्यसम्बद्धत्वकथनम् [1]अपूर्वतरं, मन्त्रशास्त्रे उपासनप्राप्यत्वकथनात्. भगवान् मन्त्रोपासनादिविधिसम्बद्धः, तद्विहितक्रियाफलत्वात्. यद्यद्विहितक्रियाफलं तत्तद्विधिसम्बद्धम्. "**अग्निहोत्रं जुहुयात् स्वर्गकामः**" (मैत्रा.उप.६।३६) इत्यादिविहितक्रियाफलभूतस्वर्गादिवद् इत्याद्यनुमानाच्च[2] सम्बन्धसिद्धेः अप्रामाणिकमिव इत्यनेन सिद्धान्तिनः आग्रहवादित्वम् अज्ञानञ्च सूचयति. तत्र सिद्धान्तं वदिष्यन्तः तदुक्तम् उपगम्य [3]तमेव तादृशम् आहुः **सत्यम्** इत्यादि. श्वभ्रं छिद्रम्. तथाच भूच्छिद्रायिताल्पकूपपतितमण्डूकतुल्यानाम् अल्पज्ञानेन कर्णकटुः जल्पतां त्वादृशां तथैव नतु बहुज्ञानाम् इति अर्थः. एवं प्रतिवादिनम् आक्षिप्य प्रतिज्ञातस्य

---

१. अपूर्वतरतममपीति क्वचित् पाठः. २. इत्याद्यनुमानात् असम्बद्धसिद्धेः अप्रामाणिकत्वम् इति ख. ३. तमेव वादिनम् इति क.

अनेकप्रमाणसिद्धत्वात्. तथाहि : ''न अयम् आत्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेव एषः वृणुते तेन लभ्यः'' (मुण्ड.उप. ३।२।३) इति श्रुतौ 'यमेव' इति सामान्योक्त्या अग्रिमेण च भगवदंगीकारमात्रैकलभ्यत्वोक्त्या 'प्रवचना'दिपदानि आत्मीयत्वेन भगवदंगीकारातिरिक्तयावत्साधनोपलक्षकाणि इति ज्ञायते. तेन जीवकृतिसाध्यसाधनैः अप्राप्यत्वम्

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

'प्रवचनम्' अध्यापनम्. 'मेधया' धारणशक्त्या, ग्रन्थस्फूर्तिबलेन न बहुपाठेन. 'वृञ्' वरणे इति धातो रूपम्. 'वृणुते' स्वीकरोति. 'यम्' कञ्चित्. अग्रिमेण तेन लभ्यः इति वचनेन. प्रवचनादिपदानि ''**प्राणभृतः उपदधाति**'' (शतपथब्रा.८।१।१।१) इतिवत् सर्वसाधनोपलक्षणतया उक्तानि. **तेन** इति.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

व्याख्यानाद् मुख्यतपस्तु अस्य तयोरेव प्रसिद्धेः इति अर्थः. **प्राणभृतः उपदधाति इतिवद्** इति. यथा ''**अयं वै पुरो भुवः... तस्य प्राणो भौवायनः**'' (शतपथब्रा.८।१।१।४-५) इति एकमन्त्रगतप्राणशब्दभृत्त्वरूपलिंगसादृश्येन तत्सहपठिताः मन्त्राः [१]प्राणभृत्त्वेन उपलक्ष्यन्ते इति [२]तन्मन्त्रेण उपधेया इष्टकापि ''**तद्वान् आसाम् उपधानो मन्त्रः**'' (पा.सू.४।४।१२५) इति सूत्रेण प्राणभृत्त्वेन बोधिताः तथा अत्र [३]प्रवचनादिपदैरपि जीवकृतिसाध्यत्वरूपलिंगकानि ऋतादीनि अन्यानि च साधनानि उपलक्ष्यन्ते इति तथा इति अर्थः. अत्र यत् फलितं तद् आहुः मूले. **तेन** इत्यादिना.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

प्रमाणसिद्धत्वम् उपपादयितुं तानि उपन्यस्य व्याचक्षते **तथाहि** इत्यादिना. **न अयम्** इत्यादि. इयं श्रुतिः कठवल्यां श्वेताश्वेतरोपनिषदि च वर्तते. उभयत्रापि ब्रह्मैव उपक्रान्तम् इति 'अयम्' इत्यनेन परमएव [४]आत्मा उच्यते. 'प्रवचन'पदं वेदे रूढम्. तदत्र वाच्यतासम्बन्धेन तदुक्तसाधनानि लक्षयति. 'मेधा' धारणावती बुद्धिः. साच पुरुषनिष्ठस्वाभाविकसाधनानि. श्रुतञ्च आगन्तुकानि. तदेतद् अभिसन्धाय आहुः **प्रवचनादि** इत्यादि.

---

१. प्राणेन उपलक्ष्यन्ते इति क. २. तन्मन्त्रेण उपध्येयाः इति क. ३. प्रवचनानि अन्यानि च साधनानि उपलक्ष्यन्ते इति तथा इति अर्थः इति क. ४. आत्मा इति उच्यते इति ख.

उक्तम् भवति. पूर्वं जीवगतोत्कर्षोऽपि अप्रयोजकः इत्यपि. वरणोक्त्या यथा कन्या स्वाभिमतमेव स्वपतित्वेन वृणुते वरो वा तादृशीमेव कन्यां स्वस्त्रीत्वेन तथा भगवान् स्वदासत्वेन आत्मीयत्वेन अंगीकरोति इति उच्यते. तथाच यथा तदनन्तरं न अन्यत्र विनियोगः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

भगवत्कृतिसाध्यानुग्रहसाध्यत्त्वम् इति शेषः. यद्यपि अनुग्रहो ज्ञातुम् अशक्यः तथापि महापुरुषानुग्रहानुमेयो अस्तीति ज्ञायते. पूर्वं महदनुग्रहात्. उत्कर्षो महाकुलीनत्वादिः. वरणोक्तेः तात्पर्यं वर्णयन्ति यथा इति. तदनन्तरं वरणानन्तरम्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

तेन इति. प्रवचनादिपदानां जीवकृतयावत्साधनोपलक्षकत्वेन इति अर्थः. एवं फलितार्थकथनेन यत् सिद्ध्यति तद् आहुः तेन इति. तथाच फलितकथने अग्रिमग्रन्थविचारेण एतावान् विशेषो बोध्यः इति अर्थः. ननु भगवदिच्छायाइव भगवदनुग्रहस्य सर्वदा ज्ञातुम् अशक्यत्वाद् मूले पूर्वपदेन उत्तरावधिः को अभिप्रेयते? तं वक्तुम् आहुः **यद्यपि** इत्यादि. **इति ज्ञायते** इति. तथाच अयं भगवदनुगृहीतः महापुरुषानुगृहीतत्वात्. प्रचेतोनलकूबरादिवद् इति कार्यलिंगकानुमानेन ज्ञायते इति अर्थः. **पूर्वम्** इत्यादि. तथाच महदनुग्रहरूपं

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

आत्मीयत्वं जीवसम्बन्धित्वम्. तस्य विषयितासम्बन्धेन अंगीकारेऽपि सत्त्वात् तद्वारणाय अंगीकारातिरिक्तेति. **उपलक्षकाणि** इति. उपलक्षकं नाम विशेष्यतानवच्छेदकत्वे सति व्यावर्तकम्. यथा "[१]**जटाभिः तापसः**" इति लोके जटा तापसत्वोपलक्षिका. वेदे च "**प्राणभृतः उपदधाति**" (शतपथब्रा.८।१।१।१) इत्यत्र **तथा** "[२]**अयं वै पुरो भुवः...तस्य प्राणो भौवायनः**" (शतपथब्रा.८।१।१।४-५) इति उपधानकरणभूतैकमन्त्रगत-[३]प्राणशब्दभृत्त्वरूपलिंगसादृश्येन तत्सहपठिताः मन्त्राः प्राणभृत्त्वेन उपलक्ष्यन्ते इति प्राणभृत्त्वं तत्सहपठितमन्त्रोपलक्षकम्. तथा अत्र विशेष्यतानवच्छेदकत्वे सति व्यावर्तकेन आत्मीयत्वेन प्रवचनादिपदैः जीवनिष्ठानि [४]त्रिविधानि

---

[१]. जटा तापसत्वोपलक्षिका इति क.[२]. अयं पुरो भुवः इति क. [३]. प्राणशब्दभृत्त्वलिंगरूपलिंग इति ग. [४]. विविधानि इति ख.

तस्या: तथा एतस्यापि इति ज्ञापितं भवति. पूर्वं केनापि ज्ञातुम् अशक्यम् इत्यपि. एवं सति विहितक्रियाफलत्वेन स्वर्गादिवद् भगवति पूर्वोक्तविधिसम्बन्धस्तु न शक्यवचन:, स्वकृत्यसाध्यत्वाद् यागादिवदपि-

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इति अर्थ:. **तथा एतस्य** इति. तस्य भगवतोऽपि अन्यत्र विनियोजकत्वाभाव: इति अर्थ:. यथा लौकिकपति: स्वभार्याम् अन्यासक्तिराहित्यपूर्वकं स्वासक्तामेव करोति तथा अत्रापि इति भाव:. **पूर्वम्** इति. फलानुमेयमेव इति भाव:. **एवम्** इति. यथा स्नानदानादिविहितक्रियाकर्तु: स्वर्गादिकं फलं स्वसम्बद्धम् उत्पद्यते, न तथा भगवान् कस्यचित् कर्मण: फलीभूत: तत्सम्बद्धो भवति इति अर्थ:. **स्वकृति**...इति. स्वरूपस्य सर्वदा सिद्धत्वाद् न यागादिवत्-

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

कार्यमेव उत्तरावधि: इति अर्थ:. दृष्टान्ते वृताया: उक्तत्वाद् दार्ष्टान्तिके यद्यपि जीवो वाच्यो वृतत्वेन तथापि वरणस्य भगवदधीनत्वात् फलितं पदार्थं निष्कृष्य तदर्थम् आहु: **एतस्य** इत्यादि **फलानुमेयम्** इति. महापुरुषानुग्रहभगवदेकतानतादिरूपफलानुमेयम् इति अर्थ:. **एवम् इति** इति. उक्तश्रुतौ उपलक्षणविधया जीवकृतसर्वसाधनप्राप्यतानिषेध: इति अर्थ:. **स्वसम्बद्धम्** इति. विधिसम्बद्धम् इति अर्थ:. **आत्मा** इति. सिद्धनिर्देशविचारेण आहु: **स्वकृति**...इति. **तदाधार:** इत्यादि. तदाधार: कृत्याधार:. **तथाच**

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

साधनानि उपलक्ष्यन्ते इति तानि तथा इति अर्थ:. **इत:** आरभ्य इति उच्यते इत्यन्तेन पदानाम् अर्थो विचारित:. वाक्यार्थम् आहु: **तथाच** इत्यादि. फलितार्थम् आहु: **एवं** [१]**सति** इत्यादिना. **एवं सति** इति. पदार्थे वाक्यार्थे च विचारिते सति **न शक्यवचन:** इति. पूर्वार्धविचारात् तथा इति अर्थ:. एतेन श्रुतिविरोधाद् मन्त्रशास्त्ररूपस्मृतीनां [२]तन्मूलकानुमानस्य च अप्रामाण्यं सूचितम्. भगवान् मन्त्रोपासनादिविध्यसम्बद्ध: वर्णातिरिक्तसाधनाप्राप्यत्वेन [३]श्रावितत्वाद् इति प्रत्यनुमानेन पूर्वोक्तस्य हेत्वाभासत्वं च सूचितम्. आत्मपदार्थविचारेण आहु: **स्वकृति**...इत्यादि. ननु अस्तु फलत्वेन [४]विधेयत्वेन

---

[१] एवं सति इत्यादि इति क. [२] तन्मूलकाप्रामाण्यम् इति ख. [३] श्रुतत्वाद् इति अनुमानेन पूर्वोक्तस्य हेतुत्वाव्याप्यत्वं सूचितम् इति ख. श्रुतत्वाद् इति प्रत्यनुमानेन इत्यादि ग. [४] कर्मत्वेन इति ख.

न तथा. अतः परम् इन्द्रादिवत् तदुद्देश्यत्वेन तत्सम्बन्धो अवशिष्यते. तत्रापि वदामः. "सर्वस्य वशी सर्वस्य इशानः" (बृह.उप.४।४।२) इत्यादिश्रुतिभ्यो "देवो असुरो मनुष्यो वा यक्षो गन्धर्वएव वा भजन्

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

-कृतिनिष्पाद्यत्वं तदाधारोत्पाद्य[1]विकार्यसंस्कार्यत्वलक्षणं फलकर्मत्वं वा [2]वक्तुं शक्यम् इति अर्थः. **अतः परम्** इति. पक्षद्वयनिरासानन्तरम् इति अर्थः. **तदुद्देशेन** कर्माचरणलक्षणः इति अर्थः. **तत्रापि** इति. यादृशे सम्बन्धः उच्यमाने न दोषः तादृशं **वदामः** इति अर्थः. सर्वोपास्यत्वलक्षण-

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

"घटं करोति" "ग्रामं गच्छति" "व्रीहीन् वहति" "व्रीहीन् प्रोक्षति" [3]इत्यादिवद् न कृतिफलत्वं फलशालित्वं वा वक्तुं शक्यम् इति भावः. श्रुतौ उद्देश्यतायाः अनिषेधाद् मन्त्रप्रकाश्यत्वतदधिष्ठातृत्वाभ्यां पूज्यत्वादिना च यः तत्तद्विधिसम्बन्धो मूले अवशिष्टत्वेन उक्तः तत्स्वरूपम् आहुः **तदुद्देशेन** इत्यादि. **तत्रापि** इति. श्रवणादिरूपम् इत्यन्तस्य ग्राहकम् इदं प्रतीकम्. **वदामः** इति एवम् उक्तौ बीजम् आहुः **सर्वोपास्य** इत्यादि. "**सर्वे वेदाः यत् पदम् आमनन्ति**" (कठोप.१।२।१५) "**वेदैश्च सर्वैः**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

च असम्बन्धः परन्तु उक्तश्रुतौ उद्देश्यतानिषेधकस्य अभावाद् मन्त्रप्रकाश्यत्वतदधिष्ठातृत्वाभ्याम् उद्देश्यतया सम्बन्धः केन वार्यः. तथाच मन्त्रोपासनादिविधिसम्बद्धः तच्छास्त्रविहितक्रियोद्देश्यत्वात्. तदुद्देश्यः तच्छास्त्रप्रतिपाद्यत्वात्. तत्प्रतिपाद्यः तत्प्रधानमन्त्रप्रकाश्यत्वाद् अधिष्ठातृत्वात् च. शैवशास्त्रप्रतिपाद्यशिववद् इति अनुमानमपि तत्र प्रमाणम् इति शंकायां तत्र कश्चिद् विशेषं वक्तुम् पूर्वं तदुक्तम् अभ्युपगच्छन्ति **अतः परम्** इत्यादि. तर्हि कथम् अस्पर्शः इति आकांक्षायाम् आहुः **तत्रापि वदामः** इति उद्देश्यत्वेऽपि त्वद्विचारितवैलक्षण्यं वदामः. तथाच त्वद्विचारितरूपेण अस्पर्शः सुस्थः इति अर्थः. तम् उपपादयन्ति **सर्वस्य** इत्यादि. उक्तश्रुतौ 'सर्व'पदाद्

---

[1] प्यविकार्यसंस्कार्यत्वलक्षणकर्मत्वं वा इति क. ख. ग.[2] न वक्तुम् इति घ.

[3] इत्यादिवत् कृतिफलत्वं फलशालित्वं वा वक्तुं शक्यम् इत्यादि क. इत्यादिवद् न इति फलत्वं फलशालित्वं वा न वक्तुम् शक्यम् इत्यादि ख. प्रतिभातन्तु निवेशितम्.

मुकुन्दचरणं स्वस्तिमान् स्याद् यथा वयम्'' (भाग.पुरा.७।७।५०) ''को नु राजन्! इन्द्रियवान् मुकुन्दचरणाम्बुजं, न भजेत् सर्वतोमृत्युः उपास्यम् अमरोत्तमैः'' (भाग.पुरा.११।२।२) ''मां हि पार्थ! व्यपाश्रित्य येऽपि स्युः पापयोनयः, स्त्रियो वैश्याः तथा शूद्राः तेऽपि यान्ति परां गतिम्'' (भग.गीता ९।३२) इत्यादिस्मृतिभ्यश्च जीवमात्रस्य भगवान् पतिः इति स्त्रियाः स्वपतिभजनवद् जीवमात्रस्य भगवद्भजनम् इष्टम् इष्टसाधनञ्च इति अंगीकार्यं सर्वथा. तच्च श्रवणादिरूपम्. एवं सति भगवानिव तद् नामादिकमपि सर्वान् प्रति अविशिष्टम् इति मन्तव्यम्. मन्त्रशास्त्रेतु निगद्यते ''राममन्त्रः तदधिष्ठातृभजनं च

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

सम्बन्धस्तु सर्वैरपि अंगीकार्यः. [1]सच्च **''सर्वस्य वशी सर्वस्य ईशानः''** (बृह.उप.४।४।२२) इत्याद्युदाहृतश्रुत्यर्थपर्यालोचने अनुग्रहएव पर्यवस्यति. न तेन अस्मदनिष्टं किञ्चिद् इति भावः. **इष्टम्** इति स्वतः पुरुषार्थत्वोक्त्यभिप्रायेण उक्तम्. एवं सति इति. उदाहृतप्रमाणनिचयेन सर्वोपास्यत्वेन अविशिष्टस्य

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

अहमेव वेद्यः'' (भग.गीता १५।१५) **''सर्वत्र प्रसिद्धोपदेशात्''** (ब्र.सू.१।२।१) **''सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्''** (ब्र.सू. ३।३।१) इत्यादिश्रुतिस्मृतिन्यायसिद्धत्वात् सर्वैः अंगीकार्यः. परन्तु तदुपास्यत्वं केन रूपेण इति आकांक्षायां सः सम्बन्धः उक्तश्रुतिविचारे सर्वेश्वरत्वेन सर्वाविशिष्टत्वेन रूपेण इति भानम् अनुगृहीतानामेव भवतीति अनुग्रहएव पर्यवस्यति. तथाच

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

जीवमात्रस्य भगवान् पतिः. स्मृतिषु देवादिपदैः **'इन्द्रियवत्'**पदेन येऽपि इत्यादिपदैश्च जीवमात्रस्य भगवद्भजनम् इष्टम्. **स्वस्तिमान् स्याद्** इत्यादिपदैश्च इष्टसाधनम् इति अंगीकार्यम् इति अर्थः. **तच्च** इत्यादि. उक्तवाक्योक्तं भजनं च श्रवणादिरूपं, नतु मन्त्रोपासनादिरूपम् इति अर्थः. तेन सिद्धम् आहुः **एवं सति** इत्यादिना. **एवं सति** इति. उक्तश्रुतिस्मृतिभिः [2]सर्वाधिकारकत्वे

---

[1] सतु इति ग. इतः प्राक् ''तत्र श्रवणादिरूपं भजनम् इति अर्थः'' इति अयम् अंशो अधिको दृश्यते तत्रैव.

कस्यचिद् मित्रं, कस्यचिद् अरिः, कस्यचित् सिद्धं, कस्यचित् साध्यम्'' इत्यादि. एवमेव गोपालादिमन्त्राः तदधिष्ठातृभजनानि च इति. एवं सति तदधिष्ठातृरूपस्य पुरुषोत्तमत्वे पूर्वोक्तश्रुतिस्मृतिन्यायेन सर्वान् प्रति भजनीयत्वेन अवशिष्टं स्याद् नतु तथा इति अन्यथानुपपत्त्यैव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

उपासनासाधनानामपि अविशिष्टत्वम् उचितम्. तथा सति रामगोपालादीनां

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

अनुगृहीतैः स्वस्वानुग्रहानुरूपप्रनाड्या [1]मन्त्रादिभिः उपास्यः इति वक्तव्यम्. तत्तु अस्माकमपि इष्टमेव. अतः तद्व्यतिरिक्तरूपेण उद्देश्यत्वनिवारणम् उपपादयामः इति अर्थः. अत्र मूले श्रुत्या सर्वेश्वरत्वम् उक्तम्. प्राथमिकस्मृत्या सर्वपदार्थैकदेशभूतान् देवादीन् संगृह्य भगवद्भजनस्य तदिष्टसाधकत्वम् उक्तम्. द्वितीयया अनिष्टनिवारकत्वम्. तृतीयया आश्रयस्य तथात्वम् उक्तम्. तदर्थो जीवमात्रेत्यादिना संगृहीतः. तच्च इत्यादिना भजनस्वरूपम् उक्तम्. एतेषु नवसु स्मरणं ''**मय्यावेश्य मनो ये माम्**'' (भग.गीता१२।२) इति उक्तोपासनस्य संग्राहकम्. दास्यम् आश्रयस्य उपलक्षकं ज्ञेयम्. **एवं सति** इति प्रतीकं धृत्वा [2]फक्किकार्थम् आहुः **उदाहृत** इत्यादि **उचितम्** इत्यन्तम्. तथाच **एवं सति** इत्यस्य सर्वान् प्रति अविशिष्टत्वे सति इति अर्थः. अस्त्वेवं सर्वविशिष्टत्वं भगवत्तद्भजनयोः. तावता मन्त्रोपासनादिविध्युद्देश्यत्वं केन रूपेण वारितं भवति इति आकांक्षायां तद् रूपं मूले आहुः **मन्त्रशास्त्रे** इत्यादिना. **एवं सति** इति. मन्त्रादेः भजनोपकरणत्वे सति. **अवशिष्टम्**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

सिद्धे सति. अस्तु अवशिष्टम्. तावता कथं वादिविचारितोद्देश्यत्वनिवृत्तिः इति आकांक्षायां वैधर्म्याद् निवृत्तिं वक्तुं वैधर्म्यम् आहुः **मन्त्र...**इत्यादि. **च इति** इति. निगद्यते इति पूर्वेण अन्वयः. निवृत्तिं व्युत्पादयन्ति—**एवं सति** इत्यादिना. **एवं सति** इति. त्वद् विचारितरीत्योद्देश्यत्वे सति. **अविशिष्टं**

---

१. प्रणाममन्त्रादिभिः इति क. २. अधिकार्थम् आहुः इति क. ३. सर्वाधिकारित्वे इति ख.

तत्पुरुषोत्तमस्य विभूतिरूपं भिन्नमेव इति मन्तव्यम्. ननु विहितप्रकारेण

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

मन्त्राधीनपुरुषोत्तमत्वे सिद्धसाध्यत्वाद्यंगीकार्यं फलप्राप्तितदभावान्यथानुपपत्त्या. एवं सति सर्वोपास्यत्वहानिः. तथा सति शास्त्रप्रामाण्यानुरोधेनापि विभूतिरूपोपासनमेव कल्प्यम्. तादृशस्य [1]विशिष्टत्वेऽपि सामञ्जस्यमेव इति अर्थः. यत्र फलतदभावौ सिद्धादिनिबन्धनौ प्रतीयेते तत्र विध्युक्तभजनाभावहेतुकौ

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति मन्त्राधिष्ठातृरूपम् इति शेषः. एवं ग्रन्थं मनसि कृत्वा टीकायाम् आहुः **तथा सति** इत्यादि. तथा सति मन्त्राधिष्ठातृत्वे सति. **एवं सति** इति. सिद्धादिभावे सति. **तथा सति** इति. शास्त्रयोः विरोधे सति. **कल्प्यम्** इति. शास्त्रद्वयसामञ्जस्य अर्थं कल्प्यम्. तथाच मन्त्रशास्त्रीयविधौ मन्त्राधिष्ठातृतया उद्देश्यत्वेन विभूतेरेव सम्बन्धइति तावतैव तेषां भगवत्परत्वं, नतु साक्षाद् इति तत्र मूलरूपेण उद्देश्यत्वं निवारितम् इति अर्थः. एवञ्च अत्र भक्तिमार्गीयश्रवणादीनाम् उपासनामार्गीयश्रवणादीनां च आपाततः सारूप्येऽपि रूपभेदाद् भेदो बोधितः. यथाहि आमिक्षाधिकरणे (जै.सू.४।१।३) द्रव्यदेवते यागस्य रूपमिति तद्भेदाद् आमिक्षावाजिनयागयोः भेदः तथा अत्र श्रवणादित्रयस्य विषयो रूपं पादसेवनादीनां परिचरणीयादि रूपमिति तद्भेदाद् भेदः. नच नामरूपलीलानां सामान्याद् विषयादिरूपयोः [2]देवतयोः अभेदः शंकनीयः, तत्सामान्येऽपि भेदस्य शास्त्रसिद्धत्वात्. शिवपुराणे संहाररुद्रमाहात्म्यं प्रस्तुत्य "सः एषः भगवान् ईशः तेजोराशिः अनामयः. अनादिनिधनो धाता भूतसंकोचको विभुः. परमैश्वर्यसंयुक्तः परमेश्वरभावितः.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

स्याद् इति मन्त्रो देवता तद्भजनं च तथा स्यात्. **मन्तव्यम्** इति, तथाच मन्त्रशास्त्रीयविधौ उद्देश्यत्वेन विभूतेरेव सम्बन्धो नतु [3]साक्षाद् भगवतइति त्वद्विचारितरूपेण उद्देश्यत्वे निवृत्ते तथा विध्यस्पर्शः सुस्थएव इति अर्थः. एतेन असम्बद्धः, अनुद्देश्यत्वात्. अनुद्देश्यः, तच्छास्त्राप्रतिपाद्यत्वात्.

---

१. विशिष्टत्वेऽतीति ख. घ. २. देवतयोः भेदः इति क. ३.तस्य भागवतः इति ख.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

न पूर्वोक्तहेतुकौ तौ इति भ्रान्त्याकुलितचित्तः शंकते ननु इति.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

तच्छक्त्या अधिष्ठितः शश्वच्चिह्नैरपि चिह्नितः तन्नामनाम तद्रूपः तत्कार्यकरणक्षमः, तत्तुल्यव्यवहारश्च तदाज्ञापरिपालकः" (शिवपुरा.७।१।१४-।७) इति वाक्यात्. पराशरपुराणेऽपि "**माहेश्वरपुराणानि**" (पराशरोपपुराण.३।-११) इत्यादिना शैवपुराणानां परमशिवसंहाररुद्रोभयपरत्वम् उक्त्वा "**वैष्णवानि पुराणानि समस्तानि महामुने! त्रिमूर्तीनां हरेः नाम्ना मूर्त्या तस्य परं पदं, प्रवदन्ति पुराणे द्वे ब्राह्मे चैव अनया दिशा**" (पराशरोपपुराण.३।१४) इति गुणिविष्णुपरमविष्ण्वोः नामरूपलीलैक्येऽपि भेदकथनात्. महाभारतेऽपि "**मूलं कृष्णो ब्रह्म च ब्राह्मणाः च**" (महाभा.आदिप.१।१।१०२) इति. अंशावतरणे "**कृष्णः केशावतारः**" ( ) इति कथनाच्च. श्रीभागवतेऽपि "**कृष्णस्तु भगवान् स्वयम्**" (भाग.पुरा.१।३।२८) इति. "**तौ इमौ वै भगवतो हरेः अंशौ**" (भाग.पुरा.४।१।५९) इति कथनाच्च. एवं नामाद्यभेदेऽपि सिद्धे पदार्थभेदे रूपभेदाद् भेदो निर्बाधः इति दिक्. **विध्युक्तभजनाभावहेतुकौ** इत्यादि तथाच "**मन्त्रो हीनः स्वरतो वर्णतो वा**" (पाणिनीयशिक्षा.५२) इति न्यायेन विध्यपराधादेव तत्र फलवैषम्यं

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

अप्रतिपाद्यः तच्छास्त्रोक्तधर्मरहितत्वात्, तद्विरुद्धधर्मकत्वाच्च. यदेवं तदेवम्. [१] वैष्णवशास्त्रप्रतिपाद्यशिववद् इति प्रत्यनुमानं बोधितम्. इदञ्च श्रुत्यनुगृहीतत्वात् पूर्वोक्तबाधकम्. तथाच भक्तिविरुद्धधर्मकत्वाद् उपासनायाअपि भक्तिभिन्नत्वं साधितम्. नच नामरूपलीलानां सामान्याद् रामादिरूपाणां विभूतित्वांगीकरणम् असंगतम् इति शंक्यं तत्सामान्येऽपि भेदस्य शास्त्रसिद्धत्वात्. तथाहि : शिवपुराणे संहारकरुद्रमाहात्म्यं प्रस्तुत्य "**सः एषः भगवान् ईशः तेजोराशिः अनामयः अनादिनिधनो धाता भूतसंकोचको विभुः. परमैश्वर्यसंयुक्तः परमेश्वरभावितः. तच्छक्त्या अधिष्ठितः शश्वत्तच्चिह्नैरपि चिह्नितः. तन्नामनाम**

---

[१] 'विष्णुवद्'इति इति ख.

भजनं हि सर्वस्यापि इष्टदम् अतो न अनुपपत्तिः काचिद् इति चेद्, उच्यते. "यान् आस्थाय नरो राजन्! न प्रमाद्येत कर्हिचिद्

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

समादधते **यान् आस्थाय** इति आरभ्य **नतु अन्यथा** इत्यन्तेन. अत्र अयम् आशयः. यदि गोपालादिमन्त्राणां पुरुषोत्तमाधिष्ठितत्वमेव न विभूतिपरत्वं

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

नतु पुरुषोत्तमाधिष्ठातृकत्वाभावाद् इति न तेन पुरुषोत्तमस्य उद्देश्यत्वं

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तद्रूपः [१]तत्कार्यैकरणक्षमः, तत्तुल्यव्यवहारश्च तदाज्ञापरिपालकः" (शिवपुरा.-७।१।१४।५-७) इति. पराशरपुराणेऽपि 'माहेश्वरपुराणानि' इत्यादिना शैवपुराणानां परमशिवसंहाररुद्रोभयपरत्वं व्यवस्थाप्य "**वैष्णवानि पुराणानि समस्तानि महामुने! त्रिमूर्तीनां हरेः नाम्ना मूर्त्या तस्य परं पदं, प्रवदन्ति पुराणे द्वे ब्राह्मे चैव अनया दिशा**" (पराशरोपपुराण.३।१४) इति गुणिविष्णुपरमविष्णवोः नामरूपलीलैक्येऽपि भेदबोधनात्. महाभारतेऽपि "**मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च**" (महाभा.आदिप.१।१।१०२) इति. [२]अंशावतरणे "**कृष्णः केशावतारः**" इति [३]कथनाच्च. श्रीभागवतेऽपि "**कृष्णस्तु भगवान् स्वयम्**" (भाग.पुरा.१।३।२८) इति. "**तौ इमौ वै भगवतो हरेः अंशौ इह आगतौ**" (भाग.पुरा.४।१।५९) इति कथनाच्च. एवञ्च अत्र वक्ष्यमाणानां भक्तिमार्गीयाणाम् उपासनामार्गीयाणां च श्रवणादीनाम् आपाततः स्वरूपतौल्येऽपि रूपभेदाद् भेदो अनुसन्धेयः इति सूचितम्. यथाहि आमिक्षाधिकरणे "द्रव्यदेवते यागस्य रूपम्" इति तद्भेदाद् आमिक्षावाजिनयागयोः भेदः तथा अत्र श्रवणादित्रयस्य विषयो रूपं पादसेवनादीनां परिचरणीयादीनि रूपमिति तद्भेदाद् भेदः इति. एवञ्च मन्त्रशास्त्रीयमन्त्रप्रकाश्यः पुरुषोत्तमः श्रुत्युक्तः [४]तन्नामरूपलीलकत्वात्. भक्तिशास्त्रसिद्धपुरुषोत्तमवद् इति प्रत्यनुमानस्य [५]विभूतिसाधारण्येन व्यभिचारितया हेत्वाभासत्वं बोध्यम्. अत्र चोदयति

---

१. तत्कार्यैकरणाक्षमः इति ख. २. अंशावतारणे इति ख. ३. चकारो अयं क्वचिदपि नास्ति. प्रतिभातस्तु निवेशितः. ४. श्रुत्युक्ततन्नामरूपलीलाकथनाद् इति ख. ५. उभयसाधारण्येन इति ख.

धावन् निमील्य वा नेत्रे न स्खलेद् न पतेद् इह'' (भाग.पुरा.११।२।३५) इति वाक्ये भगवद्धर्मास्थितिमात्रेणैव भगवत्प्राप्त्यर्थम् अत्यार्त्या नित्यसाधनपरित्यागे शास्त्रगुरूल्लंघनेऽपि फलविलम्बः फलाभावो वा न भवति इति निरूप्यते. आस्थितिस्तु कायवांगमनसां तदीयत्वम्. एवं सति मन्त्रोपासनायाअपि यदि भगवद्धर्मत्वं स्यात् तदा

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

तदेतद् उपासनमपि साक्षाद्भगवद्भजनव्यपदेशभाग् भवेत्. तथा सति भक्तिमार्गीयभगवद्धर्मपरस्य स्नेहोत्पत्तौ कदाचिद् मार्गबलेन अन्यथा आचरणेऽपि न नियतकालीनफलसमयातिक्रमो नापि फलाभावः इति यथा मार्गप्रविष्टस्य श्रूयते तथैव उपासनानिष्टस्य अरिमन्त्रपरस्यापि स्यात्. दृश्यतेतु अन्यथा. तथा सति शास्त्रसम्प्रदायविरोधः स्यात्. तस्माद् विभूतिपरत्वमेव इति सिद्धम्. कायवांगमनसां तदीयत्वं तत्परत्वम् इति अर्थः. ननु अत्रापि स्नेहोत्पत्तौ सत्याम् अन्यथा आचरणं न दोषाय इति [1]समः समाधिः इति चेद्, न. तादृशस्नेहरूपकार्यस्य ऐहिकम् आमुष्मिकं वा किञ्चिद् भक्तिमार्गीयमेव वाच्यं कारणम्. अन्यथा फलश्रवणं विसंवादि भवेत्. अकामितफलप्राप्तिकथने अवाञ्छितानिष्टमपि कदाचिद् भवेत्. तस्माद् न [1]समः समाधिः इति

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

ननु इत्यादि. तथाच "**मन्त्रो हीनः स्वरतो वर्णतो**" (पाणिनीयशिक्षा.५२) इति न्यायेन [2]साध्यादिस्थले फलविलम्बफलाभावौ विध्यपराधनिबन्धनौ, साध्यस्थले अधिकारिणो जघन्यत्वाद्, अरिस्थले अनधिकाराच्च. ननु इदं वैषम्यं, पुरुषोत्तमानधिष्ठितत्वात्. अतः तत्रापि पुरुषोत्तमस्य साक्षाद् अधिष्ठातृत्वं निर्बाधमिति तद्विध्युद्देश्यत्वं न अस्मद् रीत्यापि हीयते इति तदाशयः. यद्यपि सिद्धत्वादीनां कण्ठोक्तत्वेन न्यायापेक्षया प्रबलत्वाद् आशंकैव न उदेति तथापि वादिनो ग्रहिलत्वात् तदनुक्त्वा प्रकारान्तरेणैव समादधते [3]**उच्यते** इत्यादि **नतु अन्यथा** इत्यन्तम्. तदीयत्वम् इति तत्परत्वम्.

---

[1] मनःसमाधिः इति घ. [2] बाधादिस्थले इति ख. [3] मैवम् इत्यादि नतु अन्यथा इत्यन्तम् इति ख.

तत्परत्वमात्रेणैव यस्य कस्यचिद् इष्टमेव फलं भवेद् नतु अन्यथा. ननु "सर्वेषु वर्णेषु तथा आश्रमेषु नारीषु नानाह्वयजन्मभेषु, दाता फलानाम् अभिवाञ्छितानां द्रागेव गोपालकमन्त्र: एष:" (क्रमदीपिका.१।४) इति वाक्यात् सर्वाभीष्टदत्वं गोपालमन्त्रोपासनायाम् अस्ति इति न उक्तरूपता इति चेत्, सत्यम्. अस्ति सर्वाभीष्टदत्वम्. [1]नतु उक्तरूपतापि

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

भाव:. यथा पुरुषोत्तमो भक्तिमार्गे सर्वाभीष्टद: तथा मन्त्राणामपि फलश्रुते: तादृशफलप्रदत्वं न पुरुषोत्तमविषयत्वम् अन्तरेण इति आशयेन आह **ननु** इति. **नतु उक्त...** इति. [2]भजनरूपत्वं न इति अर्थ:. अनारभ्याधितत्वाभावाद् न सर्वप्रकृतिरूपपुरुषोत्तमपरत्वं युक्तं [3]पर्णमयीत्ववत्. तत्तत्काण्डान्त:पातिततत्तत्प्रकरणानां स्फुटम् उपलम्भात्. नहि इति. कर्मांगत्वेन कर्मसाद्गुण्यार्थं

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

वारयितुं शक्यते इति अर्थ:. **इति भाव:** इति. तथाच भगवद्धर्मेषु विध्यपराधनिषेधाद् उपासनायाश्च तच्छालित्वाद् मूलएव कुठारइति न अत्र भगवत: उद्देश्यत्वं सम्भावयितुं शक्यम्. अत: पूर्वोक्तम् अदुष्टम् इति भाव:. मूले सर्वाभीष्टदत्वं सर्वेषाम् अभीष्टदातृत्वम्. तथाच मित्रार्यादिभावकथनाद् मन्त्राणां विभूतिपरत्वांगीकारो अप्रयोजक: इति सिद्धे भगवद्धर्मत्वे भगवत: साक्षादुद्देश्यत्वम् अदण्डवारितम् इति अर्थ:. अत्र समादधते **सत्यम्** इत्यादि. **उपासनामार्गीयत्वाद्** इति तथाच प्रकरणभेदाद् न तत्र पुरुषोत्तमस्य उद्देश्यत्वम् इति भाव:. एतद् व्याकुर्वते [4]**नतु उक्त...** इत्यादिना **पर्णमयीत्ववद्**

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

तथाच आस्थाय भगवत्परै: कायवांगमनोभि: कृत्वा इति अर्थ:. **यस्य कस्यचिद्** इति. अरिमन्त्रोपासकस्य. तथाच भगवद्धर्मेषु विध्यपराधनिषेधाद् उपासनायां [5]तत्सत्त्वाद् न भगवद्धर्मत्वं शक्यवचनम् इति तद्विधौ

---

१. न त्वनुक्तरूपतापि इति क्वचिद्. २. भगवद्रूपत्वं न इति घ. ३. पर्णमयीवद् इति ख. ४. ननु उक्तत्यादिना इति द्वयोरपि पुस्तकयो: पाठ:. व्याख्येयानुरोधाद् एवमेवतु युज्यते. ५. तदभावाद् इति. ख.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति. यथा ''**यस्य पर्णमयी जुहूः भवति न सः पापं श्लोकं शृणोति**'' (तैत्ति.संहि.३।५।७।२) इति अनारभ्योक्तमपि पर्णमयीत्वं वाक्येन क्रतुसम्बन्धितया प्रत्याय्यते तथा. तत्तत्काण्डान्तःपाति-तत्तत्प्रकरणानां रामतापनीये ''[1]**उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना**'' (श्रीरामताप.उ-प.७) इति गोपालतापनीये ''**ते होचुः उपासनम् एतस्य परमात्मनो गोविन्दस्य अखिलधारिणो ब्रूहि**'' (गोपाल.पूर्व.१।४) इति नृसिंहतापनीये मन्त्रोद्धाराद्युपासना

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

भगवतः साक्षादुद्देश्यत्वं दूरनिरस्तम् इति भावः. नच आस्थितिस्वरूपविचारे परिपाकदशायां विध्यपराधनिषेधः फलति नतु आरम्भदशायाम्. तथा सति परिपाकदशायां [2]विध्यपराधो न उद्देश्यत्वं निवर्तयिष्यतीति पूर्वोक्तम् असाम्प्रतम् इति वाच्यम्, ''अपि चेत् सुदुराचारो'' (भग.गीता ९।३०) इति गीतोक्तिविरोधाद्, अत्र आरम्भदशायाएव कथनात्, ''**क्षिप्रं भवति धर्मात्मा**'' (भग.गीता ९।३१) इति अग्रिमवाक्येन तथानिश्चयात्. अतो विध्यपराधेन उपासनायां भगवद्धर्मत्वनिवृत्तिः युक्तैव इति निश्चयः. एवम् उपासनाविध्युद्देश्यत्वे निवारितेऽपि तदर्थम् उपासनाविशेषस्य भगवद्धर्मसाम्यम् आपादयञ्च शंकते **ननु सर्वेषु** इत्यादि. **सर्वाभीष्टदत्वम्** इति. सर्वेषाम् अभीष्टदातृत्वम्. **न उक्तरूपता** इति. न अनिष्टदत्वम्. तथाच गोपालमन्त्रोपासनातिरिक्तोपासनायां [3]मन्त्राणाम् अस्तु विभूतिपरत्वम्. गोपालोपासनायान्तु तथात्वांगीकारो अप्रयोजकः इति सिद्धे तदधिष्ठातृत्वे तेन रूपेण पुरुषोत्तमस्य तद्विध्युद्देश्यत्वं तस्याः भगवद्धर्मरूपत्वञ्च अदण्डवारितम् इति अर्थः. अत्र समादधते **सत्यम्** इत्यादिना. **उक्तरूपतापि** इति. [4]भगवद्धर्मरूपता, 'अपि'शब्दाद् अनिष्टदत्वाभावः. **उपासनामार्गीयत्वाद्** इति. तथाच प्रकरणभेदात् तस्याः [5]भगवद्धर्मरूपत्वाभावे तस्यां पुरुषोत्तमस्य न [6]तदधिष्ठातृरूपेण उद्देश्यत्वम्

---

[1]. उपासनानाम् इति क. [2]. विध्यनपराधः इति क. [3]. कर्मणाम् अस्तु इति ख. [4]. ज्ञानरूपता इति ख. [5]. भक्तिरूपत्वाभावे इति ख. [6]. तत्तदधिष्ठातृरूपेण इत्यपि दृश्यते शोधनात् प्राक्तनो अनिवारितः पाठः क.

उपासनामार्गीयत्वात्. नहि कर्मांगत्वेन क्रियमाणस्य भगवत्स्मरणस्य

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

क्रियमाणस्य इति अर्थः. नहि अन्योद्देशेन विधीयमानम् अन्यत् सम्पादयति

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

-लिंगानां च **तथा** इति अर्थः. प्रकरणभेदेन पुरुषोत्तमपरत्वाभावे दृष्टान्तम् आहुः मूले **नहि** इत्यादि. टीकायां **नहि** इत्यादि. अतिप्रसंगापत्त्या अनुचितम् इति अर्थः. तथाच यथा कौण्डपायिनाम् अयने **"मासम् अग्निहोत्रं जुहोति"** (कात्या.श्रौ.सू.४।२६) इत्यत्र किं नित्याग्निहोत्रानुवादेन मासलक्षणो गुणो विधीयते उत कर्मान्तरं विधीयते इति सन्देहे कर्मणः प्राप्तत्वाद् गुणविधानम् इति पूर्वः पक्षः. [1]तत्स(?) तत्र **"उपसद्भिः चरित्वे"** (द्र.शाबरभा.२।३।२४) इति वाक्यान्तरात् कर्मैक्यपक्षे नित्येऽपि तदापत्तेः मासोपसदोः उभयोरपि विधाने वाक्यभेदापत्तेश्च. अतः प्रकरणभेदात् कर्मान्तरम् इति द्वितीयस्य तृतीये विचारितम्. [2]तथाच 'अग्निहोत्र'शब्दो अनेकार्थत्वस्य अन्याय्यत्वेन गौण्या अंगीकृतः तस्मिन् कर्मणि अग्निहोत्रधर्मातिदेशकः तथात्र

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

इति भावः. अत्र दृष्टान्तम् आहुः **नहि** इत्यादि. **कर्मांगत्वेन क्रियमाणस्य** इति. कर्मसाद्गुण्यार्थं क्रियमाणस्य. तथाच यथा कौण्डपायिनाम् अयने **"मासम् [3]अग्निहोत्रं जुहोति"** (कात्या.श्रौ.सू.४।२६) इत्यत्र किं नित्याग्निहोत्रानुवादेन मासलक्षणो गुणो विधीयते उत कर्मान्तरं विधीयते इति सन्देहे कर्मणः प्राप्तत्वाद् गुणविधिः अत्र इति पूर्वपक्षीकृत्य तत्र **"उपसद्भिः चरित्वे"** (द्र.शाबरभा.२।३।२४) इति वाक्यान्तरात् कर्मैक्यपक्षे नित्याग्निहोत्रेऽपि तदापत्तेः मासोपसदोहो उभयोरपि विधाने वाक्यभेदापत्तेश्च प्रकरणभेदात् कर्मान्तरं तद् इति द्वितीयस्य तृतीये चिन्तितं, तेन [4]अनेकार्थत्वस्य अन्याय्यत्वात् तत्र 'अग्निहोत्र'शब्दो गौण्या प्रवर्तमानो नित्याग्निहोत्रधर्मातिदेशकत्वेन अंगीकृतः तथा अत्रापि प्रकरणभेदाद् उक्तवक्ष्यमाणधर्मभेदाच्च

---

[1] तन्मतत्र इति क. [2] यथा अग्निहोत्रशब्दः इति ख. [3] "अग्निहोत्रं जुह्वति" इति पाठः [4] अनेकार्थत्वस्य आम्नायगौय इति क.

भक्तिरूपत्वं वक्तुं शक्यं कर्ममार्गीयत्वात्. अपरञ्च तत्र [1]वरांगना

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इति उचितम्. पुरुषोत्तमपरत्वे दूषणान्तरमपि आहुः **अपरञ्च** इति. [2]वरांगनावशीकरणादेरपि पुरुषोत्तमसम्बन्धित्वे फलदात्रैक्येन ब्रह्मसूत्रादिकमपि तादृशे कर्मणि उपयुञ्जीत अविशेषाद् इत्यपि सुवचं स्यात्. ततो वैराग्यादिविधानं व्यर्थमेव स्याद् इत्याद्यपि ऊह्यम्. **अतएव** इति. यतः पुरुषोत्तमसम्बन्धि कार्यम् इदम् अनर्थकरं न युज्यते सर्वागमविरोधात्. किन्तु

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

प्रकरणभेदाद् मन्त्रोपासनायां 'भक्ति'पदप्रयोगो मन्त्राधिष्ठातरि च गोपालादिप्रयोगो गौण्या तदेकतानत्वादीनां भक्तिधर्माणाम् उपासकभक्तानुग्राहकत्वादीनां च अतिदेशकइति न नामादिना भ्रमितव्यम् इति भावः. ननु उपासनामार्गीयत्वेऽपि गोपालमन्त्रोपासनायां सर्वाविशिष्टत्वस्य अनपायाद् भक्तित्वमपि सुवचम्. तथा सति मार्गभेदो अप्रयोजकः, लिंगापेक्षया प्रकरणस्य नैर्बल्यात्. अथवा **"देवत्वञ्च पितृत्वञ्च यमस्य अस्ति द्विरूपता"** (स्क.पुरा.२।४।१।४१) इतिवद् द्विरूपत्वं वा अस्तु. तथा सति तस्यां पुरुषोत्तमस्य उद्देश्यत्वे किं बाधकम् इति शंकां हृदि कृत्वा आहुः **पुरुषोत्तम...इत्यादि ऊह्यम्** इत्यन्तम्. तथाच फलभेदाद् न गोपालमन्त्रोपासनस्य भक्तिरूपत्वम् अतएव

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

मन्त्रोपासनायां यो 'भक्ति'पदप्रयोगः तदधिष्ठातरि च यः [3]'पुरुषोत्तमा'दिपदप्रयोगः सोऽपि गौण्या उपासनायां तदेकतानत्वादीनां भक्तिधर्माणाम् उपास्ये च अनुग्राहकत्वादीनां पुरुषोत्तमधर्माणाम् अतिदेशकएव नतु तयोः भक्तिपुरुषोत्तमाभेदापादकः इति भावः. ननु उपासनामार्गीयत्वस्य प्रकरणसिद्धत्वाद् [4]भक्तित्वस्य सर्वाविशिष्टत्वरूपलिंगसिद्धत्वाद् लिंगापेक्षया प्रकरणस्य दौर्बल्याद् न पूर्वोक्तं साधीयः इति शंकायां लिंगनैर्बल्यायाः आहुः **अपरञ्च** इत्यादि **विरोधाद्** इत्यन्तम्. तथाच गोपालोपासनं भक्तिः सर्वाविशिष्टत्वात्. न

---

१. वारांगना इति क्वचित्. २. वेश्यावशीकरणादेः इति क. ख. ग. ३. गोपालादिपदप्रयोगः इति क. ४. ज्ञानत्वस्य इति ख.

–वशीकरणादिकं फलत्वेन श्रूयते. नहि पुरुषोत्तमभक्तेः तत् फलीभवितुम् अर्हति, अनर्थरूपत्वाद् ‘‘अनर्थो उपशमं साक्षाद् भक्तियोगम् अधोक्षजे’’ (भाग.पुरा.१।७।६) ‘‘तस्माद् निराशिषो भक्तिः निरपेक्षस्य मे भवेद्’’ (भाग.पुरा.११।२०।३५) इत्यादिवाक्यविरोधात्. अतएव शूद्रप्रतिष्ठापितमूर्तौ ब्राह्मणनमस्कारनिषेधो धर्मशास्त्रे युज्यते. ‘‘यः शूद्रस्थापितं

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

मन्त्राधिनान्यदेवताकार्यमिव इदम्. अतः कारणात् शूद्रप्रतिष्ठापितप्रतिमालिंगादिषु देवतान्तरसान्निध्यात् शूद्रकर्तृकदोषसंवलितत्वात् सर्वोपास्यत्वाभावाद् द्विजादिनमस्कारनिषेधो युज्यते. नो चेद् अप्रणामी [1]प्रत्यवेयादेव. ‘‘देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनं, नमस्कारं न कुर्यान् चेत् प्रायश्चित्ती भवेद् नरः’’ (द्र.संस्कारदी.पृ.२५७) इत्याद्यागमविरोधोऽपि इति अर्थः.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

न द्विरूपत्वमपि इति भावः. कर्ममार्गियभगवत्स्मरणादौ भक्तिरूपत्वाभावम् अतिदेष्टुं कर्ममार्गीयनमस्कारे भक्तित्वाभावगमकं धर्मम् आहुः **अतएव** इति मूले. तद् व्याकुर्वन्ति **यतः** इत्यादि. **नो चेद्** इति. प्रतिष्ठापितस्य पुरुषोत्तमत्वे. तथाच सोऽपि नमस्कारो वन्दनभक्तिरूपो न इति भावः. एवं मन्त्रफलादेः तद्धर्मान्तरस्य च [2]विचारेण उपासनादिमार्गीयाणां मन्त्राणां

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

भक्तिः. अनर्थफलकत्वाद् इत्येवं भक्तिलिंगस्य [3]सप्रतिसाधनत्वेन निर्बलत्वाद् असञ्जातविरोधं प्रकरणमेव बलीयइति पूर्वोक्तम् अक्षुण्णमेव इति अर्थः. ननु अस्तु एवम् उपासनायां तथापि कर्ममार्गीयस्मरणस्य भक्तित्वं दुर्वारं सर्वविशिष्टत्वस्य अनर्थोपशामकत्वस्य च तत्र अक्षुण्णत्वाद्, लिंगद्वयापेक्षया प्रकरणस्य एकस्य नैर्बल्याद् इति आशंकायां तत्रापि पूर्ववद् लिंगनैर्बल्यम् आहुः **अतएव** इत्यादि **वाक्याद्** इत्यन्तम्. **अतएव** इति. लिंगनैर्बल्यादेव. **न नमस्यः क्वचित्.** अत्र काकुः बोध्या. तथाच सर्वत्र नमस्यएव इति

---

[1] प्रत्यवायी स्यादेव इति घ. [2] विचारेण न उपासनादिमार्गीयाणाम् इति क.

[3] सप्रतिपक्षसाधनत्वेन इति ग.

लिंगं विष्णुं वा विनमेद् द्विजः सः याति नरकं घोरं यावद् आहूतसम्प्लवम्'' (   ) इति. नहि ब्राह्मणानाम् ईश्वरो न नमस्यः क्वचित्. ''किं पुनः ब्राह्मणाः पुण्याः'' (भग.गीता ९।३३) इति वाक्यात्.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

पुरुषोत्तमस्य मन्त्राधीनत्वम् अनुपपन्नं प्रमाणविरोधात्. भक्त्यधीनत्वं च उपपन्नं प्रमाणसद्भावादिति आहुः **किञ्च** इति आरभ्य **पुरुषोत्तमे अवधेयम्**

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

भक्तित्वं निवारितम्. इदानीं तदधिष्ठातुः विभूतित्वं यत् प्रागुक्तं तद् दृढीकर्तुं वैलक्षण्यं वदन्ति इति आशयेन आहुः **पुरुषोत्तमस्य** इत्यादि तथा च अत्र मूले [१]भेदकनिदर्शनात् पुरुषोत्तमस्य [२]न तदुद्देश्यत्वम् इति

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

अर्थः. अयम् आशयः. कर्ममार्गैर्हि ''**यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं सम्पूर्णतां याति सद्यो वन्दे तम् अच्युतम्**'' (श्रीविष्णुपूजास्तोत्र.४२) इत्यादिवाक्यैः पुरुषसूक्तेन पूजाविधानाच्च स्मरणकीर्तनवन्दनार्चनानि विष्णुविषयकाण्येव प्रायः सन्ति इति स्मरणीयत्वादिवद् वन्दनीयत्वमपि तस्यैव सिद्ध्यति तथा प्रतिमायामपि प्रतिष्ठादिना तस्यैव [१]आवेशादि. तस्य च पुरुषोत्तमत्वे शूद्रप्रतिष्ठापितमूर्तावपि तस्यैव आविष्टत्वात् तद्वन्दनमपि सर्वाविशिष्टं स्यात्. [२]ततश्च उक्तविधवाक्यानि विरुद्ध्येरन्. अतः तदविरोधाय तत्र विष्ण्वन्तरावेशएव वक्तव्यः. तथा सति सकृत्प्रवृत्तावगुण्ठनन्यायेन भग्ने वन्दनस्य आविशिष्टत्वे स्मरणादेरपि तद्विषयकत्वेन वन्दनतुल्ययोगक्षेमत्वाद् भग्नमेव[३] सर्वाविशिष्टत्वम्. ततश्च कर्ममार्गीयवन्दनं भक्तिः [४]सर्वाविशिष्टत्वादिति साधने हेतोः स्वरूपासिद्धत्वम् तथा [५]तदीयविष्णुस्मरणादिः भक्तिः सर्वाविशिष्टत्वाद् इति साधनेऽपि न भक्तिः विष्ण्वन्तरविषयकत्वात् तत्रत्य वन्दनवद् इति प्रतिसाधनसद्भावाद् असाधकत्वेन सिद्धे लिंगनैर्बल्ये प्रकरणस्य [६]बलवत्त्वाद् न

---

१. तस्यैवावेदिः इति क. तस्यैवाविवेशादि इति ग, ख पुस्तकेषु नास्त्येव किमपि. इष्यते तु एवम्. २. उक्तविधिवाक्यानि इति ग. ३. एवकारो नास्ति इति ख. ४. सर्वस्य आविशिष्टत्वाद् इति ख. ५. त्वदीयः इति ग. ३. बलवत्त्वाद् एतस्यापि अभक्तित्वम् इति ख.

किञ्च, मन्त्राधीनत्वं तत्तद्देवतायाः उच्यते. पुरुषोत्तमस्तु ''न साधयति मां योगो न सांख्यं धर्मः उद्धव! न स्वाध्यायः तपः त्यागो यथा भक्तिः मम उर्जिता'' (भाग.पुरा.११।१४।२०) ''न रोधयति मां योगो न सांख्यं धर्मएव च न स्वाध्यायः तपः त्यागो न इष्टापूर्तं न दक्षिणा व्रतानि यज्ञाः छन्दांसि तीर्थानि नियमा यमाः'' (भाग.पुरा.११।१२।१-२) इति. ''न अहं वेदैः न तपसा न दानेन न च इज्यया शक्यः एवंविधो द्रष्टुं दृष्टवान् असि मां यथा'' (भग.गीता ११।५३), ''भक्त्यातु अनन्यया शक्यः अहम् एवंविधो अर्जुन! ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुञ्च परन्तप!'' (भग.गीता ११।५४) इत्यादिवाक्यैः ''न अयम् आत्मा'' (कठोप.१।२।२३, मुण्डकोप.३।२।३) इत्याद्युक्तश्रुत्या च न मन्त्रोपासनाद्यधीनः इति महद् वैलक्षण्यम्. ''अहं भक्तपराधीनो हि अस्वतन्त्रइव द्विज!, साधुभिः ग्रस्तहृदयो भक्तैः भक्तजनप्रियः. न अहम् आत्मानम् आशासे मद्भक्तैः साधुभिः विना. श्रियञ्च आत्यन्तिकीं

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इत्यन्तेन. **न रोधयति** न स्वातन्त्र्यगतिम् अवरुणद् हि इति अर्थः.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

बोधितम्. एवं रूपभेदेन उपासनाभक्त्योः भेदे सिद्धे फलभेदधर्मभेदाभ्यां च उपोद्बलिते पुनः उपासनायाः भक्तिरूपत्वम् आपाद्य मन्त्राधीनत्वं

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तस्याअपि भक्तित्वमिति. एवम् उपासनसम्बन्धिफलादेः धर्मान्तरस्य च विचारेण मन्त्रोपासनस्य कर्ममार्गीयवन्दनादेश्च भक्तित्वं तद्विधीनां भगवदुद्देश्यकत्वञ्च निवारितम्. अतः परम् उपास्यधर्मविचारेण तदधिष्ठातुः विभूतिरूपत्वं दृढीकर्तुं वैलक्षण्यं वदन्ति **किञ्च** इत्यादि **अवधेयम्** इत्यन्तम्. **न रोधयति** इति. न वशीकरोति. शेषम् अतिरोहितार्थम्. एवम् उपास्यनिष्ठधर्मविचारेण

---

१. भेददर्शनाद् इति क. २. नेति नास्ति क.

ब्रह्मन् येषां गतिः अहं परा, ये दारागारपुत्राप्तप्राणान् वित्तम् इमं परं हित्वा मां शरणं याताः कथं तान् त्यक्तुम् उत्सहे, मयि निर्बद्धहृदयाः साधवः समदर्शिनः वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा'' (भाग.पुरा.९।४।६३-६६) इत्यादिभिः. ''न अलं द्विजत्वं देवत्वम् ऋषित्वं वा असुरात्मजाः, प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता, न दानं न तपो न इज्या न शौचं न व्रतानि च, प्रीयते अमलया भक्त्या हरिः अन्यद् विडम्बनम्'' (भाग.पुरा.७।७।५१-५२) इत्यादिभिः. ''भक्त्या अहम् एकया ग्राह्यः'' (भाग.पुरा.११।१४।२१), ''भक्त्या तुतोष भगवान् गजयूथपाय'' (भाग.पुरा.७।९।९) इत्यादिवाक्यसहस्रैः भक्तिमात्राधीनत्वोक्त्या च ततो वैलक्षण्यं पुरुषोत्तमे अवधेयम्. ननु मन्त्रादेरपि भगवदीयत्वात् तत्सम्बन्धि सर्वं भक्तिरूपमेव इति न उक्तानुपपत्तिः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

''**येऽपि अन्यदेवताभक्ताः**'' (भग.गीता ९।२३), ''**यो यो यां यां तनुं भक्तः**'' (भग.गीता ७।२१), ''**वेदैश्च सर्वैः अहमेव वेद्यः**'' (भग.गीता १५।१५) इत्यादिवाक्यैः सर्वेषां भक्तिफलरूपश्रीकृष्णसम्बन्धित्वकथनाद् मन्त्रादीनामपि भक्तिरूपत्वम् उपपद्यतएव इति आह ननु इति. अतिमूर्खोक्तिः

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

[१]तद्विध्युद्देश्यत्वं वा शंकते इति आहुः **येऽपि अन्य** इत्यादि **सर्वेषाम्** इति. यजनार्चनज्ञानोपासनानाम् आह इति. **मन्त्राधीनत्वांगीकारेऽपि दोषाभावम्** आह इति अर्थः. मूले **भगवदीयत्वाद्** इति. परब्रह्मात्मकत्वमेव उपक्रम्य पठितत्वेन तथात्वात्. **तत्सम्बन्धि** इति मन्त्रसम्बन्धिपुरश्चरणपूजादिकम्.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तदधिष्ठातुः भेदः साधितः. एवं रूपभेदेन उपासनभक्त्योः सिद्धे भेदे फलभेदधर्मभेदाभ्याम् उपोद्बलितेऽपि अनाघ्रातमीमांसागन्धत्वात् पुनः हेत्वन्तरेण उपासनायां भक्तित्वम् आशंकते **ननु मन्त्रादेः** इत्यादि.

---

१. तद्विध्युपदेश्यत्वम् इति ख.

इति चेद्, हन्त इदं ‘‘पाण्डुरमृत्पानीयमेव शुनः तक्रम्’’ (   ) इति आभाणकम् अनुहरति. ननु कथम् एवम्? इत्थम्. श्रीमदुद्धवपृष्टेन यदुवंशोदयाचलचूडामणिना पूजामार्गं निरूप्य ‘‘प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं, पूजादिना ब्रह्मलोकं त्रिभिः मत्सार्ष्टिताम्/मत्साम्यताम् इयात्’’ (भाग.पुरा.११।२७।५२) इति प्रत्येकसमुदायाभ्यां फलभेदं निरूप्य ‘‘मामेव [1]नैरपेक्ष्येण भक्तियोगेन विन्दति, भक्तियोगं सः लभते एवं यः पूजयेत माम्’’ (भाग.पुरा.११।२७।५३) इति निरूपितम्.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इथम् इति दृष्टान्तेन विविनक्ति **हन्त** इति. ‘हन्त’इति विषादे. इदं ते शंकावाक्यम्. पाण्डुरमृत्सम्बन्धि पानीयमेव अन्तःसारासारानभिज्ञस्य शुनः तक्रम् इत्येवं विधम् **आभाणकं** लोकोक्तिप्रहेलिकावद् वाक्यम् **अनुहरति** सादृशं प्राप्नोति इति अर्थः. सादृशनिबन्धनोऽपि भ्रमो न घटते स्फुटभेदोक्तेः इति आहुः **इत्थम्** इति. एकादशस्कन्धे भगवद्-उद्धवसंवादे प्रतिष्ठानिकेतनपूजानाम् एकैकशः सार्वभौमादिफलं समुदितानां समानैश्वर्यं फलं सकामस्य. नैरपेक्ष्येण शुद्धस्वरूपमात्रनिष्ठभक्तियोगेन पूजाफलं भक्तिः इति आह **भक्तियोगं सः लभते** इत्यनेन. उभयोः तात्पर्यं दर्शयन्ति **अत्र** इति. ‘‘**मामेव नैरपेक्ष्येण**’’

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

न उक्तानुपपत्तिः इति. न पुरुषोत्तमत्वतद्विध्युद्देश्यत्वानुपपत्तिः. टीकायां **दृष्टान्तेन विविनक्ति** इति. मन्त्रादिसम्बन्धिनि भक्तित्वं निराकर्तुं तदुक्तेः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

भगवदीयत्वात् परब्रह्मात्मकत्वमेव उपक्रम्य पठितत्वेन तथात्वात् तत्सम्बन्धि [2]मन्त्रसम्बन्धि सर्वम् अर्चनपुरश्चरणादिकं भक्तिरूपम् इति न उक्तानुपपत्तिः न उपास्ये पुरुषोत्तमत्वानुपपत्तिः न वा तद्विध्युद्देश्यत्वानुपपत्तिः इति अर्थः. अत्र समाधातुं प्रतिवादिनो अनाघ्रातमीमांसागन्धत्वं स्फुटीकुर्वन्ति हन्त इत्यादि. पाण्डुरमृत् कठिनी. **शुनः** इति. अन्तःसारासारानभिज्ञस्य. समादधते **श्रीमद्** इत्यादि. [3]‘सार्ष्टि’ समानैश्वर्यत्वम्. ‘नैरपेक्ष्येण’ फलाकांक्षाविरहेण.

---

१. निरपेक्षेण इति क्वचित्. २. कर्मसम्बन्धि इति ख. ३. सार्ष्टिम् इति ग.

अत्र पूर्वार्धे 'एव'कारेण पूर्वोक्तपूजाफलव्यवच्छेदपूर्वकं स्वस्य भक्तियोगफलत्वम् उक्तम् इति फलभेदादपि स्वरूपभेदः आयात्येव. उत्तरार्धे च पूजायाः साधनत्वं भक्तेश्च फलत्वञ्च इति स्पष्टएव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इत्यत्र 'एव'कारेण. उत्तरार्धे "**भक्तियोगं सः लभते**" इति वाक्ये. अतः

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

स्वरूपं दृष्टान्तेन स्फुटीकरोति इति अर्थः. मूले **फलभेदादपि स्वरूपभेदः आयाति** इति. कर्मभेदाध्याये यावज्जीवपादारम्भे विचारितं "**यावज्जीवम् अग्निहोत्रं जुहोति**" (   ) "**अग्निहोत्रं जुहुयात् स्वर्गकामः**" (मैत्रा.उप.६।३६) इति वाक्याभ्यां किं भिन्नं कर्म विधीयते उत काम्ये अग्निहोत्रएव यावज्जीवरूपकालसम्बन्धो धर्मो विधीयते उत नित्यकाम्यप्रयोगभेदो विधीयते इति. तत्र नामैक्याद् रूपैक्याद् भेदकान्तराभावाच्च कर्मभेदस्य वक्तुम् अशक्यत्वात् काम्याग्निहोत्रएव कालरूपो विधीयते इति पूर्वपक्षः. सिद्धान्तस्तु 'यावज्जीव'शब्दो न कालवाचकः किन्तु लक्षकः. वाच्यो अर्थस्तु [1]कृत्स्नजीवनम्. पुरुषधर्मः सः न कर्मधर्मत्वेन विधातुं शक्यः. अतः तं निमित्तीकृत्य प्रयोगो विधीयते. नच अग्निहोत्रानाम् अभ्यासः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

एवम् इति. नैरपेक्ष्येण. फलभेदादपि स्वरूपभेदो आयात्येव इति कर्मभेदाध्याये यावज्जीवपादे चिन्तितम्. "**अग्निहोत्रं जुहुयात् स्वर्गकामः**" (मैत्रा.उप.६।३६) "**यावज्जीवम् अग्निहोत्रं जुहोति**" (   ) इति वाक्याभ्यां किं भिन्नं कर्म विधीयते उत काम्याग्निहोत्रएव यावज्जीवरूपकालसम्बन्धो धर्मो विधीयते उत कर्मैक्येऽपि नित्यकाम्यप्रयोगभेदो विधीयते? इति सन्देहे नामैक्याद् रूपैक्याद् भेदकान्तराभावाच्च कर्मभेदस्य वक्तुम् अशक्यत्वात् काम्याग्निहोत्रएव यावज्जीवकालसम्बन्धो धर्मो विधीयते इति पूर्वपक्षः. राद्धान्तस्तु यावज्जीवशब्दो न कालवाचकः किन्तु कृत्स्नजीवनविशिष्टकाललक्षकः

---

[1] कृत्स्नजीवनपुरुषधर्मः इति क.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

कर्मभेदहेतुः निमित्तविशेषं पुरस्कृत्य [1]श्रुतत्वेन अविशेषपुनःश्रुतेः अभावात्. अतो जीवनस्य निमित्तत्वात् प्रयोगभेदः पर्यवस्यति. सति निमित्ते नैमित्तिकत्यागायोगाद् नित्यत्वं तस्य अर्थसिद्धम्. तस्माद् जीवननिमित्तत्वाद् नित्यकाम्यप्रयोगौ भिन्नौ इति. एवं सति यथा तत्र कर्माभेदेऽपि निमित्तभेदात् प्रयोगभेदे नित्यं काम्यम् इति स्वरूपभेदो अर्थसिद्धः तथा अत्र 'ब्रह्मलोक'पदसूचितकामनया 'नैरपेक्ष्य'पदोक्तेन तदभावेन च [2]पुरुषधर्मरूपनिमित्तभेदलाभाद् ऐक्यांगीकारेऽपि प्रयोगभेदसिद्धौ नित्यकाम्यवत् फलभेदात् स्वरूपभेदो न दुर्घटः इति अर्थः. भेदकान्तरम् आहुः **उत्तरार्धे** इत्यादि. एतद् निरूपणप्रयोजनकथनमुखेन स्वरूपभेदं दृढीकुर्वन्ति. **भगवद्...**इत्यादि

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तस्य वाच्यो अर्थस्तु कृत्स्नजीवनम्. पुरुषधर्मः सः न कर्मधर्मत्वेन विधातुं शक्यः. अतः तं निमित्तीकृत्य प्रयोगभेदो विधीयते. नच अग्निहोत्रनामाभ्यासः कर्मभेदहेतुः निमित्तविशेषं पुरस्कृत्य श्रुतत्वेन अविशेषपुनःश्रुतेः अभावात्. अतो जीवनस्य निमित्तत्वात् प्रयोगभेदः पर्यवस्यति. सति निमित्ते [3]नैमित्तिकत्यागायोगात् तस्य नित्यत्वम् अर्थसिद्धम्. तस्माद् नित्यकाम्यप्रयोगौ भिन्नौ इति. एवं सति यथा तत्र कर्माभेदेऽपि निमित्तभेदात् प्रयोगभेदएव फलं विध्यते इति फलभेदाद् नित्यं काम्यम् इति स्वरूपभेदो अर्थसिद्धः तथा अत्र [4]'ब्रह्मलोक'पदसूचितपुरुषधर्मरूपया कामनया 'नैरपेक्ष्य'पदोक्ततदभावेन च निमित्तेन पूजैक्येऽपि प्रयोगभेदसिद्धौ [5]नित्यकाम्यप्रयोगन्यायेन फलभेदात् स्वरूपभेदो अर्थादेव आयाति इति अर्थः. ग्रहिलत्वाद् आर्थिकभेदकानंगीकारे शाब्दं भेदकान्तरम् आहुः **उत्तरार्धे** इत्यादि. एतद् निरूपणप्रयोजनकथनमुखेन

---

१. विशेषपुनःश्रुतेः इति क. २. पुरुषधर्मरूपनिमित्तभेदलाभाद् इति द्वयोरपि पाठः. युज्यतेतु एवम्. ३. नैमित्तिकात्यागात् तस्य इति ख. ४. पुरुषधर्मरूपतया इति घ. ५. नैमित्तिकेऽपि इति ख. पूज्यैक्येऽपि इति ग.

पूजादे: भक्ते: भेद:. भगवत्स्वरूपातिरिक्तफलके कर्मणि ज्ञाने वा न भक्तित्वम्. भक्तौ च न स्वरूपातिरिक्तफलकत्वम्. अतो न पूजादि: भक्ति: इति निरूपणार्थमेव 'मामेव'इत्यादि निरूपितम् इति वेदितव्यम्. अन्यथा पूजाप्रकरणे तन्निरूपणम् असंगतं स्यात्. ''यत् कर्मभि: यत् तपसा ज्ञानवैराग्यतश्च यद्, योगेन दानधर्मेण श्रेयोभि: इतरैरपि, सर्वं मद्भक्तियोगेन मद्भक्तो लभते अञ्जसा'' (भाग.पुरा.११।२०।-३२-३३) इतितु भक्तिसाध्यं न अन्येन सिद्ध्यति अन्यसाध्यं भक्ते: आनुषंगिकम् इति कथनार्थं, कल्पतरुस्वभावत्वज्ञापनाय च उक्तम्. अग्रे ''स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति'' (भाग.पुरा.११।२०।-३३) इति वचनात्. तेन भक्तिरेव कार्या न अन्यद् इति फलितं

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इति. यत: स्वरूपफलकत्वं निरपेक्षभक्तियोगस्यैव. यदि पूजादिकमपि भक्तित्वेन अभिमतं स्यात् तदा **''अनेन मां विदन्ति''** इत्येव ब्रूयात्. **''मामेव नैरपेक्ष्येण''** इति पार्थक्येन वचनम् अन्यसाधननिरूपणावसरे निरर्थकं स्यात्. किञ्च यदि केवलभक्ते: कुत्रापि असामर्थ्यं भवेत् तदा सहायभूतत्वेनापि कर्मादीनां भक्तित्वं शंक्येत. तच्च सुतरां न अस्ति इति आहु:

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

स्याद् इत्यन्तम्. तदेतत् सर्वं हृदि कृत्वा टीकायाम् आहु: **यदि** इत्यादि **निरर्थकं स्याद्** इत्यन्तम्. तथाच एवं सिद्धे स्वरूपभेदे पूजाया: भक्तित्वाभावाद् न तत्र साक्षाद् भगवत: उद्देश्यत्वम् इति भाव:. अग्रिमं विवृण्वन्ति **किञ्च** इत्यादि. ननु फलभेदो अत्र न स्वरूपभेदापादक:.

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

स्वरूपभेदं दृढीकुर्वन्ति **भगवद्**...इत्यादि **स्याद्** इत्यन्तम्. तथाच एवं सिद्धे स्वरूपभेदे उपासनादिमार्गीयपूजाया: भक्तित्वाभावाद् न तद्विधौ साक्षाद् भगवत: उद्देश्यत्वम् इति भाव:. ननु फलभेदो न स्वरूपभेदापादक: **''यत् कर्मभि:''** इति वाक्ये भक्तेरेव फलान्तरकथनाद् इति आशंकायाम् आहु: **यत् कर्मभि:** इत्यादि. अग्रे इत्यादिना उक्तो हेतु: **तर्कपर्यवसायी.**

भवति. ''दानव्रततपोहोमजपस्वाध्यायसंयमैः श्रेयोभिः विविधैः च अन्यैः कृष्णे भक्तिः हि साध्यते'' (भाग.पुरा.१०।४७।२४) इति वाक्याच्च

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

''**यत् कर्मभिः**'' इति भक्तेरेव फलान्तरकथनादिति शंकातु मूलेनैव आपास्ता अन्यथा 'स्वर्गापवर्गम्' इत्यादेः वैयर्थ्यापत्तेः इति. ''**यत् कर्मभिः**'' इत्यादिकथनस्य **प्रयोजनम्** आहुः मूले **तेन** इत्यादिना. तथाच अत्र आनुषंगिकत्वेन फलान्तरकथनात् तत्र च तस्य मुख्यत्वेन कथनाद् अत्रापि फलभेदस्य स्वरूपभेदसाधकत्वं न दुर्घटम् इति अर्थः. पूजादेः भक्तित्वे व्युदस्ते मा अस्तु तस्याः तथात्वम्. जपादेस्तु तथात्वे बाधकाभावः इति आकांक्षायां मन्त्रजपादेः भक्तित्वं व्युदस्यन्ति **दान**...इत्यादि. ''**मदर्थे अर्थपरित्यागः**'' (भाग.पुरा.११।१९।२३) इति सन्दर्भे अर्थत्यागादितपोन्तेषु अंगचेष्टया पूजायाअपि उक्तत्वात् तस्याः भक्तित्वम् आशंक्य परिहरन्ति **भगवदर्थम्**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

यदि भक्तेः कल्पतरुस्वभावत्वं न अभिप्रेयात् 'स्वर्गापवर्गः' इत्यत्र 'कथञ्चित्' पदं न वदेत्. स्वर्गेत्याद्यर्द्धमेव वा न ब्रूयाद् इति. ननु प्रयोजनम् अन्तरेण तथा स्वभावज्ञापनमपि अनर्थकम् अतो न तथा इति आशंकायां तदुक्तिप्रयोजनम् आहुः तेन इत्यादि. ''**उद्यतस्यहि कामस्य प्रतिवादो न** [1]**शस्यते**'' (भाग.पुरा.३।२२।१२) इति तदौत्कण्ठ्येऽपि तदर्थं साधनान्तरं न विधेयं किन्तु कर्दमवद् भक्तिरेव कार्या इति अर्थः. तथाच अत्र आनुषंगिकत्वेन फलान्तरं कथ्यते [2]नतु मुख्यत्वेन इति फलभेदस्य मुख्यत्वेन [3]विशेषणे अत्रापि तस्य स्वरूपभेदसाधकत्वम् अनिवार्यम् इति भावः. ननु फलान्तरकथनाद् मा अस्तु पूजायां [4]भक्तित्वं मन्त्रजपादेस्तु तथात्वं केन वार्येत इति आकांक्षायां तत्रापि एतत्तुल्यकक्षत्वाद् भक्तित्वाभावम् आहुः **दान** इत्यादि. ''**मदर्थे अर्थपरित्यागः**'' (भाग.पुरा.११।१९।२३) इति सन्दर्भे अर्थत्यागादितपोन्तेषु अंगचेष्टापदेन पूजायाअपि संग्रहीतुं शक्यत्वाद् भगवदर्थाया:

---

[1] शक्यते इति क. ग. [2] तत्रतु मुख्यत्वेन इत्यादि क. [3] विशेषणापि इति ख. [4] तथात्वम् इति ख.

न मन्त्रजपादेः भक्तित्वम्. भगवदर्थमेव कृता भगवत्पूजा भक्तिः भविष्यति इति आशंकानिरासाय उत्तरार्धे तादृश्याः तस्याः तत्साधनत्वम् उक्तम्. अन्यथा पूजादिना इत्यादिना विरोधः स्यात्. एतेन लोके शास्त्रे वा क्वचित् तादृश्यां तस्यां 'भक्ति'पदप्रयोगः औपचारिकः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

"**यत् कर्मभिः**" इति. उत्तरार्धे "**एवं धर्मैः मनुष्याणाम्**" (भाग.पुरा.११।१९।-२४) इत्यत्र. अन्यथा इति. पूजादीनां देवतोद्देशेनैव प्राप्तत्वाद् नान्तरीयकतदर्थित्वसद्भावमात्रेण भक्तित्वोक्तौ पूजादिना इत्यादि असंगतं स्याद् इति अर्थः. अतादृश्याः तत्त्वेन शाब्दव्यवहारस्तु अन्यथापि उपपद्यतएव इति आहुः **एतेन** इति. एवं "**यः पूजयेत माम्**" (भाग.पुरा.११।२७।५३) इत्यत्र द्वितीयया कर्मत्वं पुरुषोत्तमे प्राप्तं कथम् अपोद्यते

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इत्यादि. 'उत्तरार्ध'पदस्य संदिग्धत्वात् टीकायां तदर्थम् आहुः **एवं धर्मैः** इत्यादि. [1]यद्यपि "**एवं यः पूजयेत माम्**" (भाग.पुरा.११।२७।५३) इत्यत्र **एवम्** इत्यनेन पूर्वार्धोक्तभक्त्यतिदेशाद् नैरपेक्ष्यप्राप्तौ पूजायाअपि भगवदर्थत्वं प्राप्यते, तथापि न कण्ठोक्तम्. ऊनविंशाध्यायसन्दर्भेतु कण्ठोक्तम्. अतएव उक्तम्. **नान्तरीयक...**इति. भक्त्यविनाभूतः इति अर्थः. ननु भगवदर्थायां पूजायां सर्वत्र 'भक्ति'पदं प्रयुज्यते तस्य का गतिः? इति अपेक्षायां तत्साधनाय वदन्ति इति आहुः **अतादृश्याः** इत्यादि. "**भक्तियोगं सः लभते**" (भाग.पुरा.११।२७।५३) इति वाक्यविचारे पुरुषोत्तमस्य अर्चनविध्युद्देश्यत्वम् अक्षुण्णम् इति शंकायां वदन्ति इति आशयेन आहुः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तस्याः भक्तित्वम् आशंक्य परिहरन्ति **भगवदर्थ...** इत्यादि. तेन फलितम् आहुः **एतेन** इत्यादि. ननु मा अस्तु पूजायाः भक्तित्वं तथापि "**भक्तियोगं सः लभते**" (भाग.पुरा.११।२७।५३) इति वाक्यविचारे पुरुषोत्तमस्य पूजाकर्मत्वबोधनाद् अर्चनविध्युद्देश्यत्वं न हीयते इति प्रतिज्ञाहानिः अनिवार्या इत्यतः आहुः **नच** इत्यादि. तथाच अन्यथानुपपत्या अत्र लक्षणैः

---

[1] यद्यपि इति न अस्ति क.

इति ज्ञापितम्. नच 'माम्'इति पदेन पूजायाअपि विषय: पुरुषोत्तमएव इति वाच्यं, विभूतिरूपस्यापि भगवद्रूपत्वात् [१]तथा उक्तम्. पुरुषोत्तमत्वे बाधकम् उक्तमेव मन्त्रशास्त्रे इत्यादिना. अन्यफलाद्यनुसन्धानराहित्यपूर्वकं भगवद्भावनायां क्रियमाणायां पुरुषोत्तमावेशोऽपि अन्त:करणे पूज्ये च भवतीति ज्ञापनाय वा 'माम्'इति उक्तम्. अतएव भक्ति:

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इति आशंक्या आहु: नच इति. **विभूतिरूपस्य** इति. अवान्तरप्रलये अम्भसि शयानस्य ब्रह्मणो 'नारायण'पदवाच्यत्वं यथा-तथा अत्रापि इति भाव:. **बाधकम्** अनर्थहेतुत्वं वशीकरणादौ. प्रकारान्तरेणापि कर्मत्वम् उपपादयन्ति **अन्यफल...** इति. **अतएव** इति. यत: आविष्टपुरुषोत्तमे आविष्टपुरुषोत्तमस्य

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

एवम् इत्यादि. उक्तव्याख्याने [२]लक्षणादोषाद् आहु: **प्रकारान्तर...** इत्यादि. तथाच विभूते: आवेशस्य वा द्वारत्वाद् न साक्षाद् उद्देश्यत्वं पुरुषोत्तमस्येति न अनेन वाक्येनापि तत्सिद्धि: इति मूलाशय:. **आविष्टपुरुषोत्तमे**

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

वा आदरणीय: इति अर्थ:. ननु तथापि प्रकृतवाक्ये तात्पर्यानुपपत्तिगमकस्य अभावाद् बीजाभावेन अत्र लक्षणानुपपन्नैव इति आकांक्षायां पक्षान्तरम् आहु: **अन्य...**इत्यादि. तथाच मा अस्तु लक्षणा [३]तथापि आवेशस्यैव [४]द्वारत्वाद् न पुरुषोत्तमस्य साक्षाद् उद्देश्यत्वसिद्धिरिति न प्रतिज्ञाहानि: इति अर्थ:. ननु आवेशएव अत्र अभिप्रेत: इत्यत्र किं गमकम्? इत्यत: आहु: **अतएव** इत्यादि. आवेशद्वारकत्वादेव निरपेक्षपूजया भक्ति: फलिष्यति. तथाच फलमेव आवेशगमकम्. अन्यथा भक्ताविव अत्रापि स्वप्राप्तिरेव फलत्वेन उक्ता: स्याद् अत: तथा इति अर्थ:. ननु पुरुषोत्तमस्य यदि उद्देश्यतयापि न सम्बन्ध: तर्हि [५]भावनया आवेशोऽपि कथं भवेद्?

---

१. तथोक्ते: इति क्वचित्. २. लक्षणदोषाद् आहु: इति क. ३. तथापि आवेशस्य च अभावाद् न पुरुषोत्तमस्य इति ख. ४. द्वारेत्यारभ्य तथाच निरपेक्षभक्तियोगे स्वस्य इत्यन्तो ग्रन्थो न अस्ति. ग. ५. भावनापि तस्य कथं भवेद् इति ख.

तया फलिष्यति ''यमेव एषः वृणुते'' (कठोप.१।२।२३, मुण्ड.उप.३।२-।३) इति श्रुतेः तदैव तद्वरणात्. [1]अत्र अधिकारिभेदेन पूजाफलभेदोक्त्या 'यमेव' इति श्रुतौ कर्मज्ञानभक्तिषु निःशंकं फलार्थिप्रवृत्तिः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

कृतिः अतः तया भावनया विषयस्वाभाव्याद् भक्तिः फलं भवति न अन्यद् इति अर्थः. **तदैव** इति. यदैव पुरुषोत्तमविषयभावना तदैव ततः पूर्वमेव तद्वरणात् तद्वरणफलास्तित्वनिश्चयाद् इति अर्थः. **अत्र** इति. पुरुषोत्तमभावनाभावितत्वाभावितत्वाभ्याम् अधिकारिविशेषणाभ्याम् अधिकारि-

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति. पूज्ये इति शेषः. मूले अत्र **अधिकारि...** इति [2]**फक्किकायां श्रुतौ** इति पदम् **इति अनुपपत्तिः** इत्यनेन सम्बध्यते. **श्रुतौ 'यमेव'** इति सामान्योक्त्या [3]स्वविषयकानुग्रहास्तित्वनिश्चयाभावेन [4]लाभनिश्चयाभावे

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

इति आकांक्षायाम् आहुः **यमेव** इत्यादि. **तदैव** इति. निरपेक्षपूजनेच्छाऽव्यवहित-पूर्वकालएव. तथाच तादृशेच्छारूपकार्येण वरणानुमानात् तेन आवेशः इति अर्थः. ननु लोकानां नानासाधनेषु प्रवृत्तिदर्शनाद् भगवत्पूजादिषु कस्यचिद् या प्रवृत्तिः सा वरणहेतुकैव वक्तव्या. **एवं निश्चिते वरणे 'यमेव' इति श्रुतौ** स्वलाभस्यैव फलत्वेन कथनाद् यथा कथञ्चित् पूजायां प्रवृत्तस्यापि भगवत्प्राप्तिरेव भवित्री इति निश्चये कर्मज्ञानभक्तिषु फलान्तरं शृण्वतः तत्तत्फलेच्छोः निःशंका प्रवृत्तिः न स्यात्. सशंकं प्रवृत्तौ च फलमपि न स्यात्, ''**संशयात्मा विनश्यति**'' (भग.गीता ४।४०) इति वाक्यात्. अतः श्रुतिविरुद्धा कथम् अत्र पूजाफलभेदोक्तिः ? इति आकांक्षायाम् आहुः **अत्र** इत्यादि. **श्रुतौ** या उक्तरूपानुपपत्तिः सा उक्तरीतिकफलभेदोक्त्या निरस्ता इति अन्वयः. तथाच प्रवृत्तिः वरणहेतुकत्वेऽपि

---

[1] अधिकारभेदेन इति सर्वत्र उपलब्धेषु पुस्तकेषु पाठः. भक्तितरंगिण्यनुरोधेनतु एवम्. [2] तट्टीकायाम् इति क. [3] निश्चयाभावे इति क. [4] लाभनिश्चयाभावे इति नास्ति क.

अनुपपन्न: इति अनुपपत्ति: निरस्ता वेदितव्या. कर्मादिविधिषु विविधफलश्रवणात् तत्तत्फलरागवान् तत्र-तत्र यतिष्यते इति उपपत्ते:. ननु एवं पुरुषोत्तमार्थिप्रवृत्त्यनुपपत्ति:, मा एवम्, तदर्थित्वस्यैव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

-द्वैविध्यनिबन्धन: पूजाफलभेद: पुरुषोत्तमविषयत्वे भक्तिफलकत्वम् अन्यथा पूर्वोक्तब्रह्मलोकादिफलकत्वम् इति विवेकादि 'यमेव' इति सामान्योद्देश्येन साधनश्रमवैयर्थ्यम् आशंक्य त्रिष्वपि तत्तत्फलार्थिनां प्रवृत्ति: न उपपद्यते इति शंकानुदयो अधिकारिविशेषनिश्चयादेव इति भाव:. **कर्मादिविधिषु** इति. चोदनावाक्येषु इति अर्थ:. स्वविषयकवरणास्तित्वानिश्चयात्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

लाभोपायभूतेषु कर्मज्ञानादिषु तथा इति अर्थ:. इदञ्च अनुग्रहस्य सत्फलमात्रं प्रति कारणत्वं मनसि कृत्वा उक्तम्. अन्यथा तृतीयमार्गएव प्रवेशयेद्

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

तत्तत्फलरागानुमितेश्वरेच्छाया: प्रतिबन्धकत्वेन सहकारिविरहाद् अधिकारे रागेण भिन्ने सुखेन तत्र [1]प्रवृत्त्युपपत्ति: इति आशयेन पूजाफलभेदोक्ति: इति अर्थ:. [2]अत्र पुन: आशंकते ननु इत्यादि. एवम् इच्छाविशेषस्य प्रतिबन्धकत्वसहकारित्वांगीकारे सहकारिवैशिष्ट्यादे: ज्ञातुम् अशक्यत्वेन तथा इति अर्थ:. यद्वा, ननु [3]फलान्तरानपेक्षया भगवद्भावनायां 'यमेव' इति श्रुत्या वरणानुमानं यद् उक्तं तद् न युक्तं, "योगा: त्रयो" (भाग.पुरा.११।२०।६) इत्यादिना श्रेय:साधनत्वेन विहितेषु कर्मज्ञानभक्तिरूपेषु साधनेषु प्रवर्त्स्यमानस्य तच्छ्रुतिश्रवणेन स्वविषयकवरणास्तित्वसंशयोत्पत्त्या तेषु नि:शंकप्रवृत्तिविघातापातात्, सशंकप्रवृत्तौ च फलाभावप्रसंगात्. अत: सर्वश्रुतिविरुद्धम् एतद् अनुमानम् इत्यत: आहु: अत्र इत्यादि तथाच इष्टसाधनताज्ञानौत्कट्यादेव नि:शंकप्रवृत्त्युपपत्ते: श्रुतिविरोधाभावेन तदनुमानं

---

१. प्रवृत्त्युपपत्ति: इति अर्थ: इति ख. २. अत्र इत्यत: आरभ्य सुखेन उपपत्ति: इति अर्थ: इति यावद् नास्ति ग्रन्थ: ख. गपुस्तके च नास्ति तथाच निरपेक्षभक्तियोगे स्वस्य इत्यन्तोंश:. तदत्र यथाबुद्धि: स्वयमेव शोध्यते. शोधनन्तु तत्स्थले ज्ञाप्यतैव.
३. फलान्तरानपेक्षयया इति क. शोधनन्तु एवम्.

वरणकार्यत्वात्. अन्यथा [१]तदनुत्पत्तेः. वरणे च अस्ति प्रकारद्वयं मर्यादापुष्टिभेदेन. आद्यस्तु तत्साधने भवति प्रवृत्तः तथैव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

पुरुषोत्तमभजनं न उपपद्यते इति आशंक्या आह **ननु** इति. **यदेव वरणकार्यं** निश्चायकं कारणस्य तस्य पुरुषोत्तमार्थित्वस्य स्फुटम् उपलम्भाद् इति अर्थः. **अन्यथा** इति कारणम् अन्तरेणैव कार्योत्पत्तेः आकस्मिकत्वं च आपद्येत इति भावः. ननु कुत्रचिद् वरणकार्यपुरुषोत्तमार्थित्वं विनापि स्वतः सम्बन्धः पुरुषोत्तमे दृश्यते. तस्य च अवश्यं कारणपूर्वकत्वं वाच्यं, तच्च प्रकृते तदर्थित्वम् अन्तरेण अनुपपन्नम् इत्यतः आहुः **वरणे च** इति.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति. **इति उपपत्तेः** इति. उक्तश्रुतौ आत्मलाभस्यैव [२]वरणसाध्यत्वेन कण्ठतः उक्तत्वाद् उपपत्तेः इति अर्थः. तदेतद् विवृण्वन्ति **अत्र** इत्यारभ्य **इति अर्थः** इत्यन्तम्. [३]अग्रिमशंकातात्पर्यम् आहुः **स्वविषयकः** इत्यादि. तदर्थित्वेत्यादिना उक्तं हेतुं व्याचक्षते **यदेव** इत्यादिना. तथाच कार्येण [४]वरणानुमाने सुखेनैव प्रवृत्त्युपपत्तिः इति अर्थः. ननु तदर्थित्वस्य वरणकार्यत्वे किं मानम् अतः आहुः **अन्यथा** इति. वरणाभावेऽपि तदर्थित्वांगीकारे. तथाच अर्थापत्तिरेव मानम् इति अर्थः. अग्रिमम् अवतारयन्ति **ननु** इत्यादि. **दृश्यते** इति. व्रजस्थेषु दृश्यते. मूले **तत्साधने** इति. भगवत्प्राप्त्युपायभूत-

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

युक्तमेव इति अर्थः. अत्र पुनः आशंकते **ननु** इत्यादि. तथाच निरपेक्षभक्तियोगे स्वस्य फलत्वेन कथनात् तत्र प्रवर्त्स्यमानस्य एतच्छ्रुतिश्रवणे विरोधप्रतिसन्धानात् तत्प्रवृत्त्यनुपपत्तिः वज्रलेपायितः इति अर्थः. तत्र समादधते **मा एवम्** इत्यादि. तथाच कार्येणैव कारणसामग्र्यनुमानात् सुखेन उपपत्तिः इति अर्थः. ननु एवं कार्येण चेत्, सामग्र्यनुमितिः तदा [५]पुरुषोत्तमार्थी भक्तावेव

---

[१] तदनुपपत्तेः इति क्वचित्. [२] शरणसाध्यत्वेन अन्ते उक्तत्वाद् इति क. [३] अत्र इदं शंकातात्पर्यम् इति क. [४] चरणानुमाने इति क. [५] पुरुषोत्तमस्य भक्तावेव इति ख.

तद्वरणात्. परन्तु स्नेहोत्पत्तिपर्यन्तं विधिरेव तत्र प्रयोजक: तदुत्पत्त्यनन्तरं च रागादेव तत्सम्बन्धिपदार्थे यतिष्यते इति विधे: अप्रयोजकत्वम्. द्वितीयस्यतु प्रवृत्त्यप्रवृत्ती अप्रयोजिके, [१]भगवता स्वस्यैव साधनत्वेन अंगीकारात्. अतएव ''अहन्यापृतं निशि शयानम् अतिश्रमेण'' (भाग.पुरा.२।७।३१) इति गोकुलविशेषणं द्वितीयस्कन्धे ब्रह्मणा उक्तम् इति सर्वम् अवदातम्. किञ्च, विष्णुविषयकत्वेनैव भक्तित्वे

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

साधने प्रवर्त्य तदनुरूपफलदानम् आस्नेहोपत्ते: इति मर्यादामार्गस्वरूपम्. **द्वितीयस्य** इति. यद्यपि प्रथमेऽपि स्वकृतप्रवृत्त्यप्रवृत्ती न स्वरूपसम्बन्धं कर्तुं शक्नुत: तथापि अवान्तरकृतिरपि द्वितीये न अपेक्षितइति वैलक्षण्यम्. अनुग्रहस्तु उभयत्रापि आदिकारणत्वेन सर्वैरपि अंगीकार्यएव. ''यदि

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

-स्नेहोत्पादके साधने **तथैव** इति. ''साधनद्वारैव भक्तिं माञ्च प्राप्नोतु'' इति इच्छा इति अर्थ:. किञ्च इत्यादिग्रन्थम् अवतारयन्ति **यदि** इत्यादि.

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

प्रवर्त्स्यति न कर्मादौ. भगवता च [२]मार्गत्रयं न उच्येत इति आकांक्षायां तत्समाधानाय आहु: **वरणे** इत्यादि **अवदातम्** इत्यन्तम्. **तत्साधने** इति. भगवत्प्राप्त्युपायभूते ज्ञानकर्मादिरूपे साधने. **तथैव** इति ''साधनद्वारैव [३]मां भक्तिं वा प्राप्नोतु'' इत्याद्याकारिकया इच्छया. तादृशे वरणे [४]प्रनाडीं बोधयन्ति **परन्तु** इत्यादि. अत्र उदाहरणभूता **अम्बरीषादय:**. शेषं स्फुटमेव. [५]तथाच सामग्रीज्ञानसत्त्वेन तस्य तथा प्रवृत्ति: सुखेन उपपद्यतइति न कोऽपि शंकालेश: इति अर्थ:. तदेतद् उक्तं [६]**सर्वम् अवदातम्** इत्यनेन. एवं मन्त्रादे: भगवदीयत्वेन भक्तित्वं शंकमान: समाहितोऽपि पूजादौ

---

१. प्रभुणेत्यपि क्वचित्. २. मार्गक्रमो न उच्येत इति आकांक्षायाम् इति ख. ३. मां भक्त: प्राप्नोतु इति आद्याकारिका इच्छया इति ख. ४. प्रणाडीम् इति क. ग. ५. तथा सामग्रीज्ञानाभावे तस्य तस्य तथा तथा प्रवृत्ति: सुखेन इत्यादि क. ६. इत्यन्तेन इति ग.

कर्मांगत्वेन क्रियमाणविष्णुस्मरणादेरपि भक्तित्वापत्तिः. कर्ममार्गीयत्वाद् न तथा. पूर्वोक्तन्यायेन विभूतिरूपस्यैव विष्णोः स्मरणादेः तत्र विहितत्वात्

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

वाग्यमलोपः स्याद् जपादिषु कथञ्चन, व्याहरेद् वैष्णवं मन्त्रं स्मरेद् वा विष्णुम् अव्ययम्'' (   ) इत्यादिविहितभगवद्व्याहरणस्मरणादेः एकविषयत्वाद् भक्तित्वम् आशंक्य मार्गभेदेन भक्तित्वाभावम् उपपादयन्तः सोपपत्तिकं प्रमाणानि दर्शयन्ति **किञ्च** इत्यादिना. **एतेन** इति.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

मूले **कर्ममार्गीयत्वाद् न तथा** इति. पारार्थ्यस्य शेषलक्षणत्वेन कर्मशेषस्यापि भक्तित्वे **''योगाः त्रयो मया प्रोक्ताः''** (भाग.पुरा.११।२०।६) इत्यत्र उक्तं मार्गत्रित्वं बाध्येत, अंगत्वेन सांकर्यस्य तत्र-तत्र दर्शनात्. अतो मार्गभेदो अवश्यम् अभ्युपेयः. अतएव तादृशस्मरणादिकरणे 'भजते' इति न प्रयुज्यते इत्यपि अनुसन्धेयम्. पूर्वोक्तं रूपभेदं द्रढयितुं तमेव स्मारयन्ति **पूर्वोक्तन्यायेन** इत्यादि. पूर्वोक्तन्यायः सिद्धत्वादिना विशिष्टत्वम्. द्रढयन्ति **कर्म** इत्यादि **वदेद्** इत्यन्तम्. ननु **''यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पाण्डवः''** (भाग.पुरा.१०।७०।४१) इति नारदवाक्याद्, **''मां यजन्तो अध्वरैः युक्ताः''** (भाग.पुरा.१०।७३।२१) इति जरासुतरुद्धराज्ञः प्रति भगवद्वाक्याच्च न उक्तं साम्प्रतम् इति चेद्, न **''एवं यः पूजयेत्त माम्''**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

'भक्ति'पदप्रयोगस्य गौणत्वम् अमन्वानः पुनः प्रत्यवतिष्ठेदिति तत्र प्रयोगस्य गौणत्वं द्रढयितुं दूषणान्तरम् आहुः **किञ्च** इत्यादि. **कर्ममार्गीयत्वाद् न तथा** इति. पारार्थ्यस्य शेषलक्षणत्वेन कर्मशेषस्यापि भक्तित्वे **''योगाः त्रयो मया प्रोक्ताः''** (भाग.पुरा.११।२०।६) इत्यत्र उक्तं त्रित्वं बाध्येत, अंगसांकर्यस्य तत्र-तत्र दर्शनात्. तादृशे स्मरणे क्रियमाणे 'भजति' इत्यपि प्रयुज्येत. तत्तु न दृश्यते. अतो विष्णुविषयकत्वरूपलिंगापेक्षया प्रकरणस्यैव बलवत्वाद् न तथा इति अर्थः. एतदुपष्टम्भाय सिंहावलोकनेन पूर्वोक्तं स्मारयन्ति **पूर्वोक्त**...इत्यादि. पूर्वोक्तन्यायश्च सर्वाविशिष्टत्वाभावः. ननु

च न तथा, कर्ममार्गे भगवद्विभूतीनामेव इज्यत्वात्. अतएव राजसूयं चिकीर्षुणा धर्मराजेन प्रभुं प्रति विज्ञापितं ‘‘यक्षे विभूती: भवत: तत् सम्पादय: न प्रभो’’ (भाग.पुरा.१०।७२।३) इति, अन्यथा साक्षाद् हरिं विज्ञापयन् ‘त्वाम्’ इत्येव वदेत्. एतेन भगवदिच्छायां सत्यामेव भक्तस्य कर्मकरणम्. तत्र च उक्तानां देवानां तद्विभूतित्वेनैव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

यक्षे विभूती: इत्यादिप्रमाणै: कर्ममार्गे विभूतीनामेव विषयत्वमिति एवं विदुषो भक्तस्य प्रार्थनया प्रभ्विच्छाभिज्ञानएव भक्तिसमयसंकोचेन कर्माचरणम्.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

(भाग.पुरा.११।२७।५३) इत्यत्रेव अत्रापि विभूतिरूपस्य भगवद्रूपत्वम् अभिप्रेत्यैव तथा उक्ते: तत्र देवेष्वेव कर्मसचिवत्वस्य दर्शनात् [1]प्रैषयाज्यापुरोवाक्यात् त्यागादिभि: तथा निश्चयात्, साक्षात्पुरुषोत्तमपरत्वे विध्यपराधाभावेन प्रायश्चित्तविधिवैयर्थ्यप्रसक्ते:, **‘‘न रोधयति मां योगो न सांख्यं धर्म: उद्धव!’’** (भाग.पुरा.११।१२।१) इति पूर्वोक्तभगवद्वाक्यविरोधाच्च. एवञ्च **‘‘विष्णु: उपांशु यष्टव्य:’’** (   ) **‘‘त्रेधा तन्दुलान् विभजेद् ये मध्यमा: स्यु: तान् अग्नये दात्रे पुरोडाशम् अष्टाकपालं कुर्याद्, ये स्थविष्ठा: तान् इन्द्राय प्रदात्रे दधंश्चरुं, ये अणिष्ठा: तान् विष्णवे [2]शिपिविष्टाय शृते चरुम्’’** (तैत्ति.संहि.२।५।५।२), **‘‘वैष्णवं**

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

कर्ममार्गस्य विभूतिपरत्वे उपासनायामिव **गमकं** न उपलभामहइति तत्र अस्तु भगवदुद्देश्यत्वम् इति शंकायां तस्य तथात्वे **गमकम्** आहु: **अतएवं** इत्यादि. **अतएव** इति. विभूतिपरत्वादेव. ननु अस्तु कर्ममार्गस्य विभूतिपरत्वं, तथापि भक्तस्य कर्मकरणे अनन्यत्वं तु भज्येतैव, इतरसाधननिष्ठाराहित्यपूर्वकभक्त्येकनिष्ठत्वस्यैव अनन्यतापदार्थत्वाद् इत्यत: आहु: एतेन इत्यादि. ननु **‘‘यक्ष्ये विभूती:’’** इति वाक्यमात्रेण कर्ममार्गस्य विभूतिपरत्वस्थापनम् अनुचितम्.

---

[1] पुरोनुवाक्यस्य आदिभि: इति ख. [2] शिपिविष्टाय इति वदेवेष्वेव कर्मसचिवत्वस्य दर्शनात्-प्रैषयाज्यापुरोक्याश्रुते चरुम् इति ख.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

यज्ञसन्तत्यै त्रिकपालं द्विजोत्तमाः, पुरोडाशं निरवपन् वीरसंसर्गशुद्धये'' (भाग.पुरा.४।७।१७) इत्यादिषु नामरूपसाम्येऽपि इतरतौल्याद् विशेषणाद् ''**धिया विशुद्धया दध्यौ**'' (भाग.पुरा.४।७।१८) इति कथनाच्च विभूतिपरत्वं न क्षुद्यते. तथा पञ्चमस्कन्धे ''**नाभिः अपत्यकामो अप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषम् अवहितात्मा अयजत**'' (भाग.पुरा.५।३।१) इत्युक्ते यागे यः परमपुरुषप्रादुर्भावः सोऽपि ''**तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीकः आत्मानम्**'' (भाग.पुरा.५।३।१) इत्यादिना **आविश्चकारः** इत्यन्तेन द्रव्यमन्त्राद्यगम्यत्वकथनपूर्वकं स्वीयवात्सल्येनैव उक्त इति न तेनापि यागादेः साक्षात्पुरुषोत्तमपरत्वं

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

''**यक्ष्यति त्वां मखेन्द्रेण**'' (भाग.पुरा.१०।१७।४१) इति राजसूयप्रकरणएव नारदवाक्याद् ''**मां यजन्तो अध्वरैः युक्ताः**'' (भाग.पुरा.१०।७३।२१) इति मागधरुद्धराज्ञः प्रति भगवद्वाक्याच्च इति चेद्, न. ''**एवं यः पूजयेत माम्**'' (भाग.पुरा.१०।२७।५३) इत्यत्रेव 'त्वाम्' इत्यत्रापि विभूतिरूपस्य भगवदभिन्नत्वम् अभिप्रेत्यैव तथोक्तेः यागे कर्मसचिवत्वस्य देवेष्वेव दर्शनात् [1]प्रैषयाज्यापुरोनुवाक्यादिभिः तथा निश्चयात्, साक्षात्पुरुषोत्तमपरत्वे [2]विध्यपराधाप्रसक्त्या प्रायश्चित्तविधिवैयर्थ्यापत्तेश्च ''**न रोधयति मां योगः**'' (भाग.पुरा.११।१२।१) इत्यादिपूर्वोक्तवाक्यविरोधाच्च. एवञ्च ''**विष्णुरुपांशु यष्टव्यः**'' (   ) इत्यत्रापि विभूतिरूपएव सः ''**विश्वदेवाः उपांशु यष्टव्याः**'' (   ) इत्यादिवाक्यदर्शनिन इतरतौल्यात्. एवम् अन्यत्रापि ज्ञेयम्. नच पञ्चमस्कन्धोक्तेः अपत्यकामस्य नाभेः यागे भगवतः प्रादुर्भावात् कथं विभूतिपरत्वम् इति शंक्यं तत्र भक्त्यै भगवदाविर्भावात्. ''**तस्य ह वाव श्रद्धया यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमो भगवान् भागवतवात्सल्यतया [3]सुप्रतीकः आत्मानम्**

---

[1] तन्निश्चयाद् इति ख. [2] विध्यपराधप्रसक्त्या इति ख. [3] सुप्रतीकआत्मानम् इति क. ग.

यागः. अन्यथा अनन्यत्वभंगप्रसंगः इति सूचितम्. अपरञ्च तत्तदुपासकस्य

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

नो चेद् “**मत्कर्मकृद् मत्परमः**” (भग.गीता ११।५५) “**अनन्यचेताः सततम्**” (भग.गीता ८।१४) “**अनन्याः चिन्तयन्तो माम्**” (भग.गीता ९।२२) इत्याभिः अप्राप्तावसरत्वादेव कर्मणाम् अप्राप्तेः उपस्थितभजनपरित्यागेन स्वामिद्रोहप्रसंगाद् असामञ्जस्यमेव इति ज्ञेयम्. फलभेदादपि कारणभेदो युक्तइति आहुः

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

सम्भावयितुं शक्यम्. एवमेव पृश्निसुतपः तपस्यपि ज्ञेयं तत्रापि “**तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः**” (भाग.पुरा.१०।३।३७) इति वाक्यदर्शनात्. एवं सिद्धे कर्मणां विभूतिपरत्वे यत्र तादृशवाक्याभावेऽपि प्रादुर्भावादिकथनं तत्रापि उक्तन्यायकएव शास्त्रार्थो बोध्यः. तदेतत् सर्वं मनसि कृत्वा मूले टीकायां च विभूतीनामेव इति ‘एव’कारः उक्तः. टीकायां **कारणभेदः** इति. तत्तत्फलकारणीभूतानाम् उपासनादीनां भक्तेः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

आविश्कारः” (भाग.पुरा.५।३।२) इति कथनात्. एवमेव पृश्निसुतपः तपस्यपि ज्ञेयं तत्रापि “**तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः**” (भाग.पुरा.१०।३।३७)इति वाक्यात्. एवं सिद्धे कर्मणां विभूतिपरत्वे यत्र तादृशवाक्याभावः तत्रापि प्रादुर्भावहेतुत्वेन [1]भक्तिः कल्प्या इति दिक्. [2]भगवदिच्छा च स्वस्य साधनसम्पत्यनन्तरं तत्कर्मकरणेच्छोत्पत्तौ भगवद्विज्ञापने तदनुकूलसम्भारारम्भणादौ विघ्नाभावाद् भगवद्भक्ताज्ञादिभिः बोध्या. ननु अस्तु कर्मादीनां विभूतिपरत्वं तथापि “**यथा अद्रिप्रभवा नद्यः**” (भाग.पुरा.१०।४०-१०) इति वाक्याद् अन्ततः तैरपि भगवतएव प्राप्तिरिति फलतो विशेषाभावात् तथात्वेऽपि दोषः इति शंकायां तैः विलम्बं तेषां प्रतिबन्धग्रस्तत्वं च वक्तुं ज्ञानमार्गस्यापि क्लेशसाध्यत्वाद् भक्तेः सकाशाद् न्यूनत्वं च वक्तुं सकामकर्मणो अतिजघन्यत्वं च वक्तुम् आहुः अपरञ्च इत्यादि

---

[1] भक्तिः इति नास्ति ख. [2] भगवद् इत्यतः आरभ्यः इत्यादिना इति इति प्रतीकपर्यन्तो ग्रन्थो नास्ति क.

तत्तत्सायुज्यं परमफलं, ‘‘देवान् देवयजो यान्ति’’ (भग.गीता ७।२३) इति वाक्याद्, ‘‘यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं तं तमेव इति कौन्तेय! सदा तद्भावभावितः’’ (भग.गीता ८।६) इति वचनात्. एवञ्च सति एकादशस्कन्धे अस्मत्प्रभुणा ‘‘केवलेन हि भावेन गोप्यो गावः खगा मृगाः, ये अन्ये मूढधियो नागाः सिद्धा माम् इयुः अञ्जसा’’ (भाग.पुरा.११।१२।८) इति महता प्रबन्धेन गोकुलवासिनां स्वप्राप्तिं निरूप्य ‘‘यद् न योगेन सांख्येन दानव्रततपोध्वरैः व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद् यत्नवानपि’’ (भाग.पुरा.११।१२।९) इति इतरसाधनवदप्राप्यत्वं

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

सकाशाद् भेदः इति अर्थः. अपरञ्च इत्यादौ मूले **तत्तदुपासकस्य** इत्यनेन औत्तरतन्त्रः तत्क्रतुन्यायः स्मार्यते तत्र हि ‘‘**यथाक्रतुः अस्मिन् लोके पुरुषो भवति तथा इतः प्रेत्य भवति**’’ (छान्दो.उप.३।१४।१) इति श्रवणात्. तत्रापि नानादेवोपासकस्य फलव्यवस्थाबोधनाय द्वितीयं वाक्यं यं यं इत्यादि. तथाच्च तस्यापि [1] न भगवत्सायुज्यम् इति भावः. श्रौतस्मार्तानां योगादीनां भगवत्सायुज्यहेतुत्वं प्रतिक्षिपन्तः तेन इष्टसिद्धिम् आहुः एवञ्च इत्यादिना.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

निरूपितः इत्यन्तम्. अत्र तत्तदुपासकेत्यनेन औत्तरतन्त्रः तत्क्रतुन्यायः स्मार्यते तत्र ‘‘**यथाक्रतुः अस्मिन् लोके पुरुषो भवति तथा इतः प्रेत्य भवति**’’ (छान्दो.उप.३।१४।१) इति श्रवणात्. ‘‘**यं यं वापि**’’ (भग.गीता ८।६) इति द्वितीयवाक्येन नानादेवोपासकस्य [2] तत्त्वदीपानुसृता फलव्यवस्थाः उच्यते. तेन यावद् ‘‘**अधिकारम् आधिकारिकम्**’’ ( ) इति न्यायेन **विलम्बः** तेषाम् अभक्तत्वे पुनरावृत्तिश्च ‘‘**अन्तवत्तु फलं तेषाम्**’’ (भग.गीता ७।२३) इति वाक्यानुसारिणी बोध्यते. [3] एवञ्च सति इत्यादिना प्रसंगतो योगादीनामपि असाधकत्वं बोध्यते. तेन **रमते निजभक्तेषु** इति प्रतिज्ञातस्य प्रामाणिकत्वं दृढीक्रियते. **एवञ्च सति** इति. विभूतिपराणां

---

१. नेति नास्ति ख. २. तत्त्वदीपानुसृतापि अवस्थोच्यते इति ख. ३. एवञ्च इत्यादिः परम्परयापि न आगमनम् इति अन्तोंशो नास्ति ग.

स्वस्य निरूपितमिति भक्त्यतिरिक्तसाधनप्राप्यं न पुरुषोत्तमस्वरूपम् इति निश्चीयते. गीतासु च पार्थेन "एवं सततयुक्ताः ये भक्ताः त्वां पर्युपासते, ये चापि अक्षरम् अव्यक्तं तेषां के योगवित्तमाः" (भग.गीता १२।१) इति प्रश्ने कृते "मयि आवेश्य मनो ये मां नित्ययुक्ताः उपासते, श्रद्धया परया उपेताः ते मे युक्ततमाः मताः" (भग.गीता १२।२) इति भक्तिमार्गीयोपासनस्य ज्ञानमार्गाद् उत्कर्षम् उक्त्वा "येतु अक्षरम्" (भग.गीता १२।३) इत्यादिना ज्ञानमार्गिणाम् अपकर्षम् उक्तवान् भगवानिति न ज्ञानमार्गस्यापि पुरुषोत्तमविषयत्वम्. अत्र "ते प्राप्नुवन्ति मामेव" (भग.गीता १२।४) इत्यत्र अक्षरस्यापि पुरुषोत्तमाधिष्ठानत्वेन तद्विभूतिरूपत्वाद् 'माम्' इति उक्तम्. नच अक्षरमेव पुरुषोत्तमः इति वाच्यम्, "कूटस्थो अक्षरः उच्यते" (भग.गीता १५।१६) "उत्तमः पुरुषः तु अन्यः" (भग.गीता १५।१७), "अक्षरादपि च उत्तमः" (भग.गीता १५।१८) इति भगवद्वचनात्. कर्ममार्गोऽपि एवमेव ज्ञेयः. तथाहि, "याम् इमां पुष्पितां वाचं प्रवदन्ति अविपश्चितः वेदवादरताः पार्थ! न अन्यद् अस्ति इति वादिनः" (भग.गीता २।४२) इत्यादिना. "त्रैविद्याः मां सोमपाः पूतपापाः यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते, ते पुण्यम् आसाद्य सुरेन्द्रलोकम् अश्नन्ति दिव्यान् दिवि देवभोगान्, ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

एवञ्च सति इति. विभूतिपराणां फले उक्तवाक्याभ्यां निर्धारिते सति. तथाच तत्र तेषां फलं निर्धारितम्, अत्र स्वस्य अप्राप्यत्वम् उक्तम्. तेन तत्प्राप्यस्य विभूतित्वं तत्क्रतुन्यायादपि सिद्ध्यति इति अर्थः. ज्ञानमार्गस्यापि तथात्वाय गीतासु इत्यादिग्रन्थः. सकामकर्ममार्गस्य अतिजघन्यत्वाय अग्रिमः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

फले उक्तवाक्याभ्यां निर्धारिते सति. तत्र तेषां फलं निरधारि. अत्र स्वस्य अप्राप्यत्वम् अवादि. तेन तत्प्राप्यस्य विभूतित्वं तत्क्रतुन्यायादपि बोध्यते. गीतासु 'च' इत्यादिना ज्ञानमार्गस्यापि भक्तिमार्गापेक्षया न्यूनत्वं

विशन्ति. एवं त्रयीधर्मम् अनुप्रपन्ना: गतागतं कामकामा: लभन्ते''(भग.गीता - ९।२०-२१) इत्यादिभगवद्गीतासु, श्रीभागवते च ''अथ यो गृहमेधीयान् धर्मानेव आवसन् गृहे कामम् अर्थञ्च धर्मान् स्वान् दोग्धि भूय: पिपर्ति तान्, स: चापि भगवद्धर्मात् काममूढ: पराङ्मुख: यजते क्रतुभि: देवान् पितृंश्च श्रद्धयान्वित:... येतु इह आसक्तमनस: कर्मसु श्रद्धयान्विता: कुर्वन्ति अप्रतिषिद्धानि नित्यान्यपि च कृत्स्नश:, रजसा कुण्ठमनस: कामात्मानो अजितेन्द्रिया: पितृन् यजन्ति अनुदिनं गृहेषु अभिरताशया:, त्रैवर्गिका: ते पुरुषा: विमुखा: हरिमेधस:, कथाया: कथनीयोरुविक्रमस्य मधुद्विष:'' (भाग.पुरा.३।३२।१,१६-१८) इत्यादिना ''जायस्व म्रियस्व'' (छान्दो.-उप.५।१०।८) इति तृतीयमार्गप्रवेशो निरूपित: इति. ननु नवविधभक्तौ

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

अपरञ्च इति. स्पष्टं व्याख्यातप्रायं मूलएव. पूजाया: कर्मत्वेऽपि भक्तित्वं शंकते, **ननु** इति. पूर्वम् उक्तमपि प्रकारान्तरेण आहु: **अत्र** इति

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

कर्ममार्ग: इत्यादि: ग्रन्थ:. **टीकायां पूजाया:** इत्यादि. एवं भक्त्यतिरिक्तमार्गाप्राप्यत्वे पुरुषोत्तमस्य निर्णीते पूजाया: भक्तित्वेन पुरुषोत्तमप्रापकत्वं भक्तित्वापादनेन **शंकते** इति **अर्थ:**. तथाच उपासनां कर्मकाण्डं च आरभ्य अधीताया: भक्तित्वाभावेऽपि भक्त्यन्त:पातिन्या: तस्या: तदविलक्षणत्वात् तेन रूपेण अर्चनविधौ पुरुषोत्तमस्य उद्देश्यत्वं

श्रीमत्पुरुषोत्तमप्रणीतो विवेक:

बोध्यते. कर्ममार्गेत्यादिना च सकामकर्मण: परम्परयापि न आगमनं किन्तु अनिष्टपर्यवसायित्वम् इति निरूप्यते. एवमेव ज्ञेय: इत्यत्र हेतु: **इत्यादिना** इति. इत्यादिभगवद्गीतासु इत्यस्य **तृतीयमार्गप्रवेशो निरूपित:** इत्यनेन सम्बन्ध:. तेन भक्त्यतिरिक्तमार्गे भगवत: साक्षात् सम्बन्धाभावाद् न तद्विध्युद्देश्यत्वं भगवतइति **साधितम्**. तत्र पुन: प्रतिज्ञाहानिम् आपादयन् प्रत्यवतिष्ठते **ननु नव**... इत्यादि. **तथात्वम्** इति भक्तित्वम्.

अर्चनस्यापि उक्तत्वात् कथं न पूजायाः तथात्वम् इति चेद्, अत्र वदामः. श्रवणादिनवकमपि अधिकारीभेदेन क्रियमाणं सत् कर्म-

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

त्रयाणाम् असंकीर्णोदाहरणम् आहुः **तथाहि** इति. **तदा सः तथा** इति. सः श्रवणादिः तथा पूर्वोक्तकर्ममार्गीयएव इति अर्थः. यद्यपि

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

दुष्परिहरम् इति शंकाग्रन्थस्य आशयः. **प्रकारान्तरेण** इति. **नवविधभक्तीनां** स्वरूपविचारेण. एतासां लक्षणन्तु भगवद्वाचकपदवाक्यानां, भगवति शक्तितात्पर्यनिर्धारः 'श्रवणम्'. तादृशनिर्धारपूर्वकम् उच्चारणं 'कीर्तनम्'. तथैव स्वरूपचिन्तनं 'स्मरणम्'. 'पादसेवनं' परिचर्या. 'अर्चनं' पूजनम्. 'दास्यं' कर्मार्पणम्. 'सख्यं' तद्विश्वासादि. 'आत्मनिवेदनं' देहसमर्पणम्. **"यथा विक्रीतस्य गवाश्वादेः भरणपालनादिचिन्ता न क्रियते तथा देहं तस्मै समर्प्य तच्चिन्ता वर्जनम्"** (भाग.पुरा.श्रीधरी.७।५।-२३) इति श्रीधरीये. **अत्र** इति. अनया भंग्या पुरुषोत्तमोद्देश्यत्वशंकायां तस्याः भक्तिबहिर्भावाय **सर्वभक्तीनां स्वरूपभेदं ब्रूमः** इति अर्थः. मूले अधिकारभेदेन तत्तन्मार्गीयत्वं रूपभेदाभावेऽपि नित्यकाम्याग्निहोत्रन्यायेन स्वरूपभेदाद् बोध्यम्. तथा तात्पर्यनिर्णये फलस्यापि पृथक् प्रयोजकत्वात् तेनापि स्वरूपभेदो न दुरुपपादः. तेन भक्तौ फलान्तरनिरूपणं तस्याः कल्पतरुस्वभावत्वज्ञापनाय इति पूर्वं यद् उक्तं [१]तद् अत्र निष्कृष्यते. तथाच अयम् अर्थः. एकादशे विंशाध्याये भगवता कर्मज्ञानभक्त्याख्याः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तथाच उपासनां कर्मकाण्डं च आरभ्य अधीतायाः पूजायाः भक्तित्वाभावेऽपि नवविधभक्त्यन्तःपातिन्याः तस्याः [२]पूर्वोक्ताविलक्षणत्वाद् भक्तित्वेन रूपेण अर्चनविधौ पुरुषोत्तमस्य उद्देश्यत्वं दुष्परिहरं, सिद्धान्तिना श्रवणादिनवकस्य सर्वविशिष्टत्वेन पुरुषोत्तमपरत्वांगीकारात्. ततश्च प्रतिज्ञाहानिः वज्रलेपायिता इति अर्थः तथा समादधते **अत्र वदामः** इत्यादिना. अत्र

---

१. तद्दर्शनम् उच्यते इति क. २. पूर्वोक्तविलक्षणत्वाद् इति ख. पूर्वोक्तेत्यादिः अन्यथा चरणामृतेनापि इति अन्तोग्रन्थो नास्ति ग.

ज्ञानोपासनाभक्तिमार्गीयत्वेन अनेकविधं भवति. तथाहि श्रीभागवत-सहस्रनामादिश्रवणकीर्तनयोः फलत्वेन हि चत्वारोऽपि अर्थाः उच्यन्ते. तत्र त्रिवर्गकामेन क्रियमाणः श्रवणादिः कर्ममार्गीयएव. तत्रापि अर्थाद्यर्थिभिः विहितत्वेन कृतः चेत् तदा सः तथा. वृत्त्यर्थं चेत्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

त्रयो योगाः नृणां श्रेयोअर्थम् उक्ताः अधिकारिभेदेन निष्कृष्टाश्च. सप्तदशे च **“यथा अनुष्ठीयमानेन त्वयि भक्तिः नृणां भवेत्, स्वधर्मेण अरविन्दाक्ष! तन्मे व्याख्यातुम् अर्हसि”** (भाग.पुरा.११।१७।२) इति प्रश्ने चातुर्वर्ण्यचातुराश्रम्यधर्माः च उक्ताः. तथा सति भक्त्यर्थं कर्माणि पूर्वतः सकामस्य [1]कर्मभक्तत्वात् तादृशस्य त्रिवर्गकामनायां तेन क्रियमाणस्य कर्ममार्गीयत्वम्. उपासनायाअपि मानसकर्मत्वेन तच्छेषस्य तथात्वेऽपि [2]कर्ममार्गीयएव अन्तर्भावः. ज्ञानमार्गीयस्यतु तदीयत्वं स्पष्टमेव. भक्तिमार्गीयेऽपि तथात्वं तथा इति अभिसन्धाय आहुः **त्रयाणाम्** इति. एवञ्च कर्मोपासनयोः फलभेदेऽपि कर्ममार्गीयत्वेनैव असंकीर्णता. तथैव भक्तिमार्गीयस्यापि इति त्रित्वं सूपपन्नम्. मूले **अर्थाद्यर्थिभिः** इत्यनेन ‘आदि’पदेन [3]कामपूजे संगृह्येते.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

एवं पुरुषोत्तमोद्देश्यकत्वशंकायां वदामः श्रवणादिनवकस्य अधिकारिभेदेन स्वरूपभेदम् उपपादयामः इति अर्थः. तथाच **“मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तद्, राजसं फलसंकल्पं हिंसाप्रायादि तामसम्”** (भाग.पुरा.११।२५।-२३) इति एकादशे भगवता एकस्यैव कर्मणो अधिकारिभेदेन नानारूपत्वकथनात् तथैव गीतायामपि प्रतिपादनाद् रूपफलादिवद् अधिकार्यपि स्वरूपभेदकइति तेन भिन्ने श्रवणादिस्वरूपे तादृशस्य श्रवणादेः अविशिष्टत्वे निवृत्तेः ततो भक्तित्वस्यापि निवृत्तेः तत्र विभूतेरेव सम्बन्धइति न [4]भगवतः उद्देश्यत्वम्. प्रवृत्तिस्तु [5]उद्देश्यत्वभ्रमादेव, अन्यथा पूर्वोक्तशास्त्रबाधापत्तेः. एवं निवृत्तः उद्देश्यत्वे प्रतिज्ञा सुस्थिरैव इति भावः. तदेतद् अभिसन्धाय आहुः

---

१. कर्मभक्तित्वाद् इति क. २. कर्ममार्गीयत्वएव इति ख. ३. कामपूजा संगृह्यते इति क. ४. भगवदुद्देश्यत्वम् इति ख. ५. उद्देश्यभ्रमादेव इति ख.

कृषिवद् लौकिकएव. [१]शौचार्थिगंगास्पर्शवच्च. नहि तस्य मलनिवृत्त्यतिरिक्तो धर्मः उत्पद्यते. प्रत्युत निषिद्धाचरणात् पापमपि. एतेन विहितजातीयं कर्म [२]यथा कथञ्चित् कृतम् उक्तफलाय इति निरस्तम्. तुरीयाश्रमे [३]ज्ञानोदयहेतुचित्तशुद्धिहेतुत्वेन क्रियमाणः श्रवणादिः ज्ञानमार्गीयः "यथा यथा आत्मा परिमृज्यते असौ मत्पुण्यगाथाश्रवणाभिधानैः" (भाग.पुरा ११।

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

त्रिवर्गमध्ये अर्थार्थित्वम् उक्तमेव तथापि धर्मराहित्यपूर्वकत्वकथनाय पुनर्वचनम्. **वृत्त्यर्थम्** इति. वृत्तिः जीवनम्. एतेन इति. भावभेदात् फलभेदकथनेन इति अर्थः. सांगादेव वैदिककर्मणः फलोदयाद् न कृतिमात्रेण साफल्यम् इति अर्थः. **तुरीयाश्रमे** इति. सर्वत्र कृतिसारूप्येऽपि साधनदशायां

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

वृत्त्यर्थम् इति 'वृत्ति'पदमपि अविहितरीतिककामपूजयोः उपलक्षकम्. [४]**गंगास्पर्श...** इति. नद्यात्मकगंगास्पर्शो नतु उद्धृतजलस्पर्शः, उद्धृतजलस्य तदर्थं स्पर्शे दोषस्य स्मृत्यगोचरत्वादिति स्मार्ताः. भगवद्भक्तास्तु उद्धृतेऽपि तादर्थ्ये दोषं मन्यन्ते, अन्यथा चरणामृतेनापि तथाकरणे दोषाभावप्रसक्तेः. नच विशेषवचनाभावाद् लोकवद् विशिष्टत्वाच्च अत्र दोषो न तत्र इति वाच्यं, तस्य अत्रापि तौल्यादिति. **पापमपि** इति. "**तपो न कल्को अध्ययनं न कल्कः**" (महाभा.११।२५६) इत्यादिवाक्येभ्यः इति अर्थः. टीकायां सांगाद्... इत्यादि. तथाच्च तादृशे **कर्मणि** वैदिककर्मत्वमेव

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

श्रवणादि इत्यादि. **कर्ममार्गीयएव** इति. तादृशाधिकारिणः तन्मार्गीयत्वात् तथा इति अर्थः. अर्थादि इत्यादिपदेन कामः पूजा च संगृह्यते.

---

१. शौच्चार्थं गंगास्पर्शवच्च इति क्वचित्. विवेकेनतु स्पर्शवच्च इति चकारो नास्ति इति भाति. २. कृतं मुक्तिफलाय इति क्वचित्. ३. ज्ञानोदयहेतुः इति सविसर्गः पाठः क्वचित्. ४. गंगास्पर्शः इति, इति द्वयोरपि पुस्तकः पाठः, मूलानुरोधीतु एषः.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

न फलैक्यम् इति तात्पर्यम्. **साक्षाद्...** इति. [१]ज्ञानव्यवधान-

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

दुर्घटं चेत्, तादृशपूजायामपि तादृशत्वाद् भक्तित्वं सुतरां दुर्घटम् इति अर्थ:. मूले कर्ममार्गवद् ज्ञानमार्गेऽपि परम्पराया: तुल्यत्वात् तदीयस्वरूपम् आहु: **तुरीयाश्रमे** इत्यादि. "**यथा यथा आत्मा**" इति. 'आत्मा' अन्त:करणम्. वाक्योत्तरार्धन्तु "**तथा तथा पश्यति वस्तु सूक्ष्मं चक्षु: यथैव अञ्जनसम्प्रयुक्तम्**" (भाग.पुरा.११।१४।२६) इति. इदं वाक्यम् एकादशीयचतुर्दशाध्यायस्थम्. तत्र आरम्भे "**भवता उदाहृत: स्वामिन् भक्तियोगो अनपेक्षित:, निरस्य सर्वत: संगं येन त्वयि आविशेद् मन:**" (भाग.पुरा.११।१४।२)

श्रीमत्पुरुषोत्तमप्रणीतं विवेक:

वृत्त्यर्थम् इति 'वृत्ति'पदम् अविहितरीतिकपूजाकामयोरपि उपलक्षकम्. [२]**गंगास्पर्शवद्** इत्यत्र गंगास्पर्शो [३]नद्यात्मकतत्स्पर्श:, नतु उद्धृततज्जलस्पर्शोऽपि, उद्धृतजलस्य [४]तदर्थं स्पर्शे दोषस्य स्मृत्यनुक्तत्वाद् इति स्मार्ता: भगवद्भक्तास्तु तदर्थम् उद्धृतेऽपि जले दोषं मन्यन्ते अन्यथा चरणामृतेनापि तथाकरणे दोषाभावप्रसक्ते:. नच विशेषवचनाभावाद् लोकवद् विशिष्टत्वाच्च अत्र दोषो न तत्र इति वाच्यम्, तस्य अत्रापि तौल्यादिति. **पापमपि** इति. [५]"**तपो न कल्को अध्ययनं न कल्क:**" (महाभा.१।१।२५६) इत्यादिवाक्येभ्य: इति अर्थ:. **एतेन** इति. लौकिकत्वादिस्थापनेन. द्वितीयं वक्तुं तदधिकार्यादिकम् आहु: **तुरीय** इत्यादि. तथाच [६]ज्ञानोदयहेतुचित्तशुद्धिकामो यति: अत्र अधिकारीति तेन श्रवणादे: भेद: इति अर्थ:. **प्रमाणम्** आहु: **यथा** इत्यादि. आत्मा अन्त:करणम्. [७]वाक्योत्तरार्धन्तु

---

१. ज्ञानाव्यवधानपूर्वकम् इति ख. घ, ज्ञानाद्यवधानपूर्वकम् इति ग. २. गंगास्पर्श: इत्यत्र इति ख. ३. नद्यात्मकतत्स्पर्श: इति अर्थ: इति ख. ४. तदर्थे स्पर्शे इति ख. ५. तपो न कल्को अध्ययनम्. कल्कोऽस्त्री शमलैनसो: इति अमर: कल्क: इत्यादि वाक्येभ्य: तथा इति अर्थ: इति क ५. ज्ञानोदयहेतुचित्तशुद्धिहेतुकयति: अत्र इत्यादि ख. ७. वाक्योत्तरार्धेतु इति ख.

१४।२६) इत्यादि वाक्यैः. साक्षान्मोक्षसाधनत्वेन तान्त्रिकदीक्षापूर्वकं

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

-पूर्वकशुद्धभावनामात्रेण इति अर्थः. पञ्चरात्रपुराणादिषु अयमेव

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति प्रश्ने सर्वसंगनिरासस्य तुरीयाश्रमधर्मत्वात् तुरीयाश्रमलाभः. सर्वसंगनिरासोपलक्षकं वा तुरीयाश्रमपदम्. **तुरीयाश्रमे** इत्यादिनिरूपणस्य तात्पर्यं टीकायाम् आहुः **सर्वत्र** इत्यादि. **कृतिसारूप्येऽपि साधनदशायाम्** इति. साधनदशायां कृतिसारूप्येऽपि इति अर्थः. **तात्पर्यम्** इति. प्रघट्टकतात्पर्यम्. **साक्षाद्...**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

"**तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुः यथैव अञ्जनसम्प्रयुक्तम्**" (भाग.पुरा.११।१४।२६) इति. वाक्यन्तु एकादशीयचतुर्दशाध्यायस्थम्. तत्र सन्दर्भारम्भे "**भवता उदाहृतः स्वामिन् भक्तियोगो अनपेक्षितः निरस्य सर्वतः संगं येन त्वयि आविशेद् मनः**" (भाग.पुरा.११।१४।२) इति प्रश्नवाक्योक्तस्य सर्वसंगनिरासस्य तुरीयाश्रमधर्मत्वात् तल्लाभः. सर्वसंगनिरासोपलक्षकं वा तुरीयाश्रमपदम्. तृतीयम् आहुः **साक्षाद्...** इत्यादि. अत्र इदं बोध्यम्. एकादशस्य एकादशाध्याये पूर्वम् "**आत्मारामो अनया वृत्त्या**" (भाग.पुरा.११।११।१७) इत्यन्तेन आत्मारामधर्मान् उक्त्वा तदर्थं सर्वगतस्य मनसः स्वस्मिन् अर्पणं च उक्त्वा तत्र अनधिकारे "**यदि अनीशो धारयितुम्**" (भाग.पुरा.११।११।२२) इत्यादित्रयेण निरपेक्षकर्मणा शुद्धसत्त्वस्य भक्तिम् उक्त्वा "**सत्संगलब्धया भक्त्या मयि मां सः उपासिता, स वै मे दर्शितं [1]'सद्भिः अञ्जसा विन्दते पदम्**'" (भाग.पुरा.११।११।२५) इति स्वपदप्राप्तिः उक्ताः. ततो [2]"**भक्तिः त्वयि उपयुज्येत कीदृशी सद्भिः आदृता**" (भाग.पुरा.११।११।२६) इति प्रश्ने "**मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम्**" (भाग.पुरा.११।११।३४) इत्याद्यष्टभिः पूर्वोक्तोपासनाशेषभक्तिकथने "**वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्**" (भाग.पुरा.११।११।३७) इत्यनेन वैदिकी तान्त्रिकी दीक्षा मध्ये गणिता. उपसंहारे च "**इष्टापूर्तेन**

---

[1] रूपम् अञ्जसा इति ख. [2] भक्तिः त्वयि उपपद्येत इति ख.

विहितत्वेन क्रियमाणः श्रवणादिः उपासनामार्गीयः. अयमेव [1]'वैष्णवमार्गः' इति उच्यते, विष्णुधर्मेष्वेव निष्ठावत्त्वात्.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति. अत्र इदं बोध्यम्. एकादशस्य एकादशाध्याये पूर्वम् "**आत्मारामो अनया वृत्त्या**" (भाग.पुरा.११।११।१७) इत्यन्तेन आत्मारामधर्मान् उक्त्वा तदर्थं सर्वगस्य मनसः स्वस्मिन् अर्पणं च उक्त्वा [2]तदनधिकारे "**यदि अनीशो धारयितुम्**" (भाग.पुरा.११।११।२२) इत्यादित्रयेण निरपेक्षकर्मणा शुद्धसत्त्वस्य भक्तिम् उक्त्वा "**सत्संगलब्धया भक्त्या मयि मां यः उपासिता, सः वै मे दर्शितं सद्भिः अञ्जसा विन्दते पदम्**" (भाग.पुरा.११।११।२५) इति स्वपदप्राप्तिः उक्ता. ततो "**भक्तिः त्वयि उपयुज्येत कीदृशी सद्भिः आदृता**" (भाग.पुरा.११।११।२६) इति प्रश्ने "**मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम्**" (भाग.पुरा.११।११।३४) इत्याद्यष्टभिः पूर्वोक्तोपासनाशेषभक्तिकथने वैदिकी तान्त्रिकी दीक्षा मध्ये गणिता. [3]एवम् उपसंहारे च "**इष्टापूर्तेन माम् एवं यो यजेत समाहितः, लभते मयि सद्भक्तिं मत्स्मृतिः**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

माम् एवं यो यजेत समाहितः, लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया" (भाग.पुरा.११।११।४७) इति उक्तम्. एवं सति उपक्रमे "**सत्संगलब्धया...**" इति वाक्ये यद् उक्तं तद् अत्र साक्षान्मोक्षसाधकत्वेन इत्यन्तेन उक्तम्. या पुनर्मध्ये तान्त्रिकी दीक्षा उक्ता सा **तान्त्रिकदीक्षापूर्वकम्** इत्यनेन स्मारिता. यत् पुनः अन्ते "**यो यजेत समाहितः**" इत्यनेन विध्यनुवादः उक्तः सः **विहितत्वेन** इत्यन्तेन स्मारितः. उपक्रमे **उपासिता** इति कथनाद् उपासनामार्गीयत्वम् [4]एतस्य अत्र उक्तम्. अतः सर्वम् इदं भगवदुक्तमेव प्रमेयम्. तथापि तत्र वैदिक्या दीक्षायाः भक्तिरूपफलस्य च कथनेन तत्प्रावाहिकभक्तिमर्यादाभक्तिसंकीर्णम् इति, तद् अत्र प्रमाणत्वेन न उदाहृतं,

---

१. तान्त्रिकमार्गः इति क्वचित्. २. तत्र अनधिकारे इति ख. ३. एवम् इति नास्ति ख. ४. एतस्यामुक्तम् इति क.

मुक्तिसाधनत्वप्रतिपादकवाक्यैः एवम् अवसीयते. "अचार्यमेव हरये"

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

आचार्यानुग्रहलब्धो वैष्णवधर्मपरो 'वैष्णवमार्गः' उच्यते. **मुक्तसाधन...**

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

साधुसेवया" (भाग.पुरा.११।११।४७) इति उक्तम्. एवं सति उपक्रमे "**सत्संगलब्धया...**" इति वाक्ये यद् उक्तं तद् मूले **साक्षान्मोक्षसाधकत्वेन** इत्यनेन उक्तम्. तदेव टीकायां ज्ञानाव्यवधानेत्यादिना व्याख्यातम्. या पुनःमध्ये तान्त्रिकी दीक्षा उक्ता सा मूले **तान्त्रिकदीक्षापूर्वकम्** इत्यनेन स्मारितः. यत् पुनरन्ते "**यो यजेत**" इति विध्यनुवादः उक्तः सः मूले **विहितत्वेन** इत्यनेन उक्तः. उपक्रमे '**उपासिता**' इति '**समाहितः**' इति च कथनाद् उपासनामार्गीयत्वम् अत्र उक्तम्. अतः सर्वम् एतद् एकादशीयमेव प्रमेयं भगवदुक्तत्वेन सन्देहाभावाय उक्तम् इति ज्ञेयम्. एतस्य वैष्णवमार्गत्वे युक्तिम् उक्त्वा प्रमाणं वदन्ति इति आशयेन आहुः **पञ्चरात्र...** इत्यादि. ननु मुक्तिप्रतिपादकवाक्यानां चेद्, उपासनामार्गीयः श्रवणादिः विषयः तदा "**आचार्यमेव हरये**" (भाग.पुरा.११।२।४७) इत्यादेः को वा विषयः तत्र 'भक्त'पदेन कर्मज्ञानमार्गीययोः, [1]'प्राकृत'पदेन भक्तिमार्गीयस्य व्यावर्तनाद्, मुक्त्यप्रतिपादनेन अस्यापि वक्तुम् अशक्यत्वाच्च इति आकांक्षायां तादृग्वाक्योक्तसंग्रहाय वदन्ति इति आशयेन आहुः **चतुर्विधा...** इत्यादि. अस्मिन् वाक्ये '**आर्तः**' प्रतिष्ठाहीनो भ्रष्टैश्वर्यः तत्प्राप्तिकामः. '**अर्थार्थी**' अप्राप्तैश्वर्यविषयतया ऐश्वर्यकामः. एतयोः गुणमात्रं भिन्नम् अधिकारस्तु एकएव. '**जिज्ञासु**' प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः. '**ज्ञानी**'तु प्रकृतिवियुक्तात्मास्वरूपे अपर्यवस्यन् भगवन्तं प्रेप्सुः भगवन्तमेव परमप्राप्यं मन्वानः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

अत्र विविक्ततत्कथनस्य अभिसंहितत्वादिति. **अयम्** इति. तान्त्रिकदीक्षाविशिष्टत्वात् [2]पञ्चरात्रादिदक्षिणागमोक्तः विष्णुधर्मेषु निष्ठावत्त्वं [3]वामवैष्णवेष्वपि अस्तीति तन्निरासाय आहुः **मुक्ति** इत्यादि. "**मोक्षम् इच्छेद् जनार्दनाद्**"

---

१. प्राकृतपदेन न अस्यापि वक्तुम् अशक्यत्वाच्च इति आकांक्षायाम् इति ख.

२. पञ्चरात्राद्यागमोक्तः इति ख. ३. वामवामं वैष्णवेष्वपि इत्यादि क.

(भाग.पुरा.११।२।४७) इत्यादिवाक्यानाम् अयमेव विषयः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इति. **“चतुर्विधा भजन्ते मां जनाः सुकृतिनो अर्जुन! आर्तो जिज्ञासुः अर्थार्थी ज्ञानी च भरतर्षभ!”** (भग.गीता ७।१६) इत्यत्र आर्ताधिकारकभजनस्य सर्वसाधारण्येन प्रावाहिकत्वं वक्तुं तल्लक्षणपूर्वकं स्वरूपम् अनुवदन्ति आचार्यामेव इति. **भक्तिमार्गीय** इति. अत्र मर्यादामार्गो

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति रामानुजाचार्याः. श्रीधरीयेतु ‘आर्तो’ रोगाद्यभिभूतः, ‘जिज्ञासुः’ आत्मज्ञानेच्छुः, ‘अर्थार्थी’ इह परत्र वा भोगसाधनभूतार्थलिप्सुः, ‘ज्ञानी’ आत्मविद् इति उक्तम्. मधुसूदनीयेतु द्रौपद्यादयो मुचुकुन्दादयो विभीषणादयः सनकादयो अत्र चतुर्विधोदाहरणत्वेनापि उक्ताः इति विशेषः. तदेतद् मतं न अस्माकं रोचते, आद्यस्य आर्तार्थार्थिनोः अधिकारैक्ये पृथङ्निर्देशप्रयोजनोक्तिशून्यतया असामञ्जस्याद्, द्वितीयस्य क्रमविरोधेन तथात्वात्, तृतीयस्य उदाहरणेऽपि विरोधाच्चेति. अतो ‘अर्थार्थि’पदेन **“अकामः सर्वकामो वा मोक्षकामः उदारधीः, तीव्रेण भक्तियोगेन यजेत पुरुषं परम्”** (भाग.पुरा.२।३।१०) इति द्वितीयस्कन्धोक्तो भगवत्सेवोपयोग्यर्थार्थी ग्राह्यः. तथासति आर्तो जघन्यत्वेन शिष्यते. तथाच आर्तः सर्वत्र

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

इति वाक्याद् मुक्तिदो अत्र विष्णुः अभिप्रेयते नतु शक्तिशेषः प्रेतरूपः. तेन तद्धर्मनिष्ठत्वएव वैष्णवमार्गत्वम् अन्यथा शाक्तत्वम् इति अर्थः. ननु यत्र मुक्तिः न उक्ताः **“आचार्यामेव हरये पूजां यः श्रद्धया ईहते, न तद्भक्तेषु च अन्येषु सः भक्तः प्राकृतः स्मृतः”** (भाग.पुरा.११।२।४७) इत्यादौ [१]तत्र प्रतिमायामेव तस्य भगवद्बुद्ध्या [२]अन्यत्र भावाभावेन ज्ञानित्वस्य अशक्यवचनत्वाद् भक्तेषु भावाभावेन भक्ताभक्तयोः तौल्यसूचनेन च भक्तिमार्गीयत्वस्यापि अशक्यवचनत्वाद् अर्चाहर्योः भेदनिदर्शनिन पातिव्रत्यधर्मत्वस्यापि तथात्वात् कुत्र निवेशः इति आकांक्षायाम् आहुः

---

१. तस्य प्रतिमायामेव भगवद्बुद्ध्या इति ख. २. अन्यत्रतु भावाभावेन इति ख.

विषयः. भक्तिमार्गीयभक्तकृतभक्तिसाम्प्रदायिकदीक्षापूर्वकं मोक्ष-

---

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

'भक्तिमार्गः' इति उच्यते, शास्त्रानुरुद्धत्वाद् न पुष्टिः. भक्ताचार्यैः कृतः प्रवर्तितो यो भक्तिसम्प्रदायः तदनुसारिदीक्षापूर्वकम् इति अर्थः. अन्यत्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

दर्शनात् तदीयस्य भजनस्य उपासनादिमार्गत्रये तथात्वं वक्तुं तथा इति अर्थः. "**अचार्यामेव...**" (भाग.पुरा.११।२।४७) इति वाक्यार्थस्तु—एकत्र भगवन्तम् अयं जानाति पूजाकरणात्. न अयं भक्तिमार्गः [1]भक्तेषु भावाभावात्. 'अर्चा' प्रतिमा. तस्याः हरेश्च भेदनिर्देशाद् अयं भक्तो न पातिव्रत्यधर्माः, न वा ज्ञानम् अन्येषु भावाभावात्, 'च'कारेण भक्ताभक्तयोः तुल्यत्वसूचनाच्च. एकदेशे भगवद्भावाद् अस्य प्राकृतभक्तत्वम् इति. तथाच एतादृशस्य भजनस्य विहिततया क्रियमाणत्वेन उपासनामार्गीयत्वे प्रावाहिकोपासकत्वं तथा प्रावाहिकज्ञानिभक्तत्वम् इति एवं ज्ञेयम् इति अर्थः. तेन अन्यत्र भगवद्भावरहितत्वे सति एकदेशे भगवज्ज्ञानवत्त्वं प्रावाहिकत्वमिति तत्स्वरूपं सिद्ध्यति. तच्च जघन्ये अधिकारे भक्तिमार्गीयस्यापि तुल्यम्. [2]तद् निष्कृष्टुं पूर्वोक्तैकादशीयसन्दर्भे वैदिक्या; दीक्षायाअपि उक्तत्वात् तावन्मात्राधिके शेषस्य पूर्वतुल्यतायां तादृशे मार्गे 'भक्ति'पदस्यापि उक्तत्वात् प्रवाहतौल्यस्यापि सत्त्वात् तं तथा वदन्ति इति आशयेन आहुः **भक्तिमार्गीय...** इत्यादि **समानम्** इत्यन्तम्.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

अचार्याम्... इत्यादि. ज्ञानिभक्तयोः व्युदासे, 'भक्त'पदेन कर्मिणोऽपि व्युदासे, 'श्रद्धा'पदेन विष्णुधर्मनिष्ठाप्राप्त्या, 'प्राकृत'पदेन [3]ज्ञानिभक्तापेक्षया हीनो अभिप्रेयते इति तादृशो अयमेव मार्गो विषयः इति अर्थः. असंकीर्णत्वाद् [4]इदम् अत्र उक्तम्. तुरीयम् आहुः **भक्ति...** इत्यादि. अत्र दीक्षाभेदाद्

---

[1] भक्तौ पूजायाः अभावाद् इति क. [2] तन्निष्कृष्टुं पूर्वोक्तैकादशीयसन्दर्भे वैदिक्या दीक्षायाअपि उक्तत्वात् तादृश्यां तादृशे तावन्मात्राधिको शेषस्य पूर्वतुल्यः उपासनामार्गात् तावन्मात्राधिक्यः इति अर्थः. मार्गे 'भक्ति'पदस्यापि इत्यादि क. [3] ज्ञानिभक्ताद्यपेक्षया इति क. [4] इदम् उक्तम् इति ख.

साधनत्वेन क्रियमाणः श्रवणादिः ‘प्रावाहिकी भक्तिः’ उच्यते. अतएव कपिलदेवेन “न युज्यमानया भक्त्या भगवति अखिलात्मनि, सदृशो अस्ति शिवः पन्थाः योगिनां ब्रह्मसिद्धये” (भाग.पुरा.३।२५।१९) इति उपक्रम्य सतां लक्षणम् उक्त्वा “ते एते साधवः साध्वि सर्वसंगविवर्जिताः, संगः तेषु अथ ते प्रार्थ्यः संगदोषहराः हि ते, सतां प्रसंगाद् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः तज्जोषणाद् आशु अपवर्गवर्त्मनि श्रद्धा रतिः भक्तिः अनुक्रमिष्यति” (भाग.पुरा.३।२५।२४-२५) इत्यादि निरूपितम्. अत्र ‘अपवर्गवर्त्मनि’ इति पदेन उक्तरूपत्वम् अवधेयम्. प्रेमात्मकभक्तिसाधनत्वेन क्रियमाणः श्रवणादिः भक्तिमार्गे

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

समानम्. अग्रे श्रद्धारत्यादीनां फलत्वेन कथनात् तत्साधनरूपत्वेन प्रावाहिकत्वमेव इति अर्थः. अत्र प्रावाहिकत्वेन अपकर्षो मुख्यभक्त्यपेक्षया, नतु “**जायस्व म्रियस्व**” इतिवत् प्रावाहिकत्वम् इति भावः. [१]फलरूपम् आहुः **प्रेमात्मक**...इति. [२]**भक्तिसाधन**... इति. प्रेमात्मकभक्तिसाधनत्वेन इति

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

भक्ताचार्यैः इति. रामानुजाचार्यादिभिः. **तदनुसारिदीक्षापूर्वकम्** इति. नारायणाष्टाक्षरवासुदेवद्वादशाक्षरादिदीक्षापूर्वकम्. **अन्यत् समानम्** इति. विहितत्वेन मोक्षसाधनत्वेन च श्रवणादीनां क्रियमाणत्वम् उपासनामार्गेण तुल्यम्. तथाच लोके यथा मुक्तिरेव फलत्वेन अभिमता तथा अस्यापि हृदि इत्यतः अस्य प्रावाहिकत्वम् इति आशयः. एकादशे उपासनासांकर्येण कथनाद्, न निष्कृष्टं स्वरूपं ज्ञातं भवतीति अतः तृतीयस्कन्धीयसम्मतिः अत्र उक्ताशयेन आहुः **अग्रे श्रद्धा** इत्यादि. एवञ्च वैदिकतान्त्रिकमिश्रणे उपासनामिश्रप्रावाहिकभक्तत्वमपि बोध्यम्. [३]फलरूपम् आहुः इति. फलरूपायाः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

अधिकारिभेदः. दीक्षा च अत्र नारायणाष्टाक्षरादीनां वैदिकी बोध्या,

---

१. उपलब्धेषु पुस्तकेषु फलरूपम् आहुः इति पाठः. तीर्थानुरोधेनतु एवम्. २. भक्तिसाधनत्वेन इति घ. ३. पापरूपाम् आहुः इति क.

'मर्यादाभक्तिः' इति उच्यते, "श्रद्धा अमृतकथायां मे" (भाग.पुरा.११।१९।२०) इति उपक्रम्य "एवं धर्मैः मनुष्याणाम् उद्धव! आत्मनिवेदिनां, मयि सञ्जायते भक्तिः को अन्यो अर्थो अस्य अवशिष्यते" (भाग.पुरा.११।१९।२४) "भक्त्या सञ्जातया भक्त्या" (भाग.पुरा.११।-

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

अर्थः. उभयोः साधनभावम् उपपादयन्ति—**श्रद्धामृतकथायाम्** इत्यादिना.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

स्वरूपम् आहुः इति अर्थः. **साधनभावम्** इति. साध्यसाधनभावम्. तथाच

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

[1] पूर्वोक्तस्वारस्यात्. लोकप्रवाहे यथा मुक्तिः फलत्वेन अभिमता तथा अत्रापि. अतो अस्य प्रावाहिकत्वं ज्ञेयम्. पूर्वत्रतु कामादिभेदाद् अधिकारिभेदो बोध्यः. पञ्चमम् आहुः **प्रेम...** इत्यादि. परतः पुरुषार्थत्वेन साधनकरणाद् अस्य मर्यादाभक्तित्वम्. अत्र उक्तः एकादशीयसन्दर्भे आत्मनिवेदनपूर्वकमेव श्रद्धादीनां कथनात् तत्पूर्वककथाश्रद्धा, निरन्तरकीर्तनं, पूजानिष्ठा, स्तुतिकरणकस्तवनं, परिचर्यादरः, साष्टांगप्रणामः, भक्तेषु अधिकपूजा, सर्वभूतेषु भगवद्भावः, भगवदर्थं लौकिकी क्रिया, लौकिकगाथया भगवद्-गुणकथनं गानं च, भगवति मनोर्पणं, सर्वकामत्यागः, भगवद्-भजनार्थं तद्विरोधिनाम् अर्थभोगसुखानां त्यागः, इष्टदत्तहुतजप्तादीनां वैदिकानां व्रततपादीनां स्मार्तानां च भगवदर्थत्वमिति एतेषां करणं मर्यादाभक्तिः इति अर्थः. अत्र उपक्रमे **"पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम्"** (भाग.पुरा.११।१९।१९) इति परमकारणत्वप्रतिज्ञानाद् अस्य [2] प्रकारस्य अन्येभ्यः उत्कर्षः, समाप्तौ च **"मयि सञ्जायते भक्तिः को अन्यो अर्थो अस्य अवशिष्यते"** (भाग.पुरा.११।१९।२४) इति फलोत्कर्षकथनाच्च. परत्वञ्च शीघ्रम् अव्यभिचारेण जनकत्वम्. किञ्च, अत्र द्विविधायाअपि दीक्षायाः अनुक्तत्वात् **कथयिष्यामि** इति प्रतिज्ञानाच्च [3] स्वकृतोपदेशपक्षएव भगवतो अभिप्रेतः

---

१. पूर्वोक्तस्वारस्यात्तु इति क. २. प्रकरणस्य इति ख. ३. तेन स्वकृतोपदेशपक्षएव इति ख.

३।२१) इत्यादिवाक्यैः तत्साधनत्वं ज्ञेयम्. [1]स्नेहोत्पत्त्यनन्तरं

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

तत्साधनत्वं स्नेहसाधनत्वम् इति अर्थः. फलदशापन्नभक्तिस्वरूपम् आहुः **स्नेहोत्पत्ति...** इति. स्वभावतः सर्वेन्द्रियवृत्तीनां स्वरूपैकविषयत्वेन

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

मूलोक्तैकादशीयोनविंशवाक्ये आत्मनिवेदनपूर्वकमेव कथाश्रद्धादीनां कथनात् तत्पूर्वकं कथाश्रद्धा निरन्तरकीर्तनं पूजानिष्ठा स्तुतिकरणकस्तवनं, परिचर्यादरः, साष्टांगप्रणामः, भक्तेषु अधिकपूजा, सर्वभूतेषु भगवद्भावः भगवदर्थं लौकिकी क्रिया, लौकिकगाथया भगवद्-गुणकथनं गानं च, भगवति मनोर्पणं, सर्वकामत्यागः भगवद्भजनार्थं तद्विरोधिनाम् अर्थभोगसुखानां त्यागः, इष्ट-दत्त-हुत-जप्तादीनां व्रत-तपादीनां स्मार्तानां च भगवदर्थत्वम् इति एतेषां करणं मर्यादाभक्तिः इति अर्थः. अत्र सन्दर्भे "**पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम्**" (भाग.पुरा.११।१९।१९) इति उपक्रमे परमकारणत्व-

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

इति ज्ञायते. तथा सति "**एवं धर्मैः**" इति वाक्यगतं 'मयि' इति पदं [2]पूर्वार्धेऽपि युज्यमानं कृष्णएव भगवति [3]सम्प्रदायरीतिकात्मनिवेदनोपदेशं गमयति. गारुडेतु "[4]**सकृदेव प्रपन्नो यः तव अस्मि इति च यो वदेद्, अभयं सर्वभूतेभ्यो ददाति एतद् व्रतं हरेः**" (गरु.पुरा.१।२१९।११) इति विष्णुभक्त्यध्याये कण्ठतएव उक्तम्. गीतायाम् एकादशे च शरणगमनोपदेशाच्च सा ततः पूर्वापेक्षा. तथासति तदुभयोपदेशपूर्वकं [5]तथा **क्रियमाणः श्रवणादिभिः** मर्यादाभक्तिः इति सिद्ध्यति. उपदिश्यमानमन्त्रस्वरूपादिकं [6]मया उपदेशवादे प्रपञ्चितम् इति न अत्र पुनः उच्यते. उक्तसन्दर्भे "**एवं धर्मैः**" इति 'धर्म'पदात् स्नेहसाधनभूतेषु श्रवणादिषु भक्तित्वं न युक्तम् इति शंकानिरासाय वाक्यान्तरम् आहुः **भक्ति...** इत्यादि. तथाच अत्र भक्तिसाधने 'भक्ति'पदप्रयोगात् तत्र [7]'धर्म'पदं भगवद्धर्मपरमिति

---

[1] भक्तिरूपस्नेहोत्पत्त्यनन्तरम् इति क्वचित्. [2] पूर्वार्धे युज्यमानमपि इति ख. [3] साम्प्रदायिकरीतिकात्मनिवेदनोपदेशम् इति ख. [4] दयां कुरु प्रपन्नाय [5] तथा इति नास्ति ख. [6] अस्माभिः उपदेशवादे इति ख. [7] धर्मैः इति पदम् इति ख.

स्वव्यसनतः स्वतन्त्रपुरुषार्थत्वेन क्रियमाणः उत्तमः पुष्टिभक्तिरूपः. ''मत्सेवया प्रतीतञ्च सालोक्यादिचतुष्टयं, न इच्छन्ति सेवया पूर्णाः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

कामिन्यासक्तमनसइव यत्किञ्चित् क्रियमाणमपि तद्विषयकमेव भवत्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

-कथनाद् अस्य प्रकारस्य अन्यस्माद् उत्कर्षः. समाप्तौ **''मयि सञ्जायते भक्तिः को अन्यो अर्थो अस्य अवशिष्यते''** (भाग.पुरा.११।१९।२४) इति फलोत्कर्षकथनाच्च. किञ्च, अत्र द्विविधायाअपि दीक्षायाः [१] अनुक्तत्वात् कथयिष्यामीति प्रतिज्ञानाच्च स्वकृतोपदेशपक्षएव **भगवतो** अभीष्टः इति ज्ञायते. तथासति **''एवं धर्मैः''** इति वाक्यगतं **'मयि'**इति पदं पूर्वार्धेऽपि युज्यमानं कृष्णएव भगवति सम्प्रदायरीतिकात्मनिवेदनोपदेशं गमयति. गारुडे च **''सकृदेव प्रपन्नो यः तव अस्मि इति च यो वदेद्, अभयं सर्वभूतेभ्यो [२] ददाति एतद् व्रतं हरेः''** (गरु.पुरा.१।२१९।११) इति विष्णुभक्त्यध्याये वाक्याद् गीतायाम् एकादशे च शरणगमनोपदेशात् [३] तदुभयोपदेशपूर्वकं तथा क्रियमाणः श्रवणादिः मर्यादाभक्तिरूपइति सिद्ध्यति. उक्तसन्दर्भे **''एवं धर्मैः''** इति 'धर्म'पदात् स्नेहसाधनभूतेषु श्रवणादिषु भक्तित्वं न युक्तम् इति शंकानिरासाय वाक्यान्तरम् आहुः मूले **भक्तिः** इत्यादि. तथाच अत्र प्रेमभक्तिसाधनेषु 'भक्ति'पदप्रयोगात् तत्र 'धर्म'पदं भगवद्धर्मपरमिति न तेषु भक्तित्वं हीयते इति अर्थः. पुष्टिभक्तिस्वरूपं विवृण्वन्ति **फलदशापन्न...** इत्यादि. एवं मूले अत्र **वदामः** इत्यारभ्य

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

न श्रवणादिषु भक्तित्वहानिः इति अर्थः. अस्मिन् **प्रकारे** [४] कामनाभेदाद् अधिकारिभेदः. [५] षष्ठम् आहुः **स्नेह...** इत्यादि. उत्तमत्वे गमकम् आहुः [६] **''मत्सेवया...** इत्यादि. 'सेवा'पदेन सातत्याभीक्ष्ण्यान्यतरपूर्वकः कायिकव्यापारविशेषः उच्यते, स्त्रीसेवा औषधिसेवा इत्यादिप्रयोगात्. सच

---

१. अनुक्रमत्वाद् इति क. २. ददामि एतद् इति. ख. ३. तत्तदुपदेशपूर्वकम् इति क. ४. अधिकारभेदः इति क. ५. सप्तम् आहुः इति क. ६. सत्सेवया इति ख.

कुतो अन्यत् कालविप्लुतम्'' (भाग.पुरा.१।४।६७) ''न एकात्मतां मे स्पृहयन्ति केचन् मत्पादसेवाभिरताः मदीहाः'' (भाग.पुरा.३।२५।३४) ''महतां मधुद्विट्सेवानुरक्तमनसाम् अभवोऽपि फल्गुः'' (भाग.पुरा.५।१४।४४) ''नारायणपराः [१]लोके न कुतश्चन बिभ्यति, स्वर्गापवर्गनरकेष्वपि

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

पर्यवस्यति इत्यतः स्वतन्त्रपुरुषार्थत्वम्. अग्रे फलाकांक्षाविरहाद्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

तथात्वं ज्ञेयम् इत्यन्तेन श्रवणादीनाम् अनेकविधत्वम् उपपादितम्. अतः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

अत्र प्रकरणबलात् परिचर्यारूपएव. तस्याः च कायक्लेशाधायकत्वेन स्वतः पुरुषार्थत्वाभावेऽपि अत्र पूर्णत्वादिकथनात् स्नेहात्मकमनोवृत्तिपूर्वकत्वादिकं लभ्यते लोके तथा दर्शनात्. श्रवणादीनान्तु अत्र स्नेहसिद्ध्या अर्थाद् लाभः. एतद् बोधनाय अत्र **इत्यादि...** इत्यादिपदम्. अत्र [२]कामनाभावाद् अधिकारिभेदः. एवम् अधिकारिभेदेन श्रवणादीनाम् अनेकविधत्वम् उपपादितम्. [३]तत्र अभक्तकृते श्रीभागवतश्रवणादौ भक्तित्वाभावेन द्वारलोपात् तद्विधौ भगवतः उद्देश्यत्वं निवर्तते. यूपीयाव्रश्चनस्थाणुत्वरूपद्वारलोपात् स्थाण्वाहुतिः यथा खलेवाल्या निवर्तते. तद् इदं दशमस्य प्रथमे पादे (पूर्वमी.सू.१०।१।९-१५) स्थितम्. कर्ममार्गीयश्रवणादिषुतु [४]अप्राप्तिरेव इति भेदः. नच तद्विधेः [५]भक्तिशास्त्रीयत्वात् कथं न तेषां [६]भक्तित्वम् इति शंक्यं, तच्छास्त्रीयत्वस्य [७]तत्र अस्वतन्त्रत्वात्. अन्यथा **''योगाः त्रयो मया प्रोक्ताः''** (भाग.पुरा.११।२०।६) **''भक्तियोगश्च [८]योगश्च मया मानवी! उदीरितः''** (भाग.पुरा.३।२९।३५) इत्यादिवाक्यबाधापत्तेः अधिकारिणो बलिष्ठत्वाच्च. अन्यथा **'मदर्पणम्...'** इत्यादिवाक्यविरोधापत्तेः अतः तत्र विधेः

---

१. लोकाः इत्यपि क्वचित्. २. कामनाभावादिना अधिकारीत्यादि ख. ३. तत्र भक्तकृते श्रीभागवतश्रवणादौ पुष्टित्वाभावेन द्वारलोपात् तद्विधौ भगवतः उपदेश्यत्वं निवर्तते इति ख. ४. प्राप्तिरेव इति भेदः इति ग. ५. पुष्टिशास्त्रीयत्वकथनाद् इति ख. ६. पुष्टित्वम् इति ख. ७. तत्र अतन्त्रत्वाद् इति ख. ग. ८. योगश्च इति नास्ति ख.

तुल्यार्थदर्शिनः” (भाग.पुरा.६।१७।२८) इत्यादिवाक्यैः तथात्वं ज्ञेयम्. तेन ‘भक्ति’पदस्य शक्तिः स्नेहएव. श्रवणादिषु तद्धेतुत्वेन

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

उत्तमत्वञ्च. दोषमात्रस्य आशंकितुमपि अशक्यत्वाद् इति अर्थः. **तथात्वम्** इति उत्तमत्वम् इति अर्थः. **तेन** इति फलतारतम्यविचारेण इति अर्थः. [1]मुख्याभिधानशक्तिः ‘भक्ति’पदनिष्ठा स्नेहमेव प्रत्याययति,

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

परं पूजायां भक्तित्वनिवृत्तये ‘भक्ति’पदशक्तिं निर्धारयन्तीति आशयेन **तेन** इत्यादि **भाक्तः** इत्यन्तं मूलं विवृण्वन्ति **फल...** इत्यादि. तत्र सिद्धम् आहुः **मुख्य...** इत्यादि. **त्रितयम्** इति कर्मज्ञानोपासनाख्यम्.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

आभासरूपतैव यथा दाम्भिकादौ इति बोध्यम्. त्रिवर्गकामिना भक्तेन कृतेतु भक्तित्वाद् न उद्देश्यत्वनिवृत्तिः, परन्तु तादृशाधिकारस्य जाघन्ये तत्र मर्यादया वरणं यथाधिकारं ज्ञेयम्. एवमेव प्रावाहिकभक्तावपि. तथासति भक्तिशास्त्रोक्तेष्वपि श्रवणादिषु भावभेदेन [2]क्वचिद् भक्तित्वं क्वचिद् न इति प्रकरणापेक्षया अधिकारस्यैव बलिष्ठत्वाद् नवविधभक्तौ गणितस्यापि अर्चनस्य भक्तित्वं न नियतमिति प्रकरणबलेन पर्यवस्थानम् असंगतमिति समाधानं सिद्धम्. ननु एवं चेत्, तर्हि ‘भक्ति’पदस्य शक्तिः कुत्र इति वक्तव्यम्? नो चेद्, अगत्या एतेष्वेव शक्तिः आदरणीयाः. तथा सति पूर्वोक्तं सर्वम् अपार्थम् इति आशंकायाम् आहुः **तेन** इत्यादि. **तेन** इति. [3]धात्वर्थविचारेण सेवालाभेऽपि पूर्णादिपदानि अन्यथानुपपत्तिबलात् स्नेहलाभेन. पञ्चरात्रेतु **“स्नेहो भक्तिः इति प्रोक्तः”** (द्र.त.दी.नि.१।४२) इति कण्ठतएव उक्तम्. शाण्डिल्यसूत्रे च **“अथातो भक्तिजिज्ञासा”** (शाण्डि.भक्तिसूत्र.१।१।१) इति प्रतिज्ञाय **“सा परानुरक्तिः ईश्वरः”** (शाण्डि.भक्तिसूत्र.१।१।२) इति उक्तम्. **श्रवणादिषु** इति नैरपेक्ष्यपूर्वकश्रवणादिषु. **भाक्तः** इति कथनेन [4]पूर्वोक्तं पूजायाः औपचारिकत्वं

---

१. मुख्याभिधाशक्तिः इति ध. २. क्वचिद् भक्तित्वं सिद्ध्यति क्वचिद् न इति इति ख. ३. भक्त्यार्थविचारेण सेवालाभेऽपि पूर्णतादिपदान्यथानुपपत्तिबलात् स्नेहलाभेन इति ख. ४. पूर्वोक्तपूजायाम् औपचारिकत्वम् इति ख.

तत्प्रयोगो [1]भाक्तः. अतएव "सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमपि उत दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" (भाग.पुरा.३।२९।१३) इति लक्षणम् उक्त्वा "सएव भक्तियोगाख्यः" (भाग.पुरा.३।२९।१४) इति लक्ष्यम् उक्तम्, अन्यथा 'आख्या'पदम् अनर्थकं स्याद् 'एव'कारश्च. एवं सति पूर्वोक्तेषु औपचारिको 'भक्ति'पदप्रयोगः इति ज्ञापितं

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

न पूर्वोदाहृतत्रितयम्. अतो अत्र वृत्तिः शक्तिरेव. अन्यत्र लक्षणा गौणी च, हेतुहेतुमद्भावस्य सम्बन्धस्य विद्यमानत्वाद् इति अर्थः. **अतएव** इति. यतो अत्रैव मुख्यत्वम् अतएव तदुत्तरभाविसालोक्यादिपञ्चविधमुक्तीनाम् अप्राप्तत्वेन आकांक्षाविषयत्वम् उचितमपि अनिर्वाच्यानुभवैकवेद्यभजनरसास्वादमुदिता न इच्छन्ति. एतद् अनन्तरम् अन्यफलेच्छोदये उच्यमाने पूर्वोक्तत्रितयवद् एतस्यापि अन्यशेषत्वं स्याद् इति अर्थः. **'सालोक्यं'** समाने लोके वैकुण्ठे स्थितिः. **'सार्ष्टिः'** समानैश्वर्यम्. **'सामीप्यं'** पार्षदत्वम्. **'सारूप्यं'** सौन्दर्याद्यविशेषप्रतीतिः. **'एकत्वं'** स्वरूपे प्रवेशः. **अन्यथा** इति. यदि स्नेहे मुख्यत्वं न उच्येत तदा लक्ष्यलक्षणं कथनम् अन्ययोगव्यवच्छेदश्च

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

अन्यत्र इति श्रवणादिषु. [2]**सम्बन्धस्य** इति सादृश्यस्य. स्नेहे 'भक्ति'पदप्रयोगो मुख्यः इत्यत्र प्रमाणं वदन्ति इति आशयेन **अतएव** इति प्रतीकं धृत्वा व्याकुर्वते **यतः** इत्यादि. अन्यथा इत्यादिना उक्तं तर्कं व्याकुर्वन्ति यदि

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

समर्थितम्. श्रवणादीनां लक्षणन्तु श्रीधरीये 'भगवद्'वाचकपदवाक्यानां भगवति शक्तितात्पर्यनिर्धारः 'श्रवणं', तादृशनिर्धारपूर्वकम् उच्चारणं 'कीर्तनं', तथैव स्वरूपचिन्तनं 'स्मरणं', 'पादसेवनं' परिचर्या, 'अर्चनं' पूजनं, 'वन्दनं' कायवाङ्मनोभिः प्रह्वीभावः, 'दास्यं' कर्मार्पणं, 'सख्यं' तद्विश्वासादि, 'आत्मनिवेदनं' देहसमर्पणं, यथा विक्रीतस्य गवाश्वादेः भरणपालनादिचिन्ता न क्रियते तथा देह तस्मै समर्प्यं तच्चिन्तावर्जनमिति निरूपितम्.

---

१. भक्तेः इति क्वचित्. २. सम्बन्धसादृश्य इति क.

भवति. स्नेहवशेन क्रियमाणाः ते स्नेहमध्यपातिनएव. अथवा साक्षात् पुरुषोत्तमप्रापकत्वेन विहितत्वं 'भक्ति'पदप्रवृत्तिनिमित्तं श्रवणादिषु

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

न उपपद्येत इति अर्थः. पूर्वोक्तेषु श्रवणादिषु इति अर्थः. यद्यपि स्नेहस्य आन्तरत्वात् श्रवणादीनां बाह्यत्वाद् न एकरूपत्वं तथापि स्नेहसम्पत्त्यनन्तरं क्रियमाणाः तदन्तःपातिनो भूत्वा तत्समानाख्यां लभन्ते गंगाप्रवाहान्तःपातिबाह्योदकवद् इति अर्थः. 'भक्ति'पदस्य अनेकार्थत्वं वक्तुं पदप्रवृत्तिनिमित्तभेदम् आहुः **अथवा** इति. [1]विशेषवैयर्थ्यम् आशंक्य आहुः **नच** इति. चेद्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इत्यादि. ननु यदि स्नेहातिरिक्ते भाक्तः प्रयोगः तदा पुष्टिमार्गीयश्रवणादिष्वपि अविशेषः इति शंकानिरासाय स्नेहवशेन इत्यादिना वक्तुं तद् व्याकुर्वंति **यद्यपि** इत्यादि. तथाच यथा तत्र 'गंगा'पदस्य न लाक्षणिकत्वम् एवम् अत्र 'भक्ति'पदस्य इति भावः. इदम् अत्र अनेकार्थत्वस्य अन्याय्यत्वम् अभिप्रेत्य उक्तम्. तथापि वस्तुतो गौणी न अपैतीति भक्त्या ग्राह्यः इत्यादौ युगपद्वृत्तिद्वयविरोधो न परिहर्तुं शक्यः इति शंकायां तत्परिहाराय प्रकारान्तरं वदन्ति इति आशयेन आहुः **'भक्ति'पदस्य** इत्यादि.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तद् अस्माकमपि अविरुद्धम्. 'भक्ति'पदस्य स्नेहे शक्तिं दृढीकर्तुं प्रमाणान्तरम् आहुः **अतएव** इत्यादि. आचार्यैस्तु **"'भक्ति'पदस्य प्रत्ययार्थः प्रेम, धात्वर्थः सेवा"** (त.दी.नि.प्र.२।९२) इति निबन्धे उक्तम् उपपादितश्च. अतः प्रेम्णा सेवायां 'भक्ति'पदशक्तिः पर्यवस्यति. तदेतद् अभिसन्धाय आहुः **स्नेहवशेन** इत्यादि. इदम् अत्र **"अन्यायश्च अनेकशब्दत्वम्"** ( ) इति न्यायानुरोधेन उक्तम्. तथापि **"भक्त्या अहम् एकया ग्राह्यः"** (भाग.पुरा.११।१४।२१) इति वक्ष्यमाणवाक्ये युगपद्वृत्तिद्वयविरोधः इति अस्वरसेन पक्षान्तरम् आहुः **अथवा** इत्यादि. **विहितत्वम्** इति. **"तस्माद् भारत! सर्वात्मा भगवान् हरिः ईश्वरः श्रोतव्यः कीर्तितव्यश्च**

---

१. विशेषण इति घ.

भिन्नम्. नच तत्प्रापकत्वमेव तथा इति वाच्यम्, द्वेषादेः भगवदनुग्रहस्य च भक्तित्वापत्तेः. नच ‘साक्षात्’पदम् अनर्थकं, विभूतिभजनकर्तुरपि तद्द्वारा तत्प्राप्तेः “यथा अद्रिप्रभवाः नद्यः पर्जन्यापूरिताः प्रभो! विशन्ति सर्वतः सिन्धुं तद्वत् त्वां गतयो अनन्त!” (भाग.पुरा.१०।४०।१०) इत्यादिप्रमाणसिद्धत्वेन [१]तद्द्वारकत्वात्. श्रीकृष्णस्नेहत्वमेव फलरूपायां

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

आदौ द्वेषादेरपि स्वरूपप्रापकत्वाद् लक्षणम् अतिव्याप्तं स्याद् इति अर्थः. [२]विशेषणवैयर्थ्यम् आशंक्या आहुः **नच** इति. ‘साक्षात्’पदादाने लक्षणस्य केवल्यव्यतिरेकित्वेन इतरभेदसाधने स्वरूपासिद्धत्वं स्याद् इत्यपि ज्ञेयम्. विवादास्पदं भक्तिः कर्मादिभ्यो भिद्यते, पुरुषोत्तमप्रापकत्वेन विहितत्वात्. यत्र [३]कर्मादिभेदाभावः तत्र तत्प्रापकत्वे सति विहितत्वाभावेति असिद्धः [४]सर्वस्यापि तत्परत्वादेवेति यद्यपि सिद्धिवारकं विशेषणं

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

केवलव्यतिरेकित्वेन इति. असाधारणधर्मत्वात् तथात्वेन. **स्वरूपासिद्धत्वम्** इति. स्वेन व्याप्यत्वात्मकेन हेतुरूपेण असिद्धत्वम्. व्याप्यत्वासिद्धत्वम् इति अर्थः. तद् विशदयन्ति [५]**विवाद...** इत्यादि. **यत्र** इति कर्मादिभेदाभावः

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

स्मर्तव्यश्च इच्छता अभयम्” (भाग.पुरा.२।१।५)इत्यादिवाक्यविहितत्वम्. अत्र अभयस्य भगवत्प्रवेशरूपत्वात् साक्षात्पुरुषोत्तमप्रापकत्वं लभ्यते. ‘तव्य’स्य आवश्यकार्थत्वस्वीकारेऽपि लोके विध्यर्थत्वप्रसिद्ध्या विधिलाभः, निबन्धे तथा अंगीकारात्. वाक्यान्तरं वा विधायकं बोध्यम्. स्पष्टम् अन्यत्. सिद्धम् आहुः **श्रीकृष्ण**...इत्यादि. ननु अस्तु अनेकार्थत्वं ‘भक्ति’पदस्य तथापि “**भक्त्या ग्राह्यः**” इत्यादौ न उभयलाभः. अनेकार्थस्थले प्रवृत्तिनिमितभेदात्

---

१. तद्द्वारकत्वाद् इति क्वचित्. २. पूर्वविशेषणः इति घ. ३. यत्र कर्मादिभेदाभावः तत्र इति अयम् अंशो न अस्ति क.ख.ग. ४. तत्परत्वापि तत्परत्वादेव इति ख. ५. हि वादः इत्यादि इति द्वयोरपि पाठः. युक्तस्तु प्रतीकानुरोधित्वाद् एवम्.

तस्यां तन्निमित्तम् इति अनेकार्थौ 'भक्ति'शब्दः. प्रवृत्तिनिमित्तभेदेऽपि रविचन्द्रयोः 'पुष्पवत्'शब्दवाच्यत्वम् एकस्यामेव उक्तौ यथा तथा क्वचिद्

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

व्यर्थ [१]मन्यन्ते तथापि मतभेदेन ज्ञेयम्. **प्रवृत्ति...** इति. पुष्पभेदात् तद्वत्त्वभेदेऽपि आवृत्तिम् अन्तरेण सकृदुच्चारिताद् यथा उभयोः प्रतीतिः तथा पुरुषोत्तमविषयत्वेन अनुगतो व्यवहारः [२]सर्वत्र इति अर्थः. **क्वचिद्** इति. **उभय...** इति.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

तत्र इति शेषः. **मन्यन्ते** इति सर्वस्य भक्तित्वोपगमेन मन्यन्ते. **मतभेदेन** इति. "**योगाः त्रयो मया**" (भाग.पुरा.११।२०।६) इति वाक्यानुसारिणा सिद्धान्तिमतेन इति अर्थः. एवम् अनेकार्थत्वे सति यत् सिद्धं तद् वदन्ति इति आशयेन प्रतीकं धृत्वा व्याचक्षते पुष्प... इत्यादि. तथाच [३]न युगपद्वृत्तिद्वयविरोधः इति अर्थः. नच "**एकया उक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ**" (अम.को.१।४।१०) इति कोशात् प्रवृत्तिनिमित्तभेदाभावः शंक्यः, "'प्रत्येकं पुष्पवान्'" इति न प्रयोक्तव्यम् इत्येएतदर्थत्वेन **व्याख्यासुधायां**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

संयोगाद्यैः वृत्तिनियन्त्रणेन संकोचे विवक्षितार्थलाभो अन्यथातु संकोचाभावाद् विवक्षितार्थसन्देहएव [४]वृत्तिबलविचारकैः अंगीक्रियते इति न एवम् उभयलाभः इत्यतः आहुः **प्रवृत्ति...**इत्यादि. नच "'**पुष्प्' विकसने**" (पा.धा.पा.३३२४) इति [५]धातोः मतुपि कृते 'पुष्पवत्'शब्दनिष्पत्तेः [६]विकासवत्त्वस्य प्रकाशवत्त्वस्य वा प्रवृत्तिनिमित्तत्वाद् न तद्भेदः इति वाच्यं, तस्य अग्न्यादावपि तुल्यत्वेन रविचन्द्रवाचकत्वनियमभंगापत्तेः. अतः कुसुमद्वयमेव तादृशप्रयोगप्रयोजकत्वेन मृग्यम्. तदपि [७]पद्मकुमुदरूपमेव. पद्मिनीपतिः कुमुदवान् इत्यादिप्रयोगात्. अन्यथा दिवारात्रिविकासिनाम् अनेकेषां पुष्पाणां सत्त्वात् तथापि

---

[१]. एव इति ख.ग. [२]. सर्वत्र इति आहुः इति घ. [३]. नकारो अयम् उभयोरपि लब्धयोः पुस्तकयोः न दृश्यते तथापि अपेक्षते इति अक्षरचुञ्चुप्रमादफलम् एतद् इति अनुमाय परिगृहीतः. [४]. वृत्तिबलाबलविचारकः इति ख. [५]. वतुपि कृते इति ख. [६]. विकासवत्त्वस्य प्रवृत्तिनिमित्त्वाद् इति ख. [७]. कमलकुमुदरूपमेव इति क.

'भक्ति'पदं "भक्त्या अहम् एकया ग्राह्यः" (भाग.पुरा.११।१४।२१) इत्यादिषु उभयवाचकमपि. उक्तरूपतातु "मामेव नैरपेक्ष्येण

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

साधनफलोभयपरम् इति अर्थः. उक्तरूपता पुरुषोत्तमैकफलकभक्तिरूपता.

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

तद्विवरणात्. **क्वचिद्** इति. यत्र संयोगाद्यैः वृत्तेः न नियन्त्रणं तत्र इति अर्थः. **दर्शयन्ति** इति. नियन्त्रणेन 'भक्ति'पदस्य विशेषार्थं स्मारयन्तएव दर्शयन्ति इति अर्थः. अत्र उदाहरणवाक्येषु प्रथमे **'मामेव'** इति

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

प्रयोगः स्यात्. अतएव केनचिद् उक्तं "**कुसुमं कोशातक्या विकसति रात्रौ दिवा च कूष्माण्ड्याः. यद्यपि तथापि तस्माद् उत्कर्षः कुमुदकमलयोरेव**" (   ) इति. अतो लोकप्रसिद्ध्या [1]'पुष्प'शब्दस्य रूढिरेव आदरणीया. तथासति सिद्धएव प्रवृत्तिनिमित्तभेदः. वस्तुतस्तु [2]रवित्वचन्द्रत्वएव प्रवृत्तिनिमित्ते. नच **'एकया'** उक्त्या इत्यस्य साधारणवचनेन इति अर्थाद् रविचन्द्रसमूहस्यैव प्रवृत्तिनिमित्तत्वे प्राप्ते: [3]गार्भिणवन्यादिपदवद् एकवचनस्यापि प्राप्तौ तन्निवृत्त्यर्थं द्विवचनम् अत्र विधीयतइति न द्वयोः तथात्वम् इति वाच्यं, साधारणवचनेन 'पुष्पवत्'पदं रविचन्द्रसमूहवाचकं तच्च द्विवचनान्तं [4]प्रयोक्तव्यम् इत्येवं वाक्यभेदप्रसंगात्, कल्पनागौरवाद्, 'दिवाकरनिशाकरौ' इति उद्देश्यगतसंख्यायाः अविवक्षितत्वकल्पनापत्तेश्च. एतेनैव विशिष्टवाचकत्वपक्षोऽपि प्रत्युक्तः, मिथो विशेष्यविशेषणभावे विनिगमनाविरहाच्च. अतः तत्र प्रवृत्तिनिमित्तभेदएव अंगीकार्यः. तथासति तत्र यथा विशेषविध्यनुपपत्तिबलाद् युगपदुभयप्रतीतिः तथा अत्र उभयोः स्नेहश्रवणादिनवकयोः भगवत्प्रापकत्वसंग्रहानुपपत्तिबलाद् उभयोः 'भक्ति'पदवाच्यत्वम् **एकस्यामेव** उक्तौ इति अर्थः. नच तत्र द्विवचनबलादेव उभयप्रतीतिः इति वाच्यं, तथासति **'एकया उक्त्या'** इति विशेषविधिवैयर्थ्यापत्तेः, रामौ इत्यादिवद् एकशेषेणैव

---

१. पुष्पवच्छब्दस्य इति ख. २. रविचन्द्रावेव प्रवृत्तिनिमित्ते इति ख. ३. गार्भिणम् इत्यादिपदवद् इति ख. ४. प्रयोक्तव्यम् इति वाक्यभेदप्रसंगाद् इति ख.

भक्तियोगेन विन्दति'' (भाग.पुरा.११।२७।५३) इत्यादिभिः, ''एवं सततयुक्ता ये भक्ताः त्वां पर्युपासते ये चापि अक्षरम् अव्यक्तम्'' (भग.गीता १२।१) इति पार्थप्रश्नेन एतदुत्तरेण च ''न अलं द्विजत्वम्'' (भाग.पुरा.७।७।५१) इति उपक्रम्य ''प्रीयते अमलया भक्त्या हरिः अन्यद् विडम्बनम्'' (भाग.पुरा.७।७।५२) इति प्रह्लादवाक्येन ''न रोधयति मां योगः'' (भाग.पुरा.११।१२।१) इत्यादिश्रीमन्मुखोत्थवाक्यैः ''भक्त्या अहम् एकया ग्राह्यः'' (भाग.पुरा.११।२४।२१) इत्यादिवाक्यसहस्रैश्च भक्तौ अवधार्यते. मन्त्राधिष्ठातुस्तु पुरुषोत्तमविभूतिरूपत्वं पूर्वम् उपपादितमिति तत्प्रापकतज्जपार्चनादेः न भक्तित्वं वक्तुं शक्यं,

---

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

भक्त्यैव ग्राह्यो, न मन्त्रादिभिः इति दर्शयन्ति मामेव इत्यादिना अवधार्यते

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

कर्मवाचकादिपदसान्निध्याद् द्वितीयेऽपि **'त्वाम्'** इत्यस्य तदुत्तरेऽपि **''मयि आवेश्य''** इत्यादेः इत्येवं ज्ञेयम्. एतेन पूर्वपक्षे पूजायाः यद् भक्तित्वम् आपादितं स्थितं तत् [1]साधनरूपायां [2]मर्यादाभक्तौ पुरुषोत्तमप्रापकत्वेन विहितायां [3]वा तस्यां पर्यवस्यति नतु पुष्टिभक्तौ इति बोधितम्. तेन

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तत्सम्भवात्. ननु ''**दाराः पुं भूम्नि**'' (अम.को.३।५।२) इतिवद् एकवचननिवृत्त्यर्थम्, इति चेत्, सिद्धं तर्हि 'पुष्पवत्' पदादेव उभयप्रतीतिः विधानं च युगपत्प्रतीत्यर्थम् इति. तस्मात् संयोगादिनियन्त्रणाभावेऽपि युगपदुभयप्रत्यये न कोऽपि शंकालेशः. यत्र पुनः नियन्त्रणं तत्रतु अन्यतरप्रतीतिरेव इति निश्चयः. एवं 'भक्ति'पदशक्तिं तस्य वाचकत्वप्रकारं च निश्चित्य श्रवणादिषु उक्तरूपेण विहितत्वे प्रमाणानि आहुः **उक्तरूपता** इत्यादि. **उक्तरूपता** इति. साक्षात् पुरुषोत्तमप्रापकत्वेन विहितत्वम्. **भक्तौ** इति पुष्टिमार्गीयश्रवणादिनवके. **तथाच** तद्विधिषु फलत्वेन भगवतः

---

१. साधनभूतायाम् इति क. २. मर्यादाभक्तेः इति ख. ३. वा इति अव्ययं नास्ति क.

भक्तिसाधनत्वोक्तेश्च. एवं सति भक्तिमार्गीयभजनप्रकारेषु स्नेहएव

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इत्यन्तेन. **एवम्** इति. भेदोपपत्तौ सत्यां शीतोष्णादिनिवारणाद्युपचारेषु

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

सिद्धम् आहुः मूले **मन्त्र...** इत्यादिना. तथाच भक्तिसाधनत्वबोधकवाक्येऽपि "**भक्तियोगं सः लभते**" (भाग.पुरा.११।२७।५३) इति 'योग'पदाद् मर्यादाभक्तिश्रवणादिनिर्वाहं लभते इति अर्थः सिद्ध्यतीति साधनभावेन रूपभेदेन भेदाद् उपासनारूपायां तस्यां न भक्तित्वगन्धोऽपि इति अर्थः. ननु मास्तु भक्तित्वम् उपासनादिमार्गीयपूजायां तथापि **भक्तौ** गणिता या पूजा सातु विध्यधीनैव हेत्वन्तरस्य अदर्शनात्. तथा सति अर्चनविध्युद्देश्यत्वन्तु वज्रलेपायितम् इति आशंकायाम् आहुः **एवम्** इत्यादि. तद् विवृण्वन्ति **भेदोपपत्तौ** इत्यादिना. [1]उपासनामार्गीयभक्तिमार्गीयपूजयोः भेदोपपत्तौ सत्याम्.

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

[2]स्पर्शो न दोषावहः स्पर्शे भक्तित्वस्यैव प्रयोजकत्वाद् इति अर्थः. अत्र प्रथमे वाक्ये '**भक्ति**'पदम् अध्यायारम्भे कर्मकाण्डस्य प्रकृतत्वाद् [3]बाह्यानां तत्तुल्यानां श्रवणादीनामेव वाचकम्. द्वितीयेऽपि [4]'**भक्त**'पदस्य उपासनसान्निध्याद् [5]विहितश्रवणादिकर्तृवाचकत्वम्. तृतीये श्रवणादीनां मध्ये पठितत्वात् प्रकरणेन तद्वाचकम्. चतुर्थेतु "**न रोधयति**" इति सन्दर्भे सत्संगस्तुत्या तस्य च "**सत्संगलब्धया भक्त्या मयि मां [6]यः उपासिता**" (भाग.पुरा.११।११।२५) इति वाक्ये भक्तिजनकत्वोक्त्या तस्याः उपासनसान्निध्याद् नियन्त्रणेन विहितश्रवणादिलाभः. पञ्चमेऽपि तथा ज्ञेयम्. एतद्वैलक्षण्यम् उपासनायां स्मारयन्ति **मन्त्र...** इत्यादि. एतावत् प्रयासेन यत् सिद्धं तद् आहुः **एवं सति** इत्यादि. स्नेहेन क्रियमाणानां श्रवणादीनां

---

[1] उपासनामार्गीयपूजयोः इति ख. [2] स्पर्शेन दोषावहः इति उपलब्धः पाठः. यथा निवेशन्तु प्रतिभाति. [3] बाध्यानाम् इति ख. [4] उपासनासान्निध्याद् इति ख. [5] विदित श्रवणादिकर्तृवाचकम् इति ख. [6] यः उपासते इति वाक्ये इति ख.

नियामकः स्नेहवतां, कर्मणि विधिवत्. तद्रहितानान्तु तद्वत्कृतः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

स्नेहवतां तदधीनैव कृतिः यागे विध्यधीनेव. **तद्रहितानाम्** इति स्नेहरहितानां भजने नियुक्तानां कृतिः वक्तृपुरुषाधीना. [1]स्नेहस्य अनुदितत्वाद् मर्यादयैव

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

तथाच एकादशे समाप्तौ भगवद्धर्मकथने भगवता "**देशान् पुण्यान् आश्रयेत मद्भक्तैः साधुभिः श्रितान्, देवासुरमनुष्येषु मद्भक्ताचरितानि च**" (भाग.पुरा.११।२९।१०) इति आज्ञापनात् स्नेहार्थं भजन्तं प्रति तेषां स्नेहवतां रीतिः उपदेष्टव्या नतु वैधी. तथा सति क्व अर्चनविध्युद्देश्यत्वम् इति अर्थः. **मर्यादयैव** इति. एतेन '**वेदाविरुद्ध**'पदं व्याख्यातम्. तेन यः इदानीन्तनाः तद्विरुद्धम् उपदिशन्ति कुर्वन्ति वा ते भ्रान्ता इति सिद्ध्यति. तस्मात् पूर्वेषां रीतिम् अनुसृत्यैव कार्यम्. अतएव "**चन्दनोशीरकर्पूरकुम्कुमागुरुवासितैः, सलिलैः स्नापयेद् मन्त्रैः नित्यदा विभवे सति, स्वर्णधर्मानुवाकेन महापुरुषविद्यया, पौरुषेणापि सूक्तेन सामभी राजनादिभिः**" (भाग.पुरा.११।२७।३०-३१) इत्यनेन उक्तं स्नापनं ज्येष्ठाभिषेकएव क्रियते, विभवे सत्यपि न नित्यदा श्रीजगन्नाथे तथैव करणात्. "**वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः**" (भाग.पुरा.११।२७।३२) इत्यत्र उक्तेनापि उपवीतेन न अलंक्रियते, व्रजे भगवतो अनुपनीतत्वात्. "**अभ्यंगोन्मर्दनादर्शदन्तधावाभिषेचनं, अन्नाद्यं [2]गीतनृत्यानि पर्वणि स्युः उत अन्वहम्**" (भाग.पुरा.११।२७।३५) इत्यत्र उक्तेषु दन्तधावः कदापि न कार्यते अभ्यंगोष्टदिनोत्तरम्. शेषा यथा सौकर्यम् इति युज्यते. एवम् अन्यदपि बोध्यम्. सर्वत्र श्रीभागवताद्युक्तव्रजस्थाद्याचरणस्यैव

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

स्नेहमध्यपातित्वे साक्षात् पुरुषोत्तमप्रापकत्वेन विहितत्वे च सति मुख्ये जघन्ये च अधिकारे यथायथं तदुभयं नियामकम् इति अर्थः. ननु एवं सति जघन्याधिकारिकृतश्रवणादेः स्नेहाभावाद् न पुष्टिभक्तित्वम्.

---

[1] स्नेहस्य अनुदितत्वाद् न मर्यादयैव उपदेष्टव्यः इति अर्थः इति क. ग. स्नेहस्य आदितत्वानाप्यदि यै यः उपदेष्टव्यः इति ख.

[2] गीतनृत्यादि इति ख.

उपदेशएव. सच वेदाविरुद्धएव इति ज्ञेयम्. विधिम् अजानता बालेन पित्रादिशिक्षया कृतसन्ध्यावन्दनादेः कर्मत्ववद् उपदेशानुसारेण कृतेरपि भक्तित्वं, तन्मार्गीयत्वात्. एवम्भूतस्य अग्रे स्नेहो अवश्यं भावि इति ज्ञेयम्. यथा तादृग्बालकृतकर्मणोऽपि उक्तफलसाधकत्वं तथा तादृग्भजनस्यापि पुरुषोत्तमप्रापकत्वमिति किम् अन्यद् अवशिष्यते. आधुनिकानाम् उपदेष्टॄणामपि स्नेहाभावेऽपि तन्मूलभूतानां प्राचाम् आचार्याणां तद्वत्त्वेन [1] तदनुगृहीतत्वेन सर्वोपपत्तेः. स्वानुगृहीतभक्तप्रवर्तितत्वेन यतः तन्मार्गे पक्षपातो भगवतः, अतएव श्रीभागवते

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

उपदेशः इति अर्थः स्नेहं विनापि सम्प्रदायप्राप्ततत्कृतेः भक्तित्वं [2] न

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

मूलत्वादिति. ननु स्नेहाभावेन कृतायाः पूजायाः कथं भक्तिमार्गीयत्वम्

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

भक्तिसाधनत्वेन अक्रियमाणत्वाद् न मर्यादाभक्तित्वम्. मोक्षार्थित्वाभावाद् न प्रावाहिकभक्तित्वम्. भक्तिमार्गीयत्वाच्च न उपासनादिरूपत्वमिति कुत्रापि अनिवेशः इति तदुपदेशवैयर्थ्यं तत्कृतिवैयर्थ्यं च इत्यतः आहुः **विधिम्** इत्यादि. तथाच पुष्टिभक्तावेव निवेशाद् न उपदेशादेः वैयर्थ्यम् इति अर्थः. ननु तत्र प्रवेशेऽपि कृतवैयर्थ्याभावो न शक्यवचनः. स्नेहाभावेन भगवत्प्राप्तिरूपस्य फलस्य वक्तुम् अशक्यत्वाद् इत्यतः आहुः **एवम्भूतस्य** इत्यादि **अवशिष्यते** इत्यन्तम्. तथाच न तत्कृतिवैयर्थ्यम् इति अर्थः. ननु तथापि इदानीं तदुपदेशवैयर्थ्यं वज्रलेपायितम्. आधुनिकानाम् उपदेष्टॄणामपि स्नेहाभावात्. तथाच भक्तिमार्गीयत्वमपि अभिमानमात्रमिति तदपि व्यर्थम् इति आशंकायाम् आहुः **आधुनिक...** इत्यादि. तदनुगृहीतत्वेन इति. तेषाम् इति शेषः. पक्षपाते प्रमाणम् आहुः **अतएव** इत्यादि **लिख्यते** इत्यन्तम्. ननु एवं

---

[1] भगवदनुगृहीतत्वेन इति उपलब्धेषु पुस्तकेषु पाठः. श्रीपुरुषोत्तमचरणवाक्यानुरोधेनतु एवम्. एवमेव तत्र तैः प्रतीकस्य ग्रहणात्. [2] न अन्यत्वमपि इति अर्थे इति ख. ग. घ.

ब्रह्मादिवाक्यं “स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीमम् अदभ्रसौहृदाः, भवत्पदांभोरुहनावम् अत्र ते निधाय याताः सदनुग्रहो भवान्” (भाग.पुरा.१०।२।३१) इति. अत्र भगवत्पदाम्भोजस्य भक्तिमार्गत्वेन तद्रूपस्वसम्प्रदायप्रवर्तनमेव तन्निधानम्. तत्प्रवर्तितसम्प्रदाये प्रवृत्तानां तादृक् साधनाभावेऽपि साक्षाद् अनुगृहीतेषु पक्षपातेन तत्सम्बन्धिष्वपि अनुग्रहं करोषि इति अभिप्रायेण उक्तं ‘सदनुग्रहः’ इति. सत्सु अनुग्रहो यस्य इति अर्थः. अस्मिन् अर्थे प्रामाण्यार्थं भगवत्सम्मतिरेव दर्शिता ‘भवान्’ इत्यनेन. तत्सम्प्रदायस्थानां तरणावश्यम्भावाय नौत्वनिरूपणम्. तेन अनायासेन भवाब्धितरणं सूचितम्. बाहुभ्यां तरणे हि आयासो नावा तरणे न तथेति एतत् सर्वं विवरणे पितृचरणैः विवृत्तमिति न अत्र लिख्यते. भगवद्भजने परम् इयं व्यवस्था. अग्निहोत्रादीनां प्रभ्विच्छां ज्ञात्वा यदा अनुष्ठानं तदा यथाकल्पसूत्रमेव. एतेन अप्रामाणिकत्वेन अन्धपरम्परात्वशंका निरस्ता, प्रमाणसिद्धत्वात्.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

अन्यथात्वमपि इत्यर्थे कर्म दृष्टान्तीकृत्या आहुः **विधिम् अजानता** इत्यादिना. **इयं व्यवस्था** इति. सम्प्रदायप्राप्तमेव कार्यं न अप्राप्तं विध्यनुरुद्धमपि

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति आशंकायाम् आहुः **स्नेहं विना** इत्यादि. **इत्यादिना** इति. **लिख्यते** इत्यन्तेन इति अर्थः. **इत्येवंरूपा** इति. ‘सदनुग्रह’पदव्याख्यानसूचिता

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

जघन्याधिकारेऽपि चेद्, भक्तेः फलपर्यवसायित्वं तदा कर्मणः [1]फलार्थित्वाभावात् तदिच्छाज्ञानेऽपि तत्कृतिवैयर्थ्यात् तत्यागापत्त्या तेषु सदाचारोच्छेदप्रसंगः इत्यतः आहुः **भगवद्** इत्यादि. तथाच ज्ञातायाम् इच्छायां तदकरणे [2]आभिप्रायिकाज्ञाभंगदोषः. यदि च विशेषतो ज्ञानाभावेन सन्देहः तदा “**श्रुतिस्मृती ममैव आज्ञे यः ते उल्लंघ्य वर्तते, आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः**” (वाधूलस्मृति.१९५) इति सामान्याज्ञैव

१.फलार्थत्वाभावाद् इति क. २.आभिप्रायिकेति न अस्ति. आज्ञाभंगदोषः इति एतावन्मात्रम् अस्ति ख.

प्रेम्णश्च फलत्वेन स्वकृत्यसाध्यत्वेन च न विहितत्वं सम्भवति किन्तु तस्य अनुवादएव. ''यः एतस्मिन् महाभागाः प्रीतिं कुर्वन्ति मानवाः''

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इत्येवंरूपा. मार्गभेदेन भगवदाराधनत्वाद् अग्निहोत्रादीनामपि अन्यथाकरणं प्राप्तम् अपवदन्ति **अग्निहोत्रादिनाम्** इति. **एतेन** इति. शिष्टाचारस्य प्रमाणत्वाद् उपदेशात् स्नेहं विनाऽपि प्रामाणिकत्वात् कृतेः

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

उक्तरूपा व्यवस्था नियमात्मिका भगवद्भजनएव नतु वैधेपि कार्ये इति अर्थः. तर्हि तादृशस्य वैधे का व्यवस्था इति अपेक्षायाम् आहुः **मार्गः** इत्यादि. तथाच विशेषाज्ञायाः अभावात् तादृशस्थले ''**श्रुतिस्मृती ममैव आज्ञे यः ते उल्लंघ्य वर्तते, आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः**'' (वाधूलस्मृति.१९५) इति आद्याज्ञैव अनुसन्धेयेति मूलाशयः इति भावः. ननु भगवद्भजने या व्यवस्था उक्ता तस्याः वाचनिकत्वाभावेन प्रयोजकस्य स्नेहस्यापि अभावेन तादृशकृतेः अन्धपरम्परात्वात् स्नेहरूपफलजनकत्वं दुर्घटम् इत्यतः आहुः **एतेन** इति उक्तवाक्योपन्यासेन. निरासं व्याकुर्वन्ति **शिष्ट...** इत्यादि. **न शंकनीयम्** इति. ''**साधूनां समयश्चापि प्रमाणं**

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

तैः अनुसन्धेयेति न तेषु आचारोच्छेदप्रसंगः इति अर्थः. ननु तथापि कर्मकरणमेव प्राप्तं नतु कल्पसूत्रानुरोधोऽपि. यथा कथञ्चित् करणेऽपि आज्ञानिष्पत्तेः इति आशंकायाम् [1]एषातु प्रसंगादेव निरस्तः इति आहुः **एतेन** इत्यादि. ननु तापनीयश्रुतौ ''**तं भजेद्**'' (गो.पू.ताप.उप.२।१३) इति विधाय ''**भक्तिः अस्य भजनं तद् इह अमुत्रौपाधिनैराश्येन अमुष्मिन् मनःकल्पनम्**'' (गो.पू.ताप.उप.१।३) इति लक्षणदर्शनात् [2]प्रेम्णोऽपि विहितत्वात् शक्यतावच्छेदकम् एकमेव स्वीकार्यं न द्वयम्. तावता अनेकार्थत्वदोषस्यापि निवृत्तिः. तथा सति स्नेहे भजनप्रकारनियामकत्वम्

---

[1] एषातु प्रसंगादेव इति ख. [2] अपि नास्ति ख.

(भाग.पुरा.१०।८।१८), ''माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः स्नेहो 'भक्तिः' इति प्रोक्तः तया मुक्तिः न च अन्यथा'' (त.दी.नि.१।४२), तृतीयस्कन्धे च ''देवानां गुणलिंगानाम् आनुश्रविककर्मणाम्'' (भाग.पुरा.-३।२५।३२) इत्यादि, ''मद्गुणश्रुतिमात्रेण'' (भाग.पुरा.३।२९।११) इत्यादि. साधनरूपा श्रवणादिलक्षणातु ''तस्माद् भारत! सर्वात्मा भगवान् हरिः ईश्वरः श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्च इच्छता अभयम्'' (भाग.पुरा.२।१-।५) इत्यादिवाक्यैः विधीयतएव इति सर्वम् अनवद्यम् इति दिक्.

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

अन्धपरम्परात्वं शंकनीयम् इति अर्थः. **प्रेम्णश्च** इति. स्वःपदास्पदीभूतसुखसाधने यथा पुरुषव्यापारः तथा अत्रापि इति भावः. स्नेहरूपायाः फलत्वेन अविधेयत्वं साधनरूपायाः श्रवणाद्यात्मकत्वेन विधेयत्वम् इति विवेको यः एतस्मिन्

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

वेदवद् भवेद्'' ( ) इति वाक्ये **'वेदवद्'** इति अतिदेशात् स्मृत्यपेक्षया कलौ तस्य सबलत्वात् तेन प्राप्तौ न शंकनीयम् इति भावः. ननु तापनीयश्रुतौ ''**तं भजेद्**'' (गो.पू.ता.उ.२।१३) इति विधाय ''**भक्तिः अस्य भजनं तद् इह अमुत्रोपाधिनैराश्येन अमुष्मिन् मनःकल्पनम्**'' (गो.पू.ता.उ.१।३) इति लक्षणदर्शनात् प्रेम्णोऽपि विहितत्वात् कः तत्र विशेषः इत्यतः आहुः **प्रेम्णः** इत्यादि. तद् व्याकुर्वन्ति **स्व...** इत्यादि. तथाच उपबृंहणवाक्येषु अनुवाददर्शनात् तत्रापि प्रेमकारणीभूतमनोव्यापारस्यैव विधानं नतु प्रेम्णः इति आशयः. शेषं मूले टीकायां च प्रकटार्थम्

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

असंगतम् इत्यतः आहुः **प्रेम्णः** इत्यादि **विधीयतएव** इत्यन्तम्. तथाच उपबृंहणवाक्येषु अनुवाददर्शनात् तत्रापि प्रेमकारणीभूतमनोव्यापारस्यैव विधानं नतु प्रेम्णः. श्रवणादिषुतु उपबृंहणेऽपि विधिरिति प्रवृत्तिनिमित्तद्वयम् आवश्यकम्. एवं सिद्धे भेदे स्नेहस्य भजनप्रकारनियामकत्वमपि सूपपन्नम् इति अर्थः. तदेतद् आहुः **सर्वम् अनवद्यम्** इति. दिग् इत्यनेन युक्त्यन्तरसत्ता सूच्यते. ताश्च साधनाध्यायतृतीयपादादिभ्यो अवगन्तव्याः इति शुभम्. ग्रन्थसमापने

उपास्तिं मन्यन्ते मधुमथनभक्तिं निजकृता-
थंतां तत्रोपास्यं परमपुरुषं चापि सुविदः ॥
द्वयोः सारूप्यात् तद्भ्रमहतिकृतिमानसगतम्
मुदा भक्तेः हंसं प्रकटमकरोद् विट्ठलकृती ॥१॥
व्रजामि चरणं मुदा शरणमैहिकामुष्मिके
निरस्तनिजसंशयो यः इह भाग्यवद्भिः स्मृतः ॥
व्रजेशसुतपादपंकजपरागरागाञ्चितम्
[१]करोतु सततं स मां निजतनूजवात्सल्यतः ॥२॥

इति श्रीमद्गोपीजनवल्लभचरणैकतानश्रीविट्ठलेश्वरविरचितो
भक्तिहंसः समाप्तः

श्रीमद्रघुनाथप्रणीता भक्तितरंगिणी

इत्यादिना ज्ञापितः. **उपास्तिम्** इति. सुविदः सम्प्रदायाभिज्ञापि मन्त्रोपासनायाः भक्तित्वं तदाचरणमात्रेण कृतकृत्यत्वं परमपुरुषं पुरुषोत्तमं च फलत्वेन मन्यन्ते इति सर्वत्र अन्वेयम्. **द्वयोः** इति. बाह्यसाधनाचरणस्य एतन्मार्गीयतन्मार्गीययोः तुल्यत्वाद् भेदकस्य भावस्य आन्तरत्वाद् न्याय[२]प्राप्तभ्रमस्य हतिकृते हननाय [३]परस्परसंकीर्णस्वरूपस्य क्षीरनीरवद् विवेचनाय सरःस्थानीयमनोगतं भक्तेः हंसं बहिः उपकाराय प्रकटितवान्. **कृती** सफलोद्यमः ॥१॥ **व्रजामि** इति. अहम्

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

प्रतिज्ञापूर्तिं हेतुत्वेन सूचयन्तः प्रयोजनम् आहुः **उपास्तिम्** इत्यादि. **निजकृतार्थताम्** इति. तया इति शेषः. **तत्र** इति उपास्तौ. तथा अभिमाने हेतुः **द्वयोः सारूप्याद्** इति. [४]उपास्तिभक्त्योः उपास्यभजनीययोश्च साधर्म्याद् इति अर्थः. एवं प्रतिज्ञातं निगमयित्वा प्रथममंगलवाक्योक्तं निगमयन्ति **व्रजामि** इत्यादि. [५]इह भाग्यवद्भिः स्मृतः, यः निरस्तनिजसंशयः, निरस्तस्वीयसंशयः, निरस्तस्वस्वरूपविषयसंशयो वा, तस्य इति शेषः. तस्य

---

१. भक्तितरंगिण्यनुरोधी पाठो अयम्. विवेकस्तु "करोति सततं हि माम्" इति पाठं प्रतिपद्यते. सएव च मूलपुस्तकेषु प्रायशः उपलभ्यते. २. न्यायप्राप्तभ्रमहननकृते हननाय इति क. ग. ३. परस्परं संकीर्णस्वरूपम् इति क. ख. ४. उपासनाभक्त्योः इति ख. ५. विश्वासाय भाग्यवद्भिः स्मृतः इत्यादि ख.

ऐहिकामुष्मिके अर्थे मुदा चरणं शरणं यामि. निरस्ता निजेषु स्वविषयेषु संशया यस्य. यः चरणः इह लोके भाग्यवद्भिः कृतपुण्यपुञ्जैः स्मृतो न इतरैः. सः चरणः इह अवसरे व्रजेशसुतचरणकमलरजश्छुरितं मां सर्वदा करोतु. अतिदुर्लभम् अदेयमपि स्वांगजनस्नेहवशेन ददातु इति अर्थः ॥२॥

यद्रसास्वादरसिकास्तृणीकृतगृहाश्रमाः ॥
हसन्ति संसृतिं हंसाः सेयं भक्तितरंगिणी ॥१॥

इति श्रीवल्लभनन्दनचरणैकशरणश्रीरघुनाथकृता
भक्तितरंगिणी सम्पूर्णा

श्रीमत्पुरुषोत्तमप्रणीतं तीर्थम्

इति शुभम्.

सिद्धे भेदे धर्मभेदाद् उपास्यभजनीययोः ॥
रूपभेदाद् भक्त्युपास्त्योर्भेदः सिद्ध्यति यागवत् ॥१॥
[१]सः धर्मफलभेदाभ्यां समुपोद्बलितो [२]भवन् ॥
सारूप्यजनितां भ्रान्तिं विदां हन्ति हृदि स्थिताम् ॥२॥
तेन भक्तिपदं गौणम् उपास्तावववधार्यताम् ॥
श्रवणादिषु हेतुत्वात् तथा लाक्षणिकं यतः ॥३॥
स्वतन्त्रफलरूपेहि भक्त्याख्या सेवने स्मृता ॥
प्रेम्णा कृतेषु भक्त्याख्या श्रवणादिषु या पुनः ॥४॥
सा मुख्यकल्पा गंगावद् यदा नानार्थता तदा ॥
प्रवृत्तिहेतुभेदेन नैव प्रेम्णि विधेयता ॥५॥
अतः प्रेम्णा कृतं सर्वम् अवैधमपि तद्बलात् ॥
हरिरंगीकरोत्येव तेन तन्मार्गगामिनाम् ॥६॥
उपदेशानुसारेण भजतां स्नेहसम्भवः ॥
ततश्च भगवत्प्राप्तिरेष ग्रन्थार्थसंग्रहः ॥७॥

---

१. स्वधर्मः इत्यादि ख. २. अभवद् इति क.

प्रविश्यानेन तीर्थेन निम्नां भक्तितरंगिणीम्॥
गाहमानाः प्रपश्यन्तु भक्तिहंसं मुदान्विताः॥८॥

इति श्रीमद्वल्लभनन्दनचरणैकतानपीताम्बरात्मजश्रीपुरुषोत्तम
विरचितं भक्तितरंगिण्याः तीर्थं सम्पूर्णम्

श्रीमत्पुरुषोत्तमप्रणीतो विवेकः

चरणं मुदा ऐहिकामुष्मिके शरणं व्रजामि. ऐहिकामुष्मिके विषये निरस्तस्वीयसंशयः इति वा [1]विश्वासाय. तत्फलं स्वस्मिन् दर्शयन्ति. यः निजतनूजवात्सल्यतः सततं कञ्जपरागरागाञ्चितम्. कञ्जानि [2] पद्मानि तत्परागे यो रागः आसक्तिः तेन अञ्चितं व्याप्तम्. अतिसुखासक्तम् इति अर्थः. तादृशं मां व्रजेशसुतपादपम्. व्रजेशसुतो भगवान्, तत्पादरूपो भक्तिमार्गः इति **'भवत्पदाम्भोरुहनावम्'** इत्यत्र सिद्धम्. तस्य पं रक्षितारं [3]करोति इति अर्थः. एवम् अन्वयेन यतिभंगदोषः परिहृतो बोध्यः. यथाश्रुतव्याख्यायान्तु वृत्तिगन्धिचूर्णिकात्वाद् न तत्र यतिविचारः इति सर्वम् अनवद्यम्.

नमाम्याचार्यचरणान् प्रभून् श्रीविट्ठलेश्वरान्॥
यत्कृपाभक्तिहंसीयविवेकस्फुटतां व्यधात्॥१॥

इति श्रीमद्वल्लनन्दनचरणशरणपीताम्बरात्मजश्रीपुरुषोत्तम
विरचितो भक्तिहंसविवेकः सम्पूर्णः

---

[1] विश्वासाय इति नास्ति इति ख. [2] पद्मादीनि इति क. [3] करोतु अर्थः इति ख.

॥ श्रीमद्विट्ठलेश्वराणां षड्विंशतिपत्राणि ॥

(१)

॥ श्रीकृष्णाय नमः ॥

श्रीनवनीतप्रिय-मथुरानाथ-द्वारकानाथ-गोवर्धनधर-विट्ठलेश्वर-मदनमोहन-गोवर्धनधर-नवनीतप्रियचरणारविन्देषु अनुचरस्य प्रणतयो निवेदनीयाः

स्वस्ति श्रीमज्ज्येष्ठभ्रातृचरणकमलेषु यवीयसो विट्ठलस्य प्रणामकोटिनिवेदको अयं पत्रदूतः. शम् इह, भावत्कम् आशासे. अहं भगवदाज्ञया रासोत्सवपर्यन्तं श्रीगोवर्धनधरणचरणारविन्दनिकटे स्थितो अस्मि. हरिद्वारं प्रति आज्ञा न जातेति न गतम्. अत्र मम अस्वास्थ्यं बहु जातम् आसीत्. उपवासदशकं कृतम्. अधुना भगवत्कृपया श्रीमत्कृपया च नैरुज्यं जातम् अस्ति. कापि चिन्ता न कार्या. अक्का-अम्मा-अत्ताचरणेषु नतयः. अक्का यथा दुःखं न करोति मम अस्वास्थ्यं श्रुत्वा तादृक् कर्तव्यम्. भवतापि कापि चिन्ता न कार्या मम, भगवति सर्वत्र. [1]यादवेन्द्रपुरीषु [2]ब्रह्मानन्देषु दीक्षितेषु [3]हरिहर- [4]नागनाथ- [5]चूडादिषु नमस्काराः. [6]विष्णुदासादिषु आशिषः. अत्रत्य वैष्णवानां नतयः.

निर्भरं क्रीडितोराली मुदा कुञ्जे विवाससोः ॥
अन्योन्यस्य प्रभैवासीद् अन्योन्यमुचितांशुकम् ॥१॥

---

[1] यादवेन्द्रपुरी, ? [2] ब्रह्मानन्द. ? [3] हरिहर (श्रीप्रभुचरणात्मजाश्रीशोभादेव्याः श्वसुरः) [4] नागनाथ. ? [5] चूडा. ? [6] विष्णुदास (वै.वा.८४।५०)

(२)

॥ श्रीकृष्णाय नमः ॥

स्वस्ति श्रीविट्ठलदीक्षितानां [१]धरमसी वैष्णवेषु [२]सायणाकृष्णदासादिषु आशिषः. शम् इह भावत्कम् आशास्महे. तुम्हारे समाचार तुम्हारे पत्रतें पाये.

ऐहिके पारलोके च सर्वथा शरणं हरिः ॥
सम्पत्स्वापत्स्वपि सदा शरणं हरिरेव हि ॥१॥

किमधिकम्? [३]गोविन्दद्विवेदिपुत्रकृष्णदासस्य व्यावहारिकी चिन्ता कार्या. [४]यादवपण्डितेषु कृष्णस्मरणम्. [५]हरिजीभाईलादिषु आशिषः.

---

[१].धरमसी. ? [२].सायणाकृष्णदास. ? [३].गोविन्दद्विवेदिपुत्रकृष्णदास. (वै.वा.८४।३४)
[४].यादवपण्डित. ?
[५].हरिजीभाईला (वै.वा.२५२।१।१०)

(३)

॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

अजनिरजनिः प्रादुर्भूतं तमो विजना दिश-
स्त्वमसि चतुरा चाहं संगाभिलाषवती मुहुः ॥
तदपि तु यदप्राप्तिः प्रेष्ठस्यैतन्मया सुविचारितम्
प्रियसखि परीरम्भारम्भे विधेरविधेयता ॥१॥
त्वत्तो नान्यामहं पश्ये राधाबाधावरोधिनीम्
तत् त्वं यथैव मत्प्राणो मिलत्येव तथा कुरु ॥२॥

स्वस्ति श्रीमच्छ्रीगोवर्धनोद्धरणधीरचरणसेवकेषु [१]श्रीकृष्णदास-[२]रामदास-[३]केशवदास-[४]माधवदास-[५]गौतमदास-[६]भगवद्दास-[७]राघवदास-[८]लक्ष्मणयादवदास-[९]खनूनरसिंहदास-[१०]गोपालदास-[११]श्रीमताखीलूप्रभृतिषु विट्ठलानां कुशलवार्ताभिज्ञापको अयं पत्रलेखः.

भद्रम् इह, भावत्कम् आशास्महे. गृहोपविष्टे भगवति अहम् आगच्छन् स्थितः तदा [१२]सत्यभामायाः विवाहवार्तोपस्थिता. तेन आगमनम् अधुनैव नाभूत्. माघे यदि विवाहो भविष्यति, तदा तदनन्तरं भाग्यं चेद् भविष्यति मया आगन्तव्यम्. अन्योन्यप्रीत्या सेवा कर्तव्या. [१३]पुरुषोत्तमादयः कुशलिनः. [१४]काशीश्वरेषु [१५]रघुनन्दनेषु च नतयो निवेदनीयाः. किम् अधिकम् ?

१.श्रीकृष्णदास (वै.वा.२५२।१।२४) २.रामदास (वै.वा.२५२।२।९५) ३.केशवदास. ? ४.माधवदास (वै.वा.२५२।१।८) ५.गौतमदास. ? ६.भगवद्दास (वै.वा.२५२।२।-१०७) ७.राघवदास (वै.वा.२५२।३।२३४) ८.लक्ष्मणयादवदास. ? ९.खनूनरसिंह-

दास. ? १०.गोपालदास (वै.बा.२५२।१।२५,२५२।१।११) ११.श्रीमताखीलू. ? १२.सत्यभामा (श्रीगोपीनात्मजा) १३.पुरुषोत्तम (श्रीगोपीनाथात्मजः) १४.काशीश्वर. ? १५.रघुनन्दन. ?

(४)

॥श्रीकृष्णाय नमः॥

स्वस्ति श्रीगोवर्धननाथपादपद्मपरागेषु [१]श्रीकृष्णदास-[२]रामदास-[३]ग्वालभट्ट-[४]नरसिंहदास-[५]यादवदास-[६]राघवदास-[७]गोपीनाथदास-[८]केशवदास-[९]माधवदास-[१०]सन्तदास-[११]हरिदास-[१२]गोपालदास-[१३]स्वामिदास-[१४]मनालालदास-[१५]भीष्म[१६]गोवर्धनधारिदास-[१७]अजया-दामोदरदास-[१८]सधू[१९]कुम्भनाप्रभृतिषु श्रीविट्ठलानाम् आशिषां कोटिः. भद्रम् इह. भावत्कं सततम् आशास्महे. अपरञ्च सेवा सम्यक् कार्या. ग्वालभट्टः सम्यक् पाकादिसेवां करोति इति श्रुतं तेन सन्तोषो जातः. सम्यक् शिक्षणीयश्च. अग्रे व्यञ्जनादिकं यथा भवति तथा विधेयम्. भोगसामग्री सम्यक् दृष्ट्वा देया. यथाशक्तिः सर्वे भोगाः निर्वाह्याः. चतुर्थप्रहरे मक्षिकामार्जनार्थं कश्चिद् नियोज्यः. यदि यमुनाजलनिर्वाहः सेवकैः भवति तदा तथैव कार्यम्. परन्तु अतिकष्टेन न कार्यं, मत्स्वामिनः कोमलस्वभावत्वात्. अन्यच्च यवनादयो भगवद्द्वारे आगच्छन्ति तदा यथापूर्वं भाषणमिलनप्रसादादिकं कार्यम्. यद्यपि हार्दं न भवति तथापि बाह्यतोऽपि कार्यम्. सावधानैः सदा परस्परं सस्नेहैः अबहिर्दृष्टिभिः भगवत्सेवकैः सेवापरैः स्थेयम्. चिन्ता कापि न कार्या. गोकुलजीवनः सर्वं भद्रमेव करिष्यति. अहं यथा शीघ्रं दर्शनं प्राप्नोमि तथा विधेयं प्रत्यहम्. भवत्सु अधिकं किं लिखामि? स्वभाग्योदये शीघ्रमेव आगमिष्यामि. चिन्ता कापि न कार्या. पत्रं मुहुः प्रेषणीयम्. तत्रत्य समाचारो लेखनीयः. हरिवंशस्य नतयः. अत्र अहं दुग्धं बहु पिबामि. [२०]रामदासः पायसादिकं सर्वं गृह्णातु. दुग्धोदनप्रसादः [२१]कृष्णदासस्यापि* देयः. सर्वैः कृष्णदासस्य आज्ञायां स्थातव्यम्. मर्यादायां सर्वैः स्थेयम्.

न स्वाध्यायबलं न यागजबलं नो वा तपस्याबलम्।।
नो वैराग्यबलं न योगजबलं नाप्युक्तभक्तेर् बलम्।।
नैव ज्ञानबलं न चान्यदपि यत् किञ्चद् बलं मेऽस्ति।।
किन्त्वद्यश्वोऽपि यदा-तदा तव कृपाकूतेक्षणं मे बलम्।।

१.श्रीकृष्णदास (वै.वा.८४।८४) २.रामदास (वै.वा.२५२।२।९५) ३.ग्वालभट्ट. ? ४.नरसिंहदास. ? ५.यादवदास. (वै.वा.८४।३९) ६.राघवदास (वै.वा.२५२।३।२-३४) ७.गोपीनाथदास (वै.वा.२५२।१।७९) ८.केशवदास. ? ९.माधवदास (वै.वा.२५२।१।८) १०.सन्तदास (वै.वा.८४।७६) ११.हरिदास (वै.वा.२५२।१।-१५) १२.गोपालदास (वै.वा.२५२।२।८७) १३.स्वामिदास १४.मनालालदास (वै.वा.२५२।३।१९८) १५.भीष्म (वै.वा.२५२।३।१७०) १६.गोवर्धनधारिदास (वै.वा.२५२।३।१९८) १७.अजयादामोदरदास. ? १८.सधू(सदुपांडे) (वै.वा.८४।-७३) १९.कुम्भना(कुम्भनदास) (वै.वा.८४।८३) २०.रामदास (वै.वा.८४।३३) २१.कृष्णदास (वै.वा.८४।८४)

❊'रामदास' इति ग पाठः.

(५)

॥श्रीहरिः॥

स्वस्ति श्रीविट्ठलनाथदीक्षितानां [1]गोपीनाथभट्टेषु आशिषः. शम् इह, भावत्कम् आशास्महे. अपरञ्च ना वृत्तान्तं हरिवंशुडुचर्पेदिहुण्डी प्रविष्ट मामनु नीइठ कुशलम् उन्नइ. हरिराम गोवर्धनु लुलिस्मे उन्नारु. भातृवियोगजनितदुःखं चेय्य वल्दु. भगवदिच्छाधीनमता मरिनाउ. विवेकिनी [2]गोविन्दभट्टः [3]वासुदेवभट्टादिकुशलम् उन्नारु. कार्यमैनेवे गिरं वच्चेडिदि. किमधिकम्? शिवावच्चिनाडु वानि दीयति ऐय्येड टवेऽरुं चानि.

भावानुवाद

स्वस्ति. श्रीविट्ठलनाथदीक्षितके आशीर्वाद. हम यहां कुशल हैं और आपकी कुशलता चाहते है. मेरा समाचार चाचा हरिवंश द्वारा जानोगे. तुम्हारे घरमें सब कुशल है. हरिराम गोवर्धनमें है. भ्रात्रवियोगजनित दुःख मत करना. सब भगवदिच्छाके अधीन है. गोविन्दभट्ट वासुदेवभट्ट आदि सब कुशल हैं. कार्य सम्पन्न हो जाय तो जल्दी आ जाना. शिवा आया है उनको कहाँ उतारुं?

१.गोपीनाथभट्ट (काश्यपत्रिग्रहशोभागणेशयोः तृतीयात्मजः, श्रीप्रभुचरणानां दोहित्र) २.गोविन्द भट्ट. (श्रीविश्वनाथात्मजश्रीरुक्मिणीभ्राता) ३.वासुदेव भट्ट. (श्रीप्रभुचरणसद्मोकः)

(६)

स्वस्ति श्रीगिरिधरादिषु आशिषः.

दशम्याम् अत्र अवश्यपवित्रारोपार्थम् आगन्तव्यम्. तन्मध्ये दिनानि अल्पानीति तावत्पर्यन्तम् अत्रैव स्थेयम् इति मन्मतिः. यदि हस्तार्कएव तत्रापि हिन्दोलामुहूर्तं तदा सर्वं भवद्भिरेव कार्यम्. अन्यत् चेत् तद् उक्त्वा एतदुक्ता प्रत्येयं तदा प्रश्विंगतं तथा करिष्ये. किम् अधिकम् !

(७)

॥ श्रीगोपीजनवल्लभाय नमः ॥

स्वस्ति श्रीविट्ठलदीक्षितानां [1]नागजीप्रभृतिषु आशिषः. शम् इह. भावत्कम् आशास्महे.

सततं गोपीकाधीशपदाम्भोजं सुभावितम्॥
हृदि कार्यं तदीयत्वं ततएव फलिष्यति॥१॥
निवेदितात्मभिन्नेषु सदौदासीन्यम् आचरेत्॥
प्रावाहिकाः तेऽपि चेत् स्युः उपेक्षैवोचिता तदा॥२॥

पुरुषोत्तमात् कुशलिनः समागताः स्म. गिरिधरादयः कुशलिनः. किमधिकम्? श्रीकृष्णः शरणं मम. शुभं भवतु.

---

[1] नागजी (वै.वा.२५२।१।१)

(८)

॥ श्रीगोपीजनवल्लभाय नमः ॥

स्वस्ति श्रीगिरिधरादिषु आशिषः. शम् इह भावत्कं तद् आशास्महे. मदागमानन्तरं कथं स्थितो गिरिधरः? कदा किं गृहीतवान् न वा? रात्रौ च किं वृत्तम्? उपचारविशेषः कः कृतः? निद्रा सम्पन्ना? पूर्ववद् नैर्बल्याभावो अस्ति ज्वराभावश्च? [१]विद्याधरः किं वदति? [२]स्वामिदासः आगतो न वा? आगत्य वा किम् उक्तवान्? किं कृतवान् इत्यादि सर्वं लेखनीयं, भृगुवारे दिवावृत्तान्तः सर्वोऽपि रात्रिवृत्तान्तश्च. अस्मिन् पर्याये मद्धृदि भयं चिन्तातिशयेन जायते. सेवानन्तरं तत्र आगमने भद्रासांमुख्यम् अग्रे च शनिवासरः इति दिन २ स्थीयते तथापि भवल्लिखनानुरूपं व्यवहर्तव्यं गिरिधरस्य मदागमनं शीघ्रमपेक्षितं चेत् तथा लेखनीयम्. मया रवौ तत्र आगन्तव्यम् इति मनोऽस्ति परन्तु चिन्ताव्याप्तः तिष्ठामि सर्वांशे श्रीकृष्णः शरणम् अस्ति तेनैव शुभं सर्वं भवति भावि च. किमधिकम्.

१.विद्याधर. ?

२.स्वामिदास. ?

(९)

॥ श्रीकृष्णाय नमः ॥

अथ आत्मसुतेभ्यः पत्रम्

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधरस्य च श्रीगोविन्द-बालकृष्ण-श्रीवल्लभ-रघुनाथ-यदुनाथ-घनश्यामेषु गिरिधरस्य च भवतां पुत्रेषु आशिषः. शम् इह, भावत्कं भद्रम् आशास्महे. टोडाग्रामपर्यन्तं श्रीगोकुलनाथेन कुशलेन समानीताः स्म. अत्रैव दोलोत्सवश्च कारितः. गिरिधरविषयिणि अस्मद्विषयिणि च कापि चिन्ता न कार्या. श्रीगोवर्धनेशएव अविता अस्ति. उभयत्रापि सेवा सम्यक् कार्या कारणीया च. स्वस्वदेहरक्षाः सर्वैः प्रकारैः कार्या. सेवकाः स्व-स्वमर्यादायां च रक्षणीयाः, बालकानां रक्षा सर्वैः प्रकारैः कार्या. यद् द्रव्यम् आगमिष्यति तन्मध्ये तत्कालानुरूपव्ययोपयोगी यावद् भवति तावत् स्थापयित्वा शेषेण अवश्यम् ऋणशोधनं कार्यम्. व्ययश्च सावधानतया करणीयः. निशि यामिकाः सावधानाः स्थापनीयाः. इतः प्रेषितः अश्वो गोविन्दभट्टेभ्यो दत्तोऽस्ति अस्माभिः तं विक्रिय तद्द्रव्यं तैः ग्राह्यम्. पत्रं मुहुः प्रेषणीयम्. तत्रत्य सर्वोऽपि वृत्तान्तो लेखनीयः. गिरिधरापत्यानां विशेषतः कुशलं लेख्यम्. चिन्ता कापि न कार्या. श्रीगोवर्धननाथो अस्मत्कुलपतिः अस्मद्हितमेव करिष्यति. किम् अधिकम्. चैत्र वदि ४ [१]गोविन्दभट्टेषु [२]गणेशभट्टेषु [३]वासुदेवभट्टेषु च आशिषः. [४]पदकृद्गोविन्ददासेषु भगवत्स्मरणं वाच्यम्. [५]मदनसिंहादिषु [६]कृष्णादासादिषु आशिषो वाच्याः. वासुदेवभट्टैः आगन्तव्यं स्वगृहे पुरोहितगृहात्. [७]वेंकटप्रभृतिषु [८]कृष्णरायादिषु आशिषः इति.

१.गोविन्दभट्ट. (श्रीविश्वनाथत्मजश्रीरुक्मिणीभ्राताः) २.गणेशभट्ट. (वादीभपञ्चानना श्रीहरिहरभट्टात्मजः एवं प्रभुचरणात्मजायाः श्रीशोभादेव्याः पतिः) ३.वासुदेवभट्ट.?

४.पद्कृद्गोविन्ददास (वै.वा.२५२।३।२४७) ५.मदनसिंह. ? ६.कृष्णदास. (वै.वा.८४।८४) ७.वेंकट. ? ८.कृष्णराय. (प्रभुचरणात्मजादेवकाअह्लादभट्टात्मजः)

(१०)

॥ श्रीगोपीजनवल्लभाय नमः ॥

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधर-गोविन्द-बालकृष्ण- श्रीवल्लभ-रघुनाथ-यदुनाथ-घनश्यामेषु गिरिधरस्य च भवत्पुत्रेषु च आशिषः. शम् इह, भावत्कं कुशलम् आशास्महे. उभयत्र सेवा सम्यक् कार्या. भोगादौ वैष्णवानां विश्वासो न कार्यः. मध्ये-मध्ये मनोहरभोगोऽपि कार्यः. एतदर्थं गृहे दुग्धासम्भवेऽपि अन्यतोऽपि आनाय्य कार्यः. अपरञ्च

सर्वे परिगृहीताः स्मो गोकुलस्वामिना वयम् ॥
न त्यक्ष्यति दयासिन्धुरस्मानन्यायिनोऽपि हि ॥१॥
स्वकृत्याभीः भवत्येव तथापि करवाणि किम् ? ॥
तथापि गतिरस्माकं सएवेति न भीरपि ॥२॥
यथा वयं तदीयाः स्मः तथा सोऽपि निसर्गतः ॥
अस्मत्प्रभुरतश्चिन्ता नैहिके पारलौकिके ॥३॥
चिकीर्षितं कारयित्वा शीघ्रमानेष्यति प्रभुः ॥
अस्मानतो न चिन्ता वः कार्या सर्वात्मना प्रियाः ॥४॥
एतेषाम् अहमेवास्मि सर्वस्वमिति सुन्दरः ॥
जानात्यस्माकम् अज्ञानेप्यतः कर्ता स्वतोऽखिलम् ॥५॥

ज्येष्ठे मासि प्रभुः अस्मान् आनेष्यति. कापि चिन्ता न कार्या. पत्रं मुहुः प्रेषणीयम्. दोलोत्सवः उत्तरानक्षत्रे अरुणोदयसमये कार्यः. पदवस्त्राणि प्रेषितानि सन्ति. वैष्णवाः मर्यादायां स्थापनीयाः. देश-कालानुसारेण सावधानतया स्थेयम्. श्रीगोविन्दः कापि चिन्तां मा करोतु. श्रीगोकुलनाथः सर्वं कुशलं करिष्यति. [1]श्रीरंगदासप्रोक्तन्तु

सत्यम् इति ज्ञेयम्. स्वया रीत्या प्रभुः तथा उक्तवान्. पुनः प्रश्ने प्रवाहरीत्या उक्तवान् इति. किमधिकम्?

१.श्रीरंगदास. ?

(११)

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधर-श्रीगोविन्द-बालकृष्ण-श्रीवल्लभ-रघुनाथ-यदुनाथ-घनश्याम-[१]मुरलीधर-[२]कल्याणराय-[३]द्वारकेश-[४]दामोदर-[५]गोकुलोत्सव-[६]श्रीकृष्ण-[७]व्रजनाथेषु आशिषः. शम् इह भावत्कं भद्रम् आशास्महे.

सेवा सम्यक् कार्या. वैशाखवदि ३ प्रयागम् आगत्य चतुर्थ्यां पुरमागताः स्मः. स्वः कडापुरं गमिष्यामः. वैशाखसुदि द्वितीयापर्यन्तं श्रीगोकुलनाथ-श्रीमुखारविन्दं द्रक्ष्ये इति मनोरथं स एव अस्मत्प्रभुः पूरयिष्यति.

अंगीकृतजनजनितापराध-कूटक्षमाविनोदोऽस्य ॥
अंगीकृतिश्च नित्या वदन्तु कोऽन्योऽस्य साम्यम् ईयात् ॥

दुहितृषु तदपत्येषु च आशिषः. [८]विश्वनाथादिषु आशिषः. किम् अधिकम्! [९]गोविन्दभट्ट-[१०]वासुदेवभट्ट-[११]एकनाथभट्टादयः मत्संगएव कुशलिनः समायान्ति [१२]गोविन्द[१३]रामचन्द्रावपि [१४]माधवभट्ट[१५]शिवादयोऽपि.

---

(५)१.मुरलीधर (प्रथमपुत्रश्रीगिरिधरात्मजः,१।१, वि.सं.१६३०) २.कल्याणराय (द्वितीयपुत्रश्रीगोविन्दरायात्मजः, २।१,वि.सं.१६२५) ३.द्वारकेश (तृतीयपुत्रश्रीबालकृष्णात्मजः,३।१,वि.सं.१६३०) ४.दामोदर (प्रथमपुत्रश्रीगिरिधरात्मजः,१।२,वि.सं.-१६३२) ५.गोकुलोत्सव (द्वितीयपुत्रश्रीगोविन्दरायात्मजः,२।२,वि.सं.१६३४) ६.श्रीकृष्ण (द्वितीयपुत्रश्रीगोविन्दरायात्मजः,२।३,वि.सं.१६३७) ७.व्रजनाथ (तृतीयपुत्रश्रीबालकृष्णात्मजः,३।२,वि.सं.१६३२) ८.विश्वनाथ. ? ९.गोविन्दभट्ट (श्रीविश्वनाथ-

त्मजश्रीरुक्मिणीभ्रातः) १०.वासुदेवभट्ट. ? ११.एकनाथभट्ट. ? १२.गोविन्द. ? १३.रामचन्द्र. ? १४.माधवभट्ट. ? १५.शिवादयो. ?

(१२)

॥ श्रीकृष्णाय नमः ॥

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधर-श्रीगोविन्द- बालकृष्णश्रीवल्लभ-रघुनाथ-यदुनाथ-घनश्याम-[१]मुरलीधर-[२]कल्याणराय-[३]गोकुलोत्सव-[४]द्वारकेश्वरादिषु आशिषः. शम् इह, भवदीयं भद्रं सततम् आशास्महे. प्रभुसेवा सम्यक् कर्तव्या. भोगादिविषयको विचारः सावधानतया कर्तव्यः. सेवकाः सर्वे यथा मर्यादां न त्यजन्ति तथा कार्यम्. स्थलविचारं कृत्वा यदुनाथगृहं कारणीयम्. अत्रत्यः समाचारः सर्वः [५]चांपादिमुखात् श्रोतव्यः. तत्रापि [६]वीरवरराजस्य पूर्वापेक्षया भूयसी प्रपत्तिः दृष्टा. [७]रायपुरुषोत्तमस्यापि तथैव प्रपत्तिः दृष्टा वीरवरेण उक्तम् अस्ति. ‘‘मह्यं सदा आज्ञापत्रं गिरिधराः यथा लिखन्ति तथा भवद्भिः लेखनीयम्’’ इति. तेन यदि अत्यावश्यकं कार्यं भवति तदा तथा लेखनीयम्. अपरञ्च [८]गोविन्दभट्टादिभिः मत्संगे समागमनार्थं भूयान् आग्रह कृतम्. उष्णाकाले पाकजः क्लेशो भविष्यतीति तत्र मया बहुधा निषिद्धाः तथापि स्वाग्रहेण [९]वासुदेवः संगे समागच्छति. तत्र वासुदेवमातुः अनुज्ञा न गृहीता अस्तीति मन्मनसि खेदो भवति संकोचः तत्र मम अशक्यतया मया वासुदेवो नीयते. तेन भवद्भिः तन्मातुः समाधानं कार्यम्. भवद्भिः चिन्ता न कार्या. शीघ्रमेव आगमिष्यामः. श्रीगोकुलनाथो अस्माकम् ऐहिकं परलौकिकं च स्वयमेव जातो अस्तीति किम् अस्माकं विचारणीयम् अस्ति? अहोरात्रे सेवकाः अन्तर्बहिश्च सावधानाः स्थापनीयाः. किमधिकम्? फाल्गुन सुदि १. [१०]यमुनादिषु [११]वैकंटादिषु आशिषः. [१२]गोविन्दभट्ट[१३]गणेशभट्टौ [१४]रायपुरुषोत्तमवीरवरराजयोः निकटे सपदि तिष्ठतः.

१.श्रीमुरलीधर (प्रथमपुत्रश्रीगिरिधरात्मजः,१।१, वि.सं.१६३०,) २.श्रीकल्याणराय (द्वितीयपुत्रश्रीगोविन्दरायात्मजः, २।१,वि.सं.१६२५) ३.श्रीगोकुलोत्सव (द्वितीयपुत्रश्रीगोविन्दरायात्मजः,२।२,वि.सं.१६३४) ४.श्रीद्वारकेश (तृतीयपुत्रश्रीबालकृष्णात्मजः,३।१,वि.सं.१६३०) ५.चांपा (वै.वा.२५२।३।२०८) ६.वीरवरराज (राजवीरवरजन्म वि.सं.१५२८) ७.रायपुरुषोत्तम (वै.वा.२५२।१।७५.प्र.१) ८.गोविन्दभट्ट (श्रीविश्वनाथात्मजश्रीरुक्मिणीभ्राताः) ९.वासुदेव १०.यमुना (श्रीप्रभुचरणद्वितीयआत्मजा) ११.वैंकट १२.गोविन्दभट्ट १३.गणेशभट्ट (वादीभपञ्चानना श्रीहरिहरभट्टात्मजः एवं प्रभुचरणात्मजायाः श्रीशोभादेव्याः पतिः) १४.रायपुरुषोत्तम. (आईनि अकबरी. खं.३. २२,पृ.५९८, वै.वा.२५२।१।७९)

(१३)

श्रीगोवर्धनचरणयुगलकमलेषु मदीया नतयो निवेदनीया

किञ्च–

दधौ कम् अपराधं वा हृदये हृदयप्रियः ।।
तद् न जाने यद् निजांगसंगम् अंगीकरोति नः ।।१।।
सखि! वद यादवपुंगवम् अतिचिरविरहाद् अहानि गणयन्ती ।।
प्रणयभुजंगमदष्टा त्वदधरसुधया परं जीवेत् ।।२।।

(१४)

।। श्रीकृष्णाय नमः ।।

भवत्सु सदाशिषः

भवन्तः स्नेहवशतो मच्छरीरव्यवस्थितिम् ।।
जानन्तोऽपि न जानन्ति तत्तूचिततरं हि वः ।।१।।
यथा नर्तयति स्वामी वस्तुतस्त्वपराधीनम् ।।
मां तथाहं तु नृत्यामि भृशं क्लिष्टोऽस्मि तेन हि ।।२।।
त्रपावैराग्यराहित्याद् भवदार्तिजिहीर्षया ।।
पुनस्तत्रागताविच्छां करोमि स्नेहयन्त्रितः ।।३।।
परं तदनुरूपं मच्छरीरं नैव वर्तते ।।
तथापि यदि पञ्चम्यां किञ्चित् स्वास्थ्यं भविष्यति ।।४।।
तदा समागमिष्यामि दुःखं मा कुरुत प्रियाः ।।
सर्वांशे गोकुलाधीशशरणाएव सर्वतः ।।५।।
अतो न चिन्ता कर्तव्या भवद्भिः कृष्णसात्कृतैः ।।

श्रीकृष्णः शरणं नः

(१५)

॥ श्रीगोपीजनवल्लभाय नमः ॥

अधिरजनिविनोदभरोदित-श्रमभरोदित-सकलांगशैथिल्योदित-निद्राभरनिर्भर-निष्पीडन-विस्मृतशीतादेरपि उषसि उन्निद्रतोदितप्रिया-प्रणयभरस्मृत-शीतनिरसनपटुतल्पाद् उत्थानसामायिकं तूलकञ्चुकं शीघ्रं प्रेषणीयम्. विलम्बो न कार्यः. यदा कुलालिकुल-मुखगलद् अमन्दसौन्दर्यमकरन्दपानमदानिर्वचनीयाचित-मधुप-वृतानि वज्ररत्नानि तानि कुसुमानि प्रेषितानि. भवद्भिः सर्वैः ग्राह्याणि. भवत्सु सदाशिषः.

(१६)

॥श्रीकृष्णाय नमः॥

स्वारोहणाक्षमां शाखां किञ्चिद् आस्वाद्य लीलया॥
आरुरोह यथेच्छां ताम् अन्यां स्वारोहणाक्षमाम्॥१॥
कदाचिद् निकटस्थामप्युल्लंघ्य स्वमनोगताम्॥
शाखाम् आरुह्य तत्रत्यं फलं भुंक्ते मनोगतम्॥२॥
कदाचित् सकलाः शाखाः स्पृष्ट्वा स्पृष्ट्वा यथारुचिः॥
गच्छन् शाखाविशेषस्य फलं भोगार्थमेवहि॥३॥
यस्याः जातेः यथाधर्मः तथालीलाकृतिः यतः॥
अतः तज्जातिनामापि प्रभौ सम्यग् विराजते॥४॥
तद्वदत्रापि यज्जातिधर्मसाम्येन वाऽकृतिः॥
तेनास्याअपि तत्साम्यमिति सर्वं सुनिश्चितम्॥५॥

*आन्दोलयति गोविन्दं गोपी तद्गतमानसा॥
शोभां तनोति रुचिरां मानमानापनोदयोः॥१॥
शून्यं ज्ञानेन तूर्णं मां पूर्णज्ञानेन यः स्वयम्॥
कृतवान् कृपया पूर्णं तस्मै पूर्णात्मने नमः॥२॥

---

*द्वौ श्लोकौतु श्रीगिरिधराणाम्

(१७)

॥ श्रीगोपीजनवल्लभाय नमः ॥

(मार्गशिर-वदि १३)

त्वदीयमधुसूक्तिभिर्व्रजजनेशसंगाशया।
मनोजशरपीडिता कथमपि स्थिता मेऽसवः॥
अतःपरम् अये यदि प्रियतमांगसंगो भवेत्।
तदैव मम जीवितं विरहितादशाह्नीकरम्॥१॥

मथुरामल्लानां नतयः

(१८)

श्रीहरिः

|| శ్రీ హరిః || స్వస్తి శ్రీమత్స్వాశీఃపూర్వకస్సందేశః || నా వచ్చుట నిర్ధారం ఎరగపడదు సప్తమి నాడౌనే(నో) || ౮ | ౯ నాడౌనో. అ(*)అక్కూడి (?) బాగా చేశిపోఉనో పోదో దాన్నుండి చేశిపెడితే లెస్స || కులహీలు క్రొత్త కులహీల బట్టలో ఉన్నఇ పచ్చని బట్టలో ధారి (ధరింప) చెయ్యవలె బాగా చెయ్యవలె | చీరలు నాలుగు జోడీలు క్రొత్త గౌరవర్ణపు బట్టలో ఉన్నఇ మనసువచ్చినది పెట్టేది కుసాలు చెయ్యవలె.

|| శ్రీ విఠల దీక్షితానాం పత్రమ్ ||

स्वस्ति श्रीमत्स्वाशी:पूर्वकस्सन्देश:. ना वच्चुट निर्धारं एरगपडदु नाडौने(नु) ८।९ नाडौनो. अ(*)अक्कूडि(?) बागा चेशिपोउनो पोदो दान्नुंडि चेशिपेडिते लेस्स/कुलहीलु क्रोत्त कुलहीलु बट्टलो उन्नइ पच्चनि बट्टलो धारी(धरिंप) चेय्यवले. चीरलु नालुगु जोडीलु क्रोत्र गौरवर्णपु बट्टलो उन्नइ मनसुवच्चिनदि पेट्टेदि. कुसालु चेय्यवले.

स्वस्ति. श्रीमानोंको आशीर्वादके साथ यह सन्देश भेजता हूं. मेरा आना निश्चित नहीं है. सप्तमी अष्टमी या नवमी तक शक्य हो जायेगा. अब तैयारी बराबर हो पायेगी या नहीं (यह) निश्चित नहीं. कुलहीके वस्त्र साथ भेज रहे है नई कुलहके लिये है. इन्हें सुनहरी पीले रंगके वस्त्रोंके साथ धराने है. नई साड़ियोंकी जोड़ीके लिये लाल रंगके वस्त्र है. अथवा यथेच्छ धरा सकते है परन्तु सुंदर लगते होने चाहिये.

sri.Harih. svasti (may all good fortune be bestowed)

Message to sriimaan (the prosperous gentleman) with blessing. My coming (for the occasion) is not known (as of now) confirmedly. Could be on Saptami, Ashtami or, could be on Navami. (****) do not know whether will prepare well and go or not; better if done from thence. Headgears are (placed) in a cloth for new headgears. Should be bedecked with golden yellow attire. Must be done well. Four new pairs of sarees are there in red colour fabric. May be adorned as desired. Must be done admirably.

nirdhAram = confirmedly.

Kulahii = Headger.

**An asterisk mark has been placed where the letter was unclear.

अंग्रेजीमें अनुवाद हैदराबादस्थित प्रो.वेतुरी आनन्दमूर्ति और प्रो.डॉ.एलचुरी मुरलीधरराव जीने किया है.

(१९)

।। श्रीगोपीजनवल्लभाय नमः ।।

किं ब्रवाणि ? सखि प्रेष्ठविरहाऽनलदाहिता ।।
जीवामीत्येदेवालं निरपत्रपतास्पदम् ।।१।।
सख्यैतल्लेखनीयं त्वयातियत्नेन राधिकानाथः ।।
किं कृपयिष्यत्यथवा मनोरथैनैव जन्मनिर्वाहः ।।२।।
गोवर्धननाथचरणकमलयोः नतयो निवेदनीयाः ।।

(२०)

॥ श्रीकृष्णाय नमः ॥

गिरिच्छत्रेण दृक्पातचामरैः स्नेहवारिभिः ॥
केवलं स्वीयताराज्येऽभ्यषिञ्चद् व्रजमीश्वरः ॥१॥
नान्याधीनत्वम् ऐश्वर्याद् दीनताधीनता परम् ॥
तत्रापि त्वत्कृपा हेतुरेवं सर्वं त्वमेव नः ॥२॥
व्रजतरुणीकुचकनकाचलोपमर्दे पुलकितोन्नतता ॥
तनुता तदनुपमर्दे चित्रैषा ते कथा नाथ ॥३॥
उपमा नयने प्राप्तुम् आयान्त्योऽञ्जनपिच्छिलात् ॥
तटात् स्खलन्त्यः श्रीराधे अपतनहासार्णवे कवेः ॥४॥
कलिन्दकन्यकाकूले मूले कनकशाखिनः ॥
अस्ति सर्वेन्द्रियास्वाद्यं ब्रह्मामृतमनावृतम् ॥५॥
प्रायः प्राणैः सहैवायं प्रयास्यति मनोरथः ॥
तेऽत्रपा यदि तत्संगादहमप्यास तादृशः ॥६॥
पशुपराजसुदुर्ललितः सुतो
व्रजवधूजनजीवनमित्यपि ॥
व्रजनिकुञ्जविहारमनाः स्वयम्
प्रसभम् आश्वासनेन हि वञ्चिताः ॥७॥

(२१)

जो कृष्णदास श्रीगोवर्धनमें है सो ये तुमसों कहे, सो करि दीजे. जो हमको बंगाली काढ़ने हैं, और सेवक राखने हैं. और कृष्णदास श्रीगोवर्धनाथजीके अधिकारी हैं, तासों ये करें सो हमको प्रमाण है.

(राजा टोडरमल और राजा बीरबल प्रति पत्र ८४वै.वा.क्र.८४ प्र.२)

(२२)

त्वद्दर्शन विहीनस्य त्वदीयस्य तु जीवितम्।।
व्यर्थमेव यथा नाथ! दुर्भागाया नवं वयः।।
अम्बुदस्य स्वाभावोऽयं समये वारि मुञ्चति।
तथापि चातकः खिन्नो रटत्येव न संशयः।।

(श्रीनाथजी प्रति विज्ञप्ति ८४वै.वा.क्र.८४ प्र.७)

(२३)

भगवत्पदपद्मपरागयुतो नहि युक्ततरं मरणेऽपि तराम्
इतराश्रयणं गजराजगतो नहि रासभमप्युररी कुरुते।।

(गोविंद दूबे प्रति पत्र ८४वै.वा.क्र.३४ प्र.३)

(२४)

सरसि-कुशेशयमप्यास्वादितुमागच्छतोऽलिनो।
यदि कनक-कमलपाने नासीत्तोष: किमन्येन।।

नात्र कुशेशयमानसमर्थयसे यत्प्रियो मधुप:।
तस्मिंस्तुष्टे तोष:दु:स्थे दौ:स्थयं हि निरुपमस्नेहात्।।१।।
यद्यलिरपिनिरुपधिभाव: स्वभावत: समागच्छेत्।
निरवधितोषोऽस्यात्रापि भवेदेवेति किं वाच्यम्।।२।।

(श्रीगुसांईजी प्रति नागजी भट्टको पत्र २५२वै.वा.क्र.१ प्र.४-५)

(२५)

श्रीवल्लभाचार्यमते फलं तत्प्राकट्यमत्राव्यभिचारिहेतुः।।
तत्रोपयुक्ता नवधोक्तभक्तिस्तत्रोपयोगोऽखिलसाधनानाम् ।।१।।
यः कुर्यात्सुन्दराक्षीणां भवने लास्यनर्तने।।
तासां भावनया नित्यं स हि सर्वफलानुभाक् ।।२।।

(नागजी भट्ट प्रति पत्र २५२वै.ना.क्र.१ प्र.५)

(२६)

जो ये छीतस्वामीकों हमने तुम्हारे पास पठाये हैं सो इनकी टहल तुम आछी भांति सों कीजो.
(छीतस्वामीके लाहौर जानेकी मनाई करने पर..)

जो छीतस्वामी तो इहां ते आय सकत नाहीं है, तासों यह ब्राह्मन गरीब है, जो तुमतें याकी टहल बनि आवे तो इहां ही मनुष्यके हाथ हुंडी कराय पठाय दीजो.

(लाहौरके वैष्णव प्रति पत्र २५२वै.वा.क्र.२४४ प्र.३)

।।इति श्रीविट्ठलनाथानां पत्रम्।।

।श्रीहरिः जयति।

।।श्रीरामनवमीनिर्णयः।।

।।श्रीमद्गोस्वामिश्रीविट्ठलेशप्रभुचरणप्रणीतः।।

।। सप्रतानभागः ।।

श्रीमत्प्रभुचरणप्रथमापत्यश्रीशोभादेवीवंशलब्धजन्मना
विद्वन्मौलिमालोपलालितपदनलिनयुगलविश्वविश्रुतयशःप्रशस्ति-
पटहपरिपूरितदिगन्तरमोहमयीस्थबृहन्मन्दिरसिंहा-
सनासीनासीमसद्गुणावलीविभ्राजमान-
गोस्वामिगणाग्रगण्यविद्वद्वर-
श्रीमद्गोस्वामिश्रीगोकुलनाथमहाराजचरण-
करुणातरुणार्णवविहारिणा
कीर्तिवल्ली-
पण्डितभट्टश्रीबलभद्रशर्म-
कवि-काव्यरत्नाकर-कविचूडामणि-शुद्धाद्वैतभूषण-
कविरत्न-महामहोपदेशक-विद्यालंकार-वेदान्तविद्यानिधिना
विनिर्मितयाबालप्रबोधिन्याख्यया व्याख्यया समनुगतः.

मोहमय्यां
निर्णयसागरमुद्रणालये
सम्मुद्य
बृहन्मन्दिरविद्यालयात्
प्रकाशितः
संवत् १९९४
मूल्यं १ रूप्यम्

पुस्तकलब्धिस्थानम्
श्रीबालकृष्ण पुस्तकालय
बड़ामन्दिर, भूलेश्वर,
मुम्बई.

Published by Bhatt Balbhadra Sharma, Bada
Mandir, Bhuleshwar, Bombay 2

Printed by Ramchandra Yesu Shedge,
Nirnaya sagar press
26-28, Kobhat street,
Bombay 2

द्वितीयम्
श्रीमद्वल्लभाधीश विद्यामन्दिर
विश्रामघाट, सतीबुर्ज
मथुरा.

॥ श्रीहरिः जयति ॥

॥ प्रेक्षावदुपच्छन्दनम् ॥

यत्तद्वर्षचतुश्शतादपि परेणाऽनेहसा न स्थितं
व्याख्यानं प्रतिवर्णवर्णितगुणोदारं श्रमोत्सादनम् ॥
यस्याऽभावतएव रामनवमीद्वैविध्यमासीज्जनेत-
च्छ्रीवल्लभनन्दनांघ्रिरजसा सिद्धं समास्वाद्यताम् ॥

॥ अभ्यर्थना ॥

भवतः श्रीमदाचार्या भवदीयोऽहमाश्रये ॥
मदीयोऽयं मदीयोऽयं विचारयत मामिति ॥१॥
अज्ञानं विनिवर्ततां विगलताद् मिथ्याभिमानोदयः
सद्विद्याभ्यसनं जनस्य भवतात् प्रौढं च तेजस्वि च ॥
विद्वेषः प्रविलीयतां सुमधुरा सर्वत्र सञ्जायतां
प्रीतिर्वस्तु च सत्यमेव कुरुतान्नाऽसत्यमन्तःपदम् ॥२॥
श्रीमत्पादसरोजरेणुषु भवत्पुत्रेन्दुपादाब्जयोः
श्रीगोपीजनवल्लभे च विततः सेवानुरागोदयः ॥
अस्माकं वितनोतु चेतसि मुदं कामप्यमन्दां सदा
सिद्धान्ताब्धिसुधा सुधाब्धिमधुरास्वादानुवादा च वः ॥३॥

॥ श्रीहरिः जयति ॥

॥ उपस्थानम् ॥

श्रीमद्वल्लभवंशभूषण बुधालंकार गोब्राह्मण-
प्राणत्राणपरायण प्रतिजनानल्पप्रशंसास्पद ॥
श्रीमद्गोकुलनाथ सज्जनगुरो गोस्वामिचूडामणे
श्रीमान्[1] मोहमयीमुखेन्दुतिलकः किञ्चाऽसि लोकोत्तरः ॥१॥

विद्याभ्यासेऽवसन्ने तमसि विसृमरे व्याप्नुवाने[2] समन्ता-
त्सच्चारित्र्येऽपवृत्ते स्वमतमतिमतां ह्रासएवोपजाते ॥
ग्रन्थानां विप्रलोपे प्रतिदिशमुदिते सम्प्रदायोपहासे
स्तव्यो भव्योदयोऽसौ भुवि भवति भवद्विक्रमात्पुष्टिमार्गः ॥२॥

विद्वज्जनाय विहितः परमादरेण
भूरिव्ययेन च निजस्य करावलम्बः ॥
अध्यापिताश्च पटवो बटवो विधाय
विद्यालयं निजगृहे परिपोषिताश्च॥३॥

विद्यार्थिभिर्बुधगणैश्च विरोचमानाः
नानाजनैश्च परितः परिचर्य्यमाणाः ॥
विद्याविनोदमसकृत्परिशीलयन्तः सन्तः
सतामनुसरन्ति रसं भवन्तः॥४॥

स्नेहार्द्राः स्वजने सदा स्मितसुधाधाराभिषिक्तानना
दीनानामनुकम्पया परमया दुःखद्रुमद्रोहिणः ॥

१.विशेषणम् इदं न विशेष्यम्.

२.चानशि कर्मव्यतिहारे वा सिद्धम्.

स्वे धर्माध्वनि निश्चलस्थितिजुषः संस्थापयन्तः प्रजाः
सिञ्चन्तो धनराशिमर्थिषु सतां सेव्या भवन्तः क्षितौ।।५।।

स्वमार्गीयग्रन्थप्रकटनसमुत्साहरसिकाः
सभासु व्याख्यानामृतरसमुचो दिव्यजलदाः।।
नवीनग्रन्थानां प्रणयनविधौ चापि मुदिताः
कथं तावद्वर्ण्याः प्रमितमतिभिर्वो गुणगणाः।।६।।

कलिकल्मषोपहतये कटिबद्धा
निजधर्मकर्मपरिरक्षणदक्षाः।।
दधतो दयां निजजनेषु विशिष्टां
भुवि भूरि भान्ति विभु गोकुलनाथाः।।७।।

सकलगुणिगणानां को विशेषावलोकी
भवति भुवि भवादृक् कः प्रसन्नश्च तेषु।।
अशनवसनवित्तं कश्च हृष्यन् प्रदत्ते
सततपरिवृतस्तैर्नास्ति धन्यस्त्वदन्यः।।८।।

भूयांसो विबुधाः सभासु शतशः संख्यातिगाः सत्कृताः
श्रीमद्भागवतस्य चापि शतकेष्वष्टोत्तरेष्वर्चिताः।।
त्रातं यच्च वसुव्ययेन बहुशो नश्यत्सहस्रं गवां
तां श्रीगोकुलनाथकीर्तिमतुलां गायन्ति देवांगनाः।।९।।

नेदं नभः क्षितिरियं न च कौमुदीयं
सोऽयं शनैर्दलितमौक्तिकचूर्णयोगः।।
अत्रोन्मिषत्फलदलप्रसवप्रताना
ज्योतिर्गणैरुदयते तव कीर्तिवल्ली।।१०।।

आचान्तेव चिरं चमत्कृतिरियं चन्द्रस्य संचारिणी
गंगातुंगतरंगसंगसुषमासर्वस्वमाश्लेषि च ।।
वीचीवीथिषु विभ्रमैर्विलसितं क्षुब्धस्य दुग्धाम्बुधेः
कीर्तिः सम्प्रति यस्य नन्दनवने सौरभ्यमभ्यस्यति ।।११।।

मया पुरुपरिश्रमात्प्रणिहितेन वै चेतसा
व्यधायि सरलाशयोऽयममलो निबन्धोऽद्भुतः ।।
चिरस्य समपेक्षितः स तव पाणिपद्मद्वये
प्रहृष्य समुपस्थितः प्रियमरालबालायताम् ।।१२।।

॥ श्रीहरिः जयति ॥

॥ प्रस्तावना ॥

श्रीमद्भगवद्वदनवागीशावतार श्रीमद्वल्लभाचार्य श्रीमहाप्रभुचरण प्रवर्तित एवम् उनके पुत्ररत्न भगवदवतार श्रीगोस्वामी श्रीमद्विठ्ठलेश प्रभुचरण प्रचारित सर्वसिद्धान्त-मूर्धाभिषिक्त पुष्टिमार्गसम्प्रदायके मूलग्रन्थ महाप्रौढि-परिष्कृत महागम्भीर अप्रतिम अद्वितीय हैं. केवल प्रभुकृपैकवेद्य हैं, इसमें सन्देह नहीं.

श्रीमद्विठ्ठलेश प्रभुचरणप्रणीत श्रीरामनवमीनिर्णय वैसा ही अद्भुत ग्रन्थ है. अतिसंक्षिप्त होनेपर भी सर्वांगसम्पूर्ण है, महागम्भीर होनेपर भी सुस्पष्ट है. अत्यन्त अपेक्षित उपयुक्त अव्यर्थ प्रयोजनपूर्ण पदपदावलीसे समलंकृत है.

इसकी पदपदावली अनर्घ्य रत्नकी भांति परम प्रकाशशाली, नाना प्रकारके दिव्यभावोंकी विचित्र किरणावलीसे मर्मज्ञ प्रेक्षकको मुग्ध बना देती है, उसके हृदयको हर लेती है, और उसे विस्मयरसके अपार सागरमें हिलोरे लिवा देती है.

इस निणर्यके भावको ले कर गोस्वामी श्रीव्रजरायजीने उत्सव-कल्पलतामें और गोस्वामी श्रीपुरुषोत्तमजीने उत्सवप्रतानमें श्रीरामनवमीका निर्णय लिखा है.

उत्सवप्रतानमें इतनी विशेषता है कि श्रीमत्प्रभुचरणने जिन पूर्वांग-उत्तरांगको मनमें रख कर निर्णय लिखा है, श्रीपुरुषोत्तमजीने उन्हें स्फुट कर दिया है. और पूर्वांग-उत्तरांगके मध्यमें पूर्वपक्ष और खण्डन के अंशको छोड़ कर श्रीमत्प्रभुचरणकृत निर्णयके सिद्धान्तांशकी पंक्तियां भी लिखी हैं.

दोनों ही ग्रन्थ अपने ढंगके निराले और श्रीमत्प्रभुचरणकृत निर्णयके

भावार्थको स्पष्ट-स्फुट लिखनेवाले हैं, किन्तु उनमें अक्षरार्थ नहीं है.

कभी-कभी विद्वान ग्रन्थका भावार्थ तो समझा देते हैं पर अक्षरार्थ नहीं लिखते, कारण: भविष्यमें शिष्य कुशाग्रबुद्धि हों; उहापोहकी शक्ति आवे; ग्रन्थयोजनाकी युक्तिका उदय हो; मतिमें सूक्ष्मता आवे; गूढ़से गूढ़, गहनसे गहन गम्भीर ग्रन्थके तल-स्पर्शकी योग्यता आवे. यदि पूर्वाचार्योंके सभी ग्रन्थ अति सरल रीतिसे उन्हें सुव्याख्यात मिल जायें तो उनकी मति अलस हो जाय और उक्त अपेक्षित गुणोंका सम्पादन न हो.

आज भी प्राचीन परिपाटीके प्रौढ पण्डितोंकी अध्यापन शैली वैसी ही है. वे शिष्यके लिये भावार्थका निरूपण कर देते हैं. तदनुसार शिष्य स्वयं ही फक्किका लगा लिया करते हैं. यदि शिष्यमें वैसी पटुता न हुई तो कृपया फिर अक्षरार्थ भी बता देते हैं.

यही कारण है कि उत्सवकल्पलता और उत्सवप्रतान में श्रीमत्प्रभुचरणकृत श्रीरामनवमीनिर्णयका पूर्ण भावार्थ तो खोल दिया है पर तदनुसार ग्रन्थ लापनका कार्य भावी विद्वानोंके लिये छोड़ दिया है.

खेद है कि सम्प्रदायमें अध्ययन-अध्यापनकी असह्य न्यूनता हो गई. पूर्वग्रन्थ-प्रदर्शित भावको हृदयारूढ़ कर मूल ग्रन्थ लगानेकी शक्ति बहुत कम लोगोंमें रह गई.

आखिर सम्प्रदायमें वाद-विवाद तनातनी पक्षपात दलबन्दी हो गई, कलह जग गया. जुदी-जुदी गद्दीयोंमें जुदी-जुदी श्रीरामनवमी मानी जाने लगी. सच्चे ग्रन्थज्ञ विद्वान मूर्ख साबित किये जाने लगे और मूर्खमण्डली पण्डित बन बैठनेकी चेष्टा करने लगी.

भारतमार्तण्ड पण्डित श्रीगट्टूलालजी महोदय पुष्टि-सम्प्रदायके और समस्त विश्वके माने हुए अद्वितीय अद्भुत विद्वान थे. उननें सम्प्रदायकी

बड़ी उत्तमोत्तम सेवायें की. वार्षिक व्रतोत्सवोंकी टिप्पणी प्रकट कर भगवत्सेवांग व्रतोत्सव यथा समय होनेकी व्यवस्था की. आवश्यक और प्रौढ ग्रन्थोंका निर्माण किया. विविध वाद-विवादोंमें शास्त्रार्थ कर वादिवदन विध्वंसन किया. उपदेश और पर्यटन से सम्प्रदायका प्रचार किया.

विद्वानके परिश्रम और वैदुष्य को विद्वान ही जानते हैं, अन्य नहीं. उनको ग्रन्थ लगा नहीं, पण्डितजीके बताये हुए व्रतोत्सवोंमें अडंगा लगा दिया. पण्डितजीके कथनको गलत कह कर मूर्ख जनतामें कोलाहल मचाया, ठठ्ठा उड़ाया.

पण्डितजीने अपने कथनकी यथार्थताके लिये व्याख्यान दिये, ग्रन्थोंका उत्पादन किया. हिन्दी-गुजरातीमें ग्रन्थके भाव-तात्पर्यका अनुवाद प्रकाशित किया.

विरोधीपक्षने भी अपने पक्षकी रक्षाके लिये यथाशक्ति ये सभी कार्य किये.

पण्डितजीके प्रौढ और सत्य पक्ष को लोग निर्बल तो नहीं पना सके, पण्डितजीका ही कथन प्रबल रहा. श्रीनाथद्वार आदि-आदि प्रधान-प्रधान स्थानोंमें अद्यापि वही कथन सम्मान्य है. तथापि सत्य पक्षके मुकाबले एक दूसरा असत्य पक्ष ठड़ा हो गया. समय-समयपर वाद-विवाद झगड़ा होता रहा. सामान्य जनता भ्रममें पड़ गई कि कौनका कथन सत्य है, किसका कहना मानें!

यद्यपि उभय पक्षने अपने-अपने पक्षकी यथार्थता बतानेके लिये हिन्दी-गुजराती अनुवाद किया, छपाया, पर उसका फल कुछ भी नहीं हुआ. भ्रम ही फैलता रहा, सत्य समझमें नहीं आया, वाद-विवादकी इतिश्री नहीं हुई.

सामान्य जनताके लिये हिन्दी-गुजरातीमें अनुवाद हुआ. उसे विषय

समझनेकी अनुवाद मूल अक्षरोंसे मिलता-जुलता है या नहीं इस तुलना करनेकी अनुवाद सिर्फ विभक्तियोंका ही है या उसमें कुछ ग्रन्थके भावका भी आभास है, कुछ तत्त्व है. इस तथ्यके परिचयकी कोई भी योग्यता नहीं, अधिकार नहीं.

जिन्हें विषय समझनेकी योग्यता है-समझानेसे विषय समझ सकते हैं-ग्रन्थके अक्षर इसी अर्थके अनुकूल हैं, दूसरा अर्थ उनका नहीं होता इस बातका पता है-उनका गाड़ा हिन्दी-गुजरातीसे नहीं चलता. हिन्दी-गुजराती-संस्कृतके गम्भीर और गहन विषयोंको सरल रीतिसे नहीं समझ सकती, उनके परितोषके लिये ग्रन्थकी प्रत्यक्षर योजना आवश्यक है. अति सरल अतिविशद अतिस्वच्छ अतिस्पष्ट अतिपरिस्फुट सुसम्बद्ध सुसंगत बालप्रबोधिनी संस्कृत टीकाकी अपेक्षा है.

यदि भारतमार्तण्ड पण्डित श्रीगट्टुलालाजी महोदय या उनके पट्टशिष्य और मैरे अन्यतम गुरु पण्डितवर्य श्रीनन्दकिशोरजी शास्त्रीजी श्रीमत्प्रभुचरणकृत श्रारामनवमीनिर्णय तथा श्रीपुरुषोत्तमजीकृत श्रीरामनवमीप्रतान आदि विवादास्पद ग्रन्थोंकी वैसी संस्कृत व्याख्या लिख जाते तो अवश्य ही भविष्यके लिये विवाद निवृत्त हो जाता.

क्योंकि उक्त ग्रन्थ अपनी प्रौढिके कारण सुकुमार बुद्धिके बाल-विद्वानोंको स्वयं समझमें नहीं आते. और उनके बुद्धिदोषसे ही उन्हें अर्थान्तरका भ्रम कर देते हैं. वास्तवमें उनमें अर्थान्तरकी भ्रान्ति करनेवाली कोई भी बात नहीं. वैसी व्याख्या मिल जानेपर भ्रम उत्पन्न नहीं होता, सब सत्यार्थ समझ जाते, विवाद निवृत्त हो जाता.

मुझे प्रभुप्रेरणा हुई कि श्रीरामनवमीनिर्णय और श्रीरामनवमीप्रतान की ऐसी टीका लिखू जिसमें प्रत्येक पदका भावार्थ परिस्फुटरीतिसे वर्णित हो, प्रत्येक पदका पदकृत्य लिखा हो संगति और सम्बन्ध बताया हो, सरलता हो, उपपादनकी विमलता और विपुलता हो, विशदता हो. जिससे आगेके लिये मतभेद वाद-विवाद शान्त हो जाए,

सन्देह निवृत्त हो जाए, भ्रम पैदा होनेकी बात न रहे.

श्रीमदाचार्यचरण श्रीमहाप्रभुजीकी कृपासे और श्रीमत्प्रभुचरणकी दयालुतासे उन दोनों ग्रन्थोंकी वैसी टीका अब बन गई है. और निर्मत्सर सज्जन विद्वज्जनोंकी सेवामें प्रस्तुत है.

मुझ अबोध बालकपर अपना सम्बन्धी बालक जान कर श्रीमदाचार्यचरण श्रीमहाप्रभुजीकी और श्रीमत्प्रभुचरण श्रीगुसांईजीकी ममत्व पूर्ण कृपा हुई और मुझे श्रीमत्प्रभुचरणकी वाणीके भावार्थसहित साक्षात्कारयुक्त दर्शन हुए इस अद्भुत आनन्द और सौभाग्य से मैं कृतकृत्य हुआ हूं - धन्यातिधन्य हूं, और आश्चर्यरससे छक गया हूं.

श्रीमदाचार्यचरण श्रीमहाप्रभुजीकी तथा परमदयालु श्रीगुसांईजी श्रीमत्प्रभुचरणकी कृपासे ही यह महाप्रसाद मिला है. निश्चय है इससे सबके चित्त शुद्ध होंगे, कलह निवृत्त होगा, और सर्वत्र भगवदानन्दका प्रादुर्भाव होगा. तथास्तु. तथास्तु.

श्रीमदाचार्यचरण श्रीमहाप्रभुजीकी तथा परमदयालु श्रीगुसांईजी श्रीमत्प्रभुचरणकी पुनः कृपा होनेपर दोलोत्सवप्रतान आदि विवादास्पद स्थलोंकी सुबोध सरल व्याख्या ले कर सम्प्रदायकी सेवामें उपस्थित होनेकी शुभाशा है. तथास्तु. तथास्तु.

निवासस्थान:
श्रीमद्वल्लभाधीशविद्यामन्दिर,
दासानुदास,
श्रीनाथजीका मन्दिर,
विश्रान्तघाट, सतीबुर्ज,
मथुरा.

श्रीमत्प्रभुचरणकी
दौहित्र-सन्तान

भट्टश्रीबलभद्रशर्मा

॥ निर्णय-सारांश ॥

चैत्रसुदी नवमी श्रीरामनवमी कहाती है. उस दिन व्रतपूर्वक श्रीराम-जन्मोत्सव मनाना चाहिये. यदि अष्टमीके उपरान्त मध्यान्हमें नवमी हो तो उस दिन वैष्णवोंको व्रत उत्सव कुछ भी नहीं करना चहिये. दूसरे दिन शुद्ध नवमीमें व्रत उत्सव मनाना चाहिये.

किन्तु यदि अष्टमीके दिन नवमीका क्षय हो गया हो-दूसरे दिन शुद्ध नवमीका अभाव हो-दशमी ही हो-तब तो पहले दिन ही-अष्टमी उपरांत नवमीमें ही-अष्टमी विद्धा नवमीमें ही व्रत और उत्सव वैष्णव भी करें.

दशमीका क्षय होगा तब अष्टमीके दिन मध्यान्हमें और नवमीके दिन सूर्योदयके समय दोनों दिन नवमी मिलेगी उस समय अष्टमीके दिनकी नवमीमें ही व्रत और उत्सव मनाने चाहियें. नवमीके दिनकी नवमीमें नहीं.

यदि नवमीका क्षय हो कर दशमी दो हों तो पहली दशमीमें व्रत उत्सव कभी न करने चाहियें. किन्तु अष्टमीके दिनकी नवमीमें ही-विद्धा नवमीमें ही व्रत और उत्सव मनाने चाहियें.

यदि नवमी दो हों तो पहली नवमीमें व्रत उत्सव होंगे, दूसरीमें नहीं.

॥ मतभेद ॥

मतभेद केवल इतनी बातपर है कि दशमीके क्षय-समयमें विद्धा और शुद्धा दोनों नवमी मिलती हैं. एक पक्ष कहता है कि श्रीमत्प्रभुचरणकृत निर्णय और प्रतान के अनुसार विद्धामें व्रतोत्सव होने चाहियें. एक पक्ष कहता है कि श्रीमत्प्रभुचरणकृत निर्णयका और प्रतानका आशय, शुद्धा नवमीमें व्रतोत्सव करनेके विषयमें है. विद्धा नवमीके दिन व्रतोत्सव करनेके विषयमें नहीं है.

।।विवादकी जड़।।

विवादका मूल कारण अज्ञान ही है. अज्ञान बिना विवाद नहीं होता. श्रीमत्प्रभुचरणकृत निर्णय और प्रतान एक पक्षको लगा नहीं, औंधा समझमें आया. उसने विवाद खड़ा कर दिया.

भारतमार्तण्ड पण्डित श्रीगट्टूलालाजी महोदयने १९५१-५२ संवत्में एक उत्तम मार्मिक भाषा लेख लिख कर समझाया कि दशमी क्षयमें श्रीरामनवमीव्रत विद्धा नवमीमें ही होना शास्त्रसम्मत और श्रीमत्प्रभुचरणकृत निर्णयानुकूल है. उक्त कथनकी परिपुष्टिके लिये आपने उत्सवकल्पलता उत्सवप्रतान निर्भयरामजीकृत उत्सवनिर्णय श्रीजीवनजीमहाराजकृत व्रजभाषामय उत्सवनिर्णय आदिके प्रमाण उपस्थित किये. उपसंहारमें यह भी लिखा कि ''अभी तो इतने लेखसूं ही सर्व सिद्ध होय है. विशेष शास्त्रार्थको काम पड़ेगो तो रामार्चनचन्द्रिका आदि अनेक ग्रन्थनुके उपन्यासपूर्वक सम्पूर्ण प्रतानभागको व्याख्यान लिखौ जायगो''.

भारतमार्तण्डके सन्मुख विशेष शास्त्रार्थका अवसर उपस्थित करनेकी किसीकी ताव नहीं पड़ी. इसलिए प्रतानभागकी व्याख्या नहीं बनी. और अतएव श्रीमत्प्रभुचरणकृत श्रीरामनवमीनिर्णय भी अव्याख्यात रह गया. क्योंकि प्रतानभागकी व्याख्याके अवसरमें उपजीव्य निर्णयकी व्याख्या हो जाना स्वतः सिद्ध ही था, आवश्यक ही था.

उत्सवकल्पलता आदिकी सहायतासे मूलनिर्णयके तात्पर्यका अवधारण सुलभ था और अक्षरार्थ भी तदनुसार समझ लेना सर्वथा अशक्य नहीं था. किन्तु दुराग्रहवश तथा उपयुक्त वैदुष्यके अभावसे यह कुछ भी नहीं हुआ. और भारतमार्तण्डके परलोक सिधारनेपर दुराग्रही लोग उलटे इस बातपर डट कर विवादको बढ़ाने लगे कि उत्सवकल्पलता आदिकी दुहाईसे हम श्रीमत्प्रभुचरणकृत श्रीरामनवमीके निर्णयका उक्त अभिप्राय माननेको तैयार नहीं है. या तो मूल निर्णयके विरोधमें उत्सव कल्पलता आदिकी प्रामाणिकता ही नहीं रहती. किंवा उनकी

योजना मूल निर्णयके अनुसार करनी होगी. यह बात नहीं होनेकी कि उत्सवकल्पलता आदिके अनुसार मूल निर्णयका अर्थ गुम-सुम मान लिया जाय.

मूल निर्णयमें ऐसी कौनसी बात है जिससे इस दुराग्रहकी उपस्थिति हुई? वह बात यह कि मूल निर्णयके पूर्वपक्ष ग्रन्थमें यह कहा गया है कि ''विद्धा नवमीमें व्रत करनेका निषेध, जब दशमी वृद्धि हुई हो, यानि दो दशमी हुई हों, तब माननेके लिये है. न कि दशमीके क्षयमें. दशमी क्षयमें तो विद्धा ही में व्रत करना चाहिये.

इसपर यह भ्रम हुआ कि जब दो दिन सूर्योदयमें दशमी होगी तब नवमी, नवमीके दिन, सूर्योदयमें ही बैठेगी. अष्टमीके दिन नवमी आयेगी ही नहीं. तब विद्धा निषेद्ध कैसा? विद्धा हो तो विद्धा निषेद्ध. दो दिन दशमी होनेके अवसरपर विद्धा नवमी होगी ही नहीं. इसलिये विद्धा निषेद्धकी बात असम्भव है. तब 'दशमीवृद्धि' शब्दका अर्थ दो दशमी नहीं किन्तु वृद्धिगामिनी. अर्थात् द्वादशी त्रयोदशी आदि कोई तिथि दो होनेवाली हो तब पूर्वकी नवमी दशमी आदि तिथियां पूर्व तिथियोंकी अपेक्षा वृद्धि पाती हैं. अतः नवमीके दिन नवमी उपरान्त दशमी और दशमीके दिनकी दशमी, दशमी वृद्धि होगी. इस स्थितिमें अष्टमीके उपरान्त नवमी आ जानेसे विद्धा नवमी होगी. इस विद्धाका व्रतमें निषेद्ध है. न कि दशमीक्षयमें विद्धा नवमीका निषेद्ध है. यह पूर्वपक्ष ग्रन्थका आशय है.

वास्तवमें यह बात नहीं है. दो दशमी हों तब विद्धामें व्रत नहीं करना चाहिये. विद्धाको छोड़ कर पहली दशमीमें व्रत करना चाहिये. इस पूर्वपक्षके कथनका यह अभिप्राय है कि नवमीका क्षय हो और दशमी दो हों तब नवमी विद्धा होगी. उसका त्याग कर प्रथम दशमीमें व्रत करना चाहिये.

इस बातको भ्रांत लोग यों कह कर टाल देते हैं कि दो-चार

दिनके अन्तरसे वृद्धि-क्षय देखे गये हैं. साथ ही साथ तिथिके वृद्धि-क्षय नहीं होते.

इसीप्रकार मूल निर्णयके उत्तरपक्षमें भी साथ ही साथ तिथिके वृद्धि-क्षयका प्रसंग आया है. वहां लिखा है कि दशमीका क्षय हो और नवमी दो हों तब पहली नवमीमें व्रत करना चाहिये इत्यादि.

वहां भी यही तकरार है कि तिथिके वृद्धि-क्षय दो-चार दिनके अन्तरसे होते हैं, साथ ही साथ नहीं. इसलिये नवमी वृद्धिका अर्थ पूर्ववत् वृद्धिगामिनी नवमी यानि अष्टमी उपरान्त नवमी और औदयिक नवमी यही होगा तब विद्धाका त्याग कर औदयिक शुद्ध नवमीमें जिसमें दशमीका क्षय हो रहा है उस नवमीमें व्रत करना चाहिये, यह सिद्ध होता है. उत्सव प्रतानमें भी यही भ्रम हुआ है.

ये सब बातें महाभ्रमपूर्ण हैं. वृद्धिगामिनी तिथियोंका प्रवेश रात्रिमें होता है, मध्यान्हमें या इससे पूर्वमें नहीं, देख लीजिये पञ्चांगोंमें. मध्यान्हमें या उसके पूर्व तो तिथिप्रवेश तब होगा जब दो-चार दिनमें किसी तिथिका क्षय होनेवाला होगा.

दुराग्रही मध्यान्हमें-कर्मकालमें तिथिप्रवेश भी मानते जाते हैं, और उसे वृद्धिगामिनी भी बताते हैं. ये तो क्षयगामिनीको वृद्धिगामिनी बताना हुआ. कहिये कितनी भारी भूल है!

तिथिके वृद्धि-क्षय दो-चार दिनके अन्तरसे या इससे भी अधिक दिनोंके अन्तरसे प्रायः होते हैं. यह ठीक है, किन्तु कभी-कभी साथ-साथ भी होते देखे गये हैं. देखिये अभी हाल ही में शालिवाहन शक १८५३ तदनुसार विक्रम संवत् १९८७-१९८८के व्रज ज्येष्ठ कृष्ण-गुजराती वैशाख कृष्णमें चतुर्थीका क्षय हुआ है और पंचमी दो हुई हैं. मंगलवार तृतीया १घटी ३पल थी. उपरान्त ५८घटी २५पल चतुर्थी वर्ती आर उसका क्षय हुआ. फिर पंचमीको प्रवेश हो कर पंचमीके

दिन पंचमी ६०घड़ी रही और दूसरे दिन सूर्योदयमें १४पल पंचमी रही. देखिये नारायण चिन्तामणी शास्त्री पुरंदरे वसईकरके बनाये हुये निर्णयसागरी पंचांगको, सब भ्रम दूर हो जायेंगे.

तिथिके वृद्धि-क्षय सूर्य-चन्द्रके गत्यन्तरसे खास सम्बन्ध रखते हैं. न कि पूर्व तिथियोंके वृद्धि-ह्रास गामित्वसे.

इस विषयकी विशेष जिज्ञासाके लिये हमारी रचित बालप्रबोधिनी टीका देखनी चाहिये. प्रबोधिनी निर्णयका प्रतान और सूर्यसिद्धान्त आदि ज्योतिष शास्त्रके सिद्धान्त ग्रंथ देखने चहियें.

यह टीका पक्षपातरहित है. केवल मूल ग्रंथके अन्तस्थल-निहित भावको ही प्रकट करना इसका ध्येय है. राग-द्वेषरहित है. किन्तु तथ्यार्थ सबकी समझमें आ जाय, भ्रम निवृत्त हो जाये यही इसका अभीष्ट है. औ यही इसकी चेष्टा है.

हाथ कंगनको आरसी क्या? टीकाके यथार्थ अवलोकनसे पक्षपात या निष्पक्षपात की बात स्वयं ही समझमें आ जायेगी. हम तो सत्यके पक्षपाती और अनुरागी हैं. हमें झगड़ोंसे कोई मतलब नहीं. शुभम्.

विनीत
टीकाकार

॥श्रीहरिः जयति॥

॥ श्रीमद्गोस्वामिश्रीविट्ठलेश्वरप्रभुचरणैः प्रणीतः ॥

॥ श्रीरामनवमीनिर्णयः ॥

श्रीकृष्णाय नमः. अगस्त्यसंहितायां "चैत्रशुद्धातु नवमी पुनर्वसुयुता यदि सैव मध्याह्नयोगेन महापुण्यतमा भवेत्" (अग.सं.२८।२).

रामार्चनचन्द्रिकायां "विद्धा चेद् ऋक्षसंयुक्ता व्रतं तत्र कथं भवेद् विद्धानिषेधश्रवणाद् नवमी च इति वाक्यतः" (रामार्चनचन्द्रिकापटल५).

अत्र निर्णयम् आह :

नवमी च अष्टमी विद्धा त्याज्या विष्णुपरायणैः॥
उपोषणं नवम्यां वै दशम्यामेव पारणम्॥
(अग.सं.२८।१३)

ननु व्रतस्य पारणान्तत्वबोधकप्रमाणेनैव व्रतविधिरन्यथानुपपत्त्या च एकादशीपूर्वदिनप्राप्तेः "दशम्यामेव" इतिवचनवैयर्थ्यं स्याद् अतः नियमविधिः अयम्. तेन नवमी सत्त्वेऽपि दशमीक्षये विद्धैव कार्या इति सिद्धम्. नच निषेधवागनुरोधेन नैवं वाच्यम् इति वाच्यम्, दशमीवृद्धिविषयत्वात् तस्याः इति चेद् मैवम्; निषेधनियमवद् उक्तनियमविधिरपि वैष्णवमात्रविषयको अथवा साधारणजनविषयकः. उपक्रमानुरोधाद् आद्यएव अभिमतः चेत् तदा "उपोषणं नवम्याम्" इति व्यर्थम् उत्पत्तिवाक्यत्वाभावाद्, विद्धानिषेधविधिम् आरभ्य अधीतत्वात्, सामान्यप्राप्तावेवएव विशेषविधिनिषेधयोः सम्भवात्. तथाच, विद्धानिषेधे सति उत्तरदिनकर्तव्यत्वे प्राप्ते सति यत्पुनः नवम्युपोषणविधानं तत्रापि निश्चयवाचकाव्ययकथनेन नियमकथनपूर्वकं

तेन दशम्यवृद्धौअपि नवमीवृद्धौ तस्यामेव उपोषणं कार्यं नवम्यवृद्धौतु विद्धैव उपपोष्या इति अवसीयते. अन्यथा दशमीपारणनियमविधिनैव नवम्युपोषणस्यापि प्राप्तेः पुनः तदुक्तिः व्यर्था स्यात्. यद्यपि एवं पारणविधेः वैयर्थ्यम् आयाति तथापि उपोषणविधेः मुख्यत्वात् पारणविधिवाक्यस्य अमुख्यत्वेन एकादशीपूर्वदिनपरत्वं कल्प्यते.

इति श्रीविट्ठलदीक्षितविरचितः
श्रीरामनवमीनिर्णयः
सम्पूर्णः

।। श्रीहरिः जयति ।।

।। दशदिगन्तविजयिगोस्वामिश्रीपुरुषोत्तमविरचितः ।।

।। श्रीरामनवमीप्रतानः ।।

चैत्रशुद्धनवम्यां श्रीरामोत्सवः. तदुक्तं हेमाद्रौ अगस्त्यसंहितायां

> ''चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ
> उदये गुरुगौरांश्वोः स्वोचस्थे ग्रहपञ्चके।।
> मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये,
> आविरासीत् स्वकलया कौशल्यायां परः पुमान्।।
> तस्मिन् दिने तु कर्तव्यम् उपवासव्रतं सदा,
> केवलापि सदोपोष्या नवमीशब्दसंग्रहात्।।''

इति. अन्यच्च तत्रैव

> ''चैत्रशुक्लातु नवमी पुनर्वसुयुता यदि।।
> सैव मध्याह्नयोगेन महापुण्यतमा भवेद् इति.

अत्र 'सैव'इति विशिष्टपरामर्शाद् मध्याह्ने पुनर्वसुयोगे महापुण्यतमत्वम्. मध्याह्नाद् अन्यत्र योगे पुण्यतमत्वम्. अयोगे(तु) पुण्यत्वमात्रम्

इति दिनकरोद्द्योतः. अत्र "**अह्नो मध्ये वामनो रामरामौ**" ( ) इति पुराणसमुच्चयात् कर्कलग्नोक्तेश्च मध्याह्नः प्रादुर्भावकालः इति सैव च पूजाकालः इति तद्व्यापिनी तिथिः सर्वैः कार्या इति बहवः. तत्त्वन्तु वैष्णवभिन्नैरेव एवं कार्या. वैष्णवैस्तु पारणदिवसे दशमीलाभे विद्धा त्याज्यैव इति.

"नवमी च अष्टमीविद्धा त्याज्या विष्णुपरायणैः॥
उपोषणं नवम्यां वै दशम्यामेव पारणम्॥"

(अग.संहि.२८।१३)

इति माधवधृतवचनात्. क्वचित्तु "**दशम्यां पारणं भवेद्**" इति पाठः. नच इदं दिनद्वये मध्याह्नव्याप्त्यव्याप्तिसमैकदेशव्याप्तिविषयम् इति वाच्यम्, तादृशस्थले द्वितीयदिने दशम्याः अनुक्तसिद्धत्वेन पारणविधिवैयर्थ्यापातात्. एतेनैव च दिनद्वये मध्याह्ने पुनर्वसुयोगायोगपरत्वं वदन् प्रतापमार्तण्डोऽपि प्रत्युक्तो ज्ञेयः. एकादश्यां जलेन पारणमपि एतेनैव दत्तोत्तरं ज्ञेयम्. यत्तु "**दशम्यादिषु वृद्धिः चेद् विद्धा त्याज्यैव वैष्णवैः तद् अन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम्**" ( ) इति रामार्चनचन्द्रिकायाम् अगस्त्यसंहितावचनम् उक्तम्. हेमाद्रिमाधवाभ्याम् अलिखनात् तद् निर्मूलम् इति दिनकरोद्द्योतः. तत्त्वन्तु "**नवमी च अष्टमीविद्धा**" इति वाकये निषेधविधिवद् नवम्युपोषणविधिरपि उपक्रमानुरोधाद् वैष्णवमात्रविषयकः इति दशमीसाम्येऽपि नवमीवृद्धौ दशमीक्षयेऽपि नवमीवृद्धौ नवम्याम् उपोषणप्राप्त्या विद्धात्यागएव आशयगोचरः इति वचनञ्च सर्वसम्मतमिति तेन चारितार्थ्यादिव दशमीवृद्धिवचनम् अनुवादकम् इति.

तदेतत् सर्वं हृदिकृत्य श्रीमत्प्रभुचरणैः उक्तं "**तथाच विद्धानिषेधे सति उत्तरदिनकर्तव्यत्वे प्राप्ते सति यत्पुनः नवम्युपोषणविधानं तत्रापि निश्चय-वाचकाव्ययकथनेन नियमकथनपूर्वकं तेन दशम्यवृद्धावपि नवमीवृद्धौ तस्यामेव उपोषणं कार्यम्. नवम्यवृद्धौतु विद्धैव उपोष्या इति अवसीयते.**

अन्यथा दशमीपारणनियमविधिनैव नवम्युपोषणस्यापि प्राप्तेः पुनः तदुक्तिः व्यर्था स्यात्. यद्यपि एवं पारणविधेः वैयर्थ्यम् आयाति. तथापि उपोषणविधेः मुख्यत्वात् पारणविधिवाक्यस्य अमुख्यत्वेन एकादशीपूर्वदिनपरत्वं कल्पयते'' इति.

अत्र **'एकादशी'**पदं तिथिपरं नतु व्रतपरम्. व्याख्येयवाक्ये दशम्यां पारणविधानात्.

अत्र यद्यपि **''नवमी च अष्टमीविद्धा''** इति वाक्ये भगवद्भक्तानां विद्धात्यागम् आदायैव सर्वैः निर्णयः क्रियते. वेधस्वरूपन्तु न पृथक् विचार्यते. तथा सति **''त्रिभिः मुहूर्तैः विध्यन्ति''** (   ) इति सामान्यवाक्यात् त्रिमुहूर्तवेधैव आयाति कथञ्चित् तदनुकल्पो द्विमुहूर्तवेधो वा. तेन अष्टम्याः त्रिमुहूर्तत्वस्य द्विमुहूर्तत्त्वस्य वा अभावे नवम्याः विद्धात्वं न भवतीति तादृशस्थले पूर्वैव उपोष्या इति आयाति. तथापि साम्प्रदायिकाः एतादृशस्थले द्वितीयामेव आद्रियन्ते. तत्र तेषाम् अयम् आशयः : विद्धात्यागे बीजं तावद् भगवत्प्रादुर्भावदिने अष्टम्यभावएव. अन्यथा वामनद्वादश्याम् एकादशीवेधस्येव अत्र अष्टमीवेधस्यापि दूषकता न स्यात्. तथा सति स्वल्पस्यापि संसर्गस्य दूषकत्वं निर्बाधम्. अतो जन्माष्टम्यामिव अत्र कलाकाष्ठादिवेधत्यागवचनाभावेऽपि संसर्गमात्रात् त्यागो युज्यते न्यायसाम्यात्.

''युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया रवेः उदयम् ईक्षन्ते न तत्र तिथियुग्मता'' (   ) इत्यनेन विशेषवाक्येन वर्षवृद्धौ सूर्योदयव्याप्तेरेव उक्ततया अवतारसामयिकव्यवहारस्य तदैव प्राप्तेः तन्न्यायेनापि उदयव्यापिन्याएव ग्राह्यत्वस्य युक्तत्वाच्च. एतेनैव **''वसुरन्ध्रयोः''** (   ) इति युग्मवाक्यमपि दत्तोत्तरम् विद्धानिषेधस्य प्रातिस्विकत्वाच्च.

नच जन्मसमये तिथ्यभावे पूजाकालाव्याप्त्या द्वितीयग्रहणस्य दुष्टत्वं शंक्यम्. विद्धात्यागेनैव तस्य निरासात्. एवञ्च **औदयिकग्रहणबोध-**

कानां सर्वेषां सामान्यवाक्यानामपि आनुगुण्याच्च इति. नच एवं न्यायप्राप्तग्रहणे सति जन्माष्टम्यामपि विद्धाक्षये विद्धाकरणस्य प्राप्तेः तदनुकल्पत्वेन शुद्धनवमीग्रहणम् अयुक्तं स्याद् इति वाच्यं, कल्पनीयन्यायापेक्षया एकादश्यतिदेशवाक्यस्य बलिष्ठत्वात्. एवम् अत्रापि दशमीपारणवाक्यस्य बलिष्ठत्वात् यादृशविद्धाधिकास्थले अग्रे पारणदिनं न लभ्यते तादृशविद्धाधिकास्थलेएव वर्षवृद्धिन्यायबाधो न अन्यत्र इति एतादृशस्थले द्वितीयदिनस्य न्यायप्राप्तत्वात् पूर्वदिने नवम्या विद्धात्वाभावेऽपि विद्धात्यागबीजविचारेण पूर्वां विहाय द्वितीयदिने व्रतकरणम् उपपन्नम्. माधवेन एतादृशस्थले गौरीतृतीयायां द्वितीयप्रापकाभावेऽपि केवलशिष्टाचारस्यैव शरणीकरणाच्च. एतावान् परं विशेषो गौरीतृतीयायाः पूर्वविद्धात्वे द्वितीयदिने कर्मकालरहितायाः ग्रहणम्. अत्रतु पूर्वविद्धात्वाभावेऽपि विद्धात्याबीजविचाराद् वर्षवृद्धिन्यायात् च इति.

तेन अयं निष्कर्षः : विद्धाक्षये विद्धा गत्यन्तराभावात्. पारणार्थं दशम्यलाभेऽपि विद्धादशम्यां पारणविधानबलात्. अन्यथा एकादश्याम् अद्भिः पारणेनापि व्रतसमाप्तिसम्भवे पारणविधानवैयर्थ्यस्य अपरिहार्यत्वात्. अन्यदा तु परैव इति दिक्. अयमेव न्यायो नृसिंहचतुर्दशीस्थले द्रष्टव्यः. माध्वास्तु “**सर्वासान्तु जयन्तीनां श्रेष्ठा कृष्णाष्टमी मता, यस्मात् सन्निहिता अत्यन्तं तत्रैव उपवसेद् नरः. सर्वास्वपि जयन्तीषु पूजा कार्या विशेषतः, सान्निध्यएव कर्तव्यः उपवासः न दूरगः**” (   ) इति स्मृत्यर्थसागराख्ये स्वनिबन्धे भरद्वाजसंहितावचनात्. “**चैत्रे मासि नवम्यान्तु प्रादुर्भावो हरेः यदा, रामपूजां नरः कुर्याद् ब्राह्मणैः सह भोजनं, तथैव नारसिंहस्य मत्स्यकूर्मादिकस्य च. अवतारदिने सम्यक् ब्राह्मणैः सह भोजनम्. कृतेतु नारसिंहन्तु त्रेतायां राममेव च. द्वापरे वामनं प्रोक्तं कलौ कृष्णाष्टमी स्मृताः**” (   ) इति गारुडात्. “**कृष्णजन्माष्टमीं त्यक्त्वा ये अन्यं व्रतम् उपासते. न आप्नुवन्ति फलं किञ्चिद् इष्टापूर्तम् अथापि वा, कृष्णाष्टमीं विना नैव जयन्ती क्वापि वैष्णवैः कर्तव्या यदि कुर्वीत तामसं तदुपोषणम्**” (   ) इति स्कन्दात् च इति

आहुः. तद् न अस्माकं सम्मतं श्रीरामस्य पुरुषोत्तमत्वेन विमृष्टत्वात्, अनुपोषणे शिष्टाचारविरोधात्, कलौ तत्प्राबल्यस्य व्यवस्थापितत्वेन तदपेक्षया स्मृतेः नैर्बल्याद् इति.

इति श्रीपुरुषोत्तमविरचितः श्रीरामनवमीप्रतानः सम्पूर्णः.

श्रीमत्प्रभुचरणप्रथमापत्यश्रीशोभादेवीवंशमुक्तामणि
पण्डित भट्टश्रीबलभद्रशर्म
कविकाव्यरत्नाकरकविचूडामणिशुद्धाद्वैतभूषणकविरत्न-
-महामहोपदेशकविद्यालंकारवेदान्तविद्यानिधिना
प्रणीतया बालप्रबोधिनी

श्रीनाथं श्रीमदाचार्यान् प्रभूंस्तत्पुरुषोत्तमान्॥
प्रणम्य रामनवमीप्रतानं विवृणीमहे।

अथ श्रीरामनवमीप्रताने अर्वाचीनानां प्रवेशाभावम् अन्यथाप्रवेशं मिथ्याभिनिवेशं च आलोच्य यथार्थतदर्थावबोधद्वारा प्रसक्तानर्थपरिहाराय 'बालप्रबोधिनी' नाम व्याख्या समारभ्यते. तत्र प्रायेण अयं क्रमः : पूर्वं याथार्थ्येन ग्रन्थार्थकथनं, तदनन्तरम् अन्यैः कृतस्य अन्यथाव्याख्यानस्य प्रदर्शनं, तदनु तत्र दोषप्रदर्शनेन तदन्यथात्वसमर्थनं, तदनन्तरं स्वव्याख्याने गुणप्रदर्शनोपपत्तिभ्यां यथार्थत्वसमन्वयः इति.

तथाहि : अथ श्रीमत्पुरुषोत्तमाः श्रीरामनवमीप्रतानम् आरभमाणाः श्रीमत्प्रभुचरणप्रणीते श्रीरामनवमीनिर्णये विभ्राजमाने स्वातन्त्र्येण तदर्थम् अनवसरं विभावयन्तः तदनुसरणसौभाग्येनैव सुरसर्गसाफल्यं सूचयन्तः यत् पूर्वांगम् उत्तरांगञ्च अभिप्रेत्य निर्णयः प्रवृत्तः तदुभयप्रकाशनेन स्वस्यापि तदनुसरणं सम्पादयन्तः आदौ उत्पत्तिवाक्यं तावद् आहुः तदुक्तम् इत्यादिना शब्दसंग्रहाद्

इत्यन्तेन. विनियोगवाक्यम् आहु: **अन्यच्च** इत्यादिना **भवेद् इति** इत्यन्तेन. अन्येषां पुनर्वसुयुतायामेव आग्रहं दर्शयन्ति **अत्र सैव** इत्यादिना **दिनकरोद्द्योत:** इत्यन्तेन. नवम्यास्तु मध्याह्नव्यापित्वमेव तेषाम् आवश्यकम् इति आहु: **अत्र** इत्यादिना **बहव** इत्यन्तेन. एतेन पुनर्वसो: मध्याह्नयोगे अन्यत्र योगे योगाभावेऽपि च नवम्या: मध्याह्नव्याप्तौ विद्धैव इति प्राप्तम्. वस्तुस्थितिम् आहु: **तत्त्वम्** इत्यादिना **विद्धा त्याज्यैव** इत्यन्तेन. तत्र प्रमाणम् आहु: ‘‘**नवमी च**’’ इत्यादि **माधवधृतवचनाद्** इत्यन्तम्. ‘‘**विद्धा त्याज्यैव**’’ इति ‘‘**नवमी च**’’ इत्यादिवचनस्य विद्धात्यागमात्रपरत्वाभिप्रायेण. अन्यथा ‘‘वैष्णवै: पारणदिवसे दशम्यलाभएव विद्धा कार्या’’ इति उक्त्वापि प्रमाणम् उदाहरेयु: अनभीष्टार्थाप्रसक्ते:. अनुष्ठीयते हि विद्धाक्षयादौ गत्यन्तराभावाद् विद्धोपोषणम्. किन्तु वचनप्रवृत्ति: विद्धाजिहासयैव इति यथोक्तैव उक्ति: युक्तेति. विद्धाजिहासामेव वचनस्य विरुद्धकोटिनिराकरणेन समर्थयन्ति **नच इदं दिनद्वये** इत्यादिना **दत्तोत्तरं ज्ञेयम्** इत्यन्तेन. ननु ‘‘दशम्यादिषु वृद्धिश्च’’ इत्यादिवचनेन दशम्येकादशीद्वादशीनां दिनद्वयसूर्योदयव्यापित्वाभावे विद्धाभ्युपगमाद् न विद्धाजिहास इति चेद् इत्येतां प्रत्यवस्थितिं निराकर्तुम् अनुवदन्ति **यत्तु** इत्यादि **न उक्तम्** इत्यन्तेन. अयम् अर्थ:. आदिश्च आदिश्च आदी. दशमी च अपस्थितत्वात् तदादी च दशम्यादय:. दशम्येकादशीद्वादश्य:. तासु वृद्धि: चेद् दिनद्वयसूर्योदयव्यापित्वं चेद् विद्धा त्याज्यैव. दशमीवृद्धौ नवमीक्षये द्वितीयदशम्यां पारणलाभाद् एकादशीवृद्धौ नवमीक्षये पूर्वस्यां व्रताभावेन पारणलाभाद् द्वादशीवृद्धौ नवमीक्षये व्रताभावेनैकादश्यां च पारणलाभात्. तेन ‘‘**नवमी च**’’ इति वाक्ये ‘दशम्याम्’ इति पारणदिनोपलक्षणार्थम्. न पारणे दशम्यावश्यकत्वार्थम् इति. अत्र ‘‘वृद्धि: चेद्’’ इति उक्त्या साम्ये क्षये च त्याज्यैव इति न नियम:. किन्तु पारणार्थं दिनलाभे त्याज्या अन्यथा न त्याज्या. द्वितीयदिने मध्याह्नयोगे पुनर्वसुयोगे च त्याज्या. पूर्वदिनएव तल्लाभेतु न त्याज्या इति अनियम:. एवं सति ‘‘**नवमी च**’’ इति वाक्यस्य न विद्धाजिहासुत्वम् इति. निराकुर्वन्ति **हेमाद्रिमाधवाभ्याम्** इत्यादिना **अनुवादकम् इति** इत्यन्तेन. आदौ मतान्तरेण निराकरणं महाविरोधवशात् सुकुमारमते सहसैव क्षोभोदयो मा भूद् इत्येतदर्थम्

एकान्तत: तत्सम्भावनाभावाय वितण्डोद्दण्डतुण्डखण्डनाय च. वस्तुस्थितिम् आहु: मीमांसकरीत्या ब्रह्मवादरीत्या च एकतन्त्रेण **तत्त्वन्तु** इत्यादिना **अनुवादकम्** इत्यन्तेन. "**नवमी च अष्टमीविद्धा**" इति वाक्ये विद्धात्यागएव आशयगोचर: इति सम्बन्ध:. तदिदम् उपपादयन्ति **निषेधविधिवद्** इत्यादिना **उपोषणप्राप्त्या** इत्यन्तेन. **नवम्युपोषणविधिरपि** इति **वैष्णवमात्रविषयक:** इति. तथाच उभयो: एकाधिकारिविषयत्वाभावे विद्धास्वीकारस्य आशयगोचरत्वं भवेदपि नतु एकाधिकारिविषयत्वेऽपि विरोधेन असम्भवाद् इति निषेधविधाविव नवम्युपोषणविधावपि विद्धात्यागएव आशयगोचर: इति न अत्र सन्देह:. ननु सनियमेन पुनर्नवम्युपोषणविधानेनैव दशमीसाम्ये नवमीक्षये दशमीक्षये नवमीसाम्ये च विद्धायाम् उपोषणं भवति इति क्व विद्धात्यागस्य आशयगोचरत्वम् इति आकांक्षायाम् आहु: **दशमीसाम्येऽपि नवमीवृद्धौ दशमीक्षयेऽपि नवमीवृद्धौ नवम्याम् उपोषणप्राप्त्या** इति. सनियमस्य पुनर्नवम्युपोषणविधानस्य विद्धात्यागएव आशय: तदा न स्याद् यदा दशमीतदभिभूतयो: उपोषणप्रतिविधाने शुद्धाया: तदर्थम् अलाभएव स्याद्, नतु एवम् अस्ति. दशमी-तदभिभूतयो: उपोषणप्रतिविधानेऽपि नवमीवृद्धौ शुद्धायामेव उपोषणप्राप्ते: दर्शनात्. विद्धाप्रसक्तेरेव अभावाच्च. तथाच दशमी-तदभिभूतयो: उपोषणप्रतिविधानार्थम् उद्यतस्य सनियमस्य पुन: नवम्युपोषणविधानस्य उपक्रमानुरोधाद् वैष्णवमात्रविषयकत्वेन वैष्णवानाञ्च विद्धात्यागस्य "**नवमी च अष्टमीविद्धा**" इत्याद्यर्द्धेन अवश्यकर्तव्यत्वोक्ते: विद्धात्यागएव आशय: भवितुम् अर्हति. न कदाचिदपि विद्धाभ्युपगमे स: सम्भवति. तेन नवम्यवृद्धिस्थले यद् विद्धोपोषणं तद् गत्यन्तराभावादेव, नतु वचनाशयबलाद् इति नैतत् तिरोहितम्. अतएव निष्कर्षकथने वक्ष्यन्ति "विद्धाक्षये विद्धा गत्यन्तराभावाद्" इति. नापि दशम्यां पारणविधानं विद्धोपगमम् आशयगोचरीकुरुत इति भ्रमितव्यम् वैष्णवमात्रविषयकत्वात्. विद्धानिषेधवचनस्य दिनद्वये मध्याह्नव्याप्त्यव्याप्त्यादिविषयकतया नयनेन पुनर्वस्वादियोगे वैष्णवानामपि विद्धाप्रापणे दशमीपारणविधानस्यैव अन्यथा वैयर्थ्यापत्त्या प्रतिबन्धकत्वेन विद्धात्यागएव तस्यापि आशयगोचर: इत्यत्र सन्देहाभावात्. पारणार्थं दशम्यलाभेतु विद्धोपोषणम् अगतिकगतिरेव. ननु विद्धोपोषणं तदाशय:. तथासति पुनर्वस्वादियोगवशाद् विद्धाप्रसक्तिं

नैव उपरुन्ध्याद् इति. तदिदं संगृहीतं **विद्धात्यागएव** इति ‘एव’कारेण. यथा “सुखं मे स्याद्, दुःखं मनागपि मा भूद्” इति दुःखाभाव-सुखलाभयोः सर्वाशयगोचरत्वेऽपि प्रारब्धयोगेन तद्विपरीतमपि अगत्या विषह्यते तथा नवमी च अष्टमीविद्धा इति वाक्यस्य विद्धात्यागार्थमेव सर्वथापि आशयेऽपि क्वचिद् विद्धोपोषणम् अगत्या अनुष्ठीयते. अन्यथा कर्मविप्रलोपप्रसंगात्. नच इष्टापत्तिः, **“सदा उपोष्या”** इति वचनाद् अकरणे प्रत्यवायापत्तेः. नहि एतावताशयस्यापि अन्यथाभावः सम्भवति इति अवधेयम्. एवमभिप्रायकत्वादेव अस्य प्रतिप्रसवस्य इति. निषेधातिप्रसंगवारणाय हि प्रतिप्रसववचनं न निषेधाशयम् अन्यथयितुम्. एतेन निष्कर्षकथने पारणार्थं दशम्यलाभेऽपि विद्धादशम्यां पारणविधानबलात्. अन्यथा एकादश्याम् अद्भिः पारणेनापि व्रतसमाप्तिसम्भवे पारणविधानवैयर्थ्यस्य अपरिहार्यत्वाद् इति यद् वक्ष्यन्ति तत् समाहितं ज्ञेयम्. एवं विद्धाजिहासां व्युत्पाद्य प्रामाणिकत्वम् आहुः **वचनञ्च सर्वसम्मतम्** इति. तेन चरितार्थ्यादेव **“दशम्यादिषु वृद्धिः चेद्”** इत्यनेन उक्तार्थस्य विद्धात्यागावश्यकत्वस्य विधानादेव दशम्यादिषु इत्यादेः अत्यन्ताप्राप्तार्थविधानात्मकं प्रामाण्यं नैव सम्भवति इति हेतोः **दशमीवृद्धिवचनम् अनुवादकं** विहितानुवाचकम् अनुवादार्थवादरूपम् इति अर्थः. अर्थवादः त्रिविधः : **“विरोधे गुणवादः स्याद् अनुवादो अवधारिते भूतार्थवादः तद्धानाद् अर्थवादस्त्रिधा मतः”** (द्र.अर्थसंग्रह.अर्थवाद.६६) इत्युक्तेः. तत्र इदं वचनं गुणवादः “उपोषणं नवम्याम्”-“दशम्यामेव पारणम्” इत्याभ्यां विरोधात्. “दशम्यादिषु वृद्धिः चेद्” इत्यनेन दशम्यामपि उपोषणस्य एकादश्यामपि पारणस्य कथनात्. एवं सति एतद्वचनं वैष्णवत्वोत्कर्षाधायकत्वरूपं वा परमावश्यकत्वरूपं वा विद्धात्यागस्य गुणमेव ब्रूते. पुरुषं प्रेरयितुं विद्धानिषेधविधिवाक्यापेक्षितं विधेयार्थप्राशस्त्यं समर्प्य च विद्धानिषेधविधिवाक्येन एकवाक्यताम् आपद्यते. यतो वैष्णवत्वोत्कर्षाधायकत्वेन परमावश्यकतया विद्धात्यागः प्रशस्तः ततः वैष्णवैः विद्धा त्याज्या इति. तत्र विधिवाक्यार्थवादवाक्यानां परस्परनैरपेक्ष्येणैव स्वार्थबोधाद् एकवाक्यतायाः अभावेऽपि लक्षणया अर्थवादवाक्यानां विधिवाक्यैः सह एकवाक्यतायाः मीमांसकनयसिद्धतया “दशम्यादिषु वृद्धिः चेद्” इत्येषां

पदानां वाच्यार्थभावेन दशम्युपोषणैकादशीपारणाद्यप्रसक्तया नवम्युपोषणदशमीपारणविधिभ्याम् अविरोधाद् न कश्चित् प्रत्यवस्थित्यवसरः इति सर्वं चतुरस्रम्. ब्रह्मवादनयेतु अर्थवादानां स्वार्थे प्रामाण्याभ्युपयनाद् भिन्नैव व्यवस्था. सापि एकतन्त्रेण अत्र प्रतिपादिता. तथाहि : **“नवमी च अष्टमीविद्धा”** इति वाक्ये अष्टमीदशम्येकादशीवेधाः परिहृता उपोषणे **पारणे च** यथायथम्. **“नवमी च अष्टमीविद्धा”** इत्यनेन उपोषणे अष्टमीवेधः परिहृतः. **“उपोषणं नवम्याम्”** इत्यनेन दशम्युपोषणप्रतिविधायकेन नवमीक्षयस्थले एकादश्यां दशमीवृद्धिस्थले च **द्वितीयदशम्याम्** एकादशीविद्धायाम् अर्थात् पारणं परिहृतम्. **‘वै’** इति नियमेनतु दशमीक्षयस्थले नवमीवृद्धिस्थले च नवमी-द्वितीयनवम्योः उपोषणे दशमीवेधः परिहृतः. तद् इदम् उक्तम् **निषेधविधिवद्** इत्यादिना **विद्धात्यागएव आशयगोचरः** इत्यन्तेन. **नवम्युपोषणविधिरपि** इति सनियमो नवम्युपोषणविधिः इति भावः. प्राधान्याद् अष्टमीवेधत्यागे आशयं व्युत्पादयन्ति **दशमीसाम्ये च नवमीवृद्धौ दशमीक्षये च नवमीवृद्धौ** इत्यन्तेन. शेषं संगृहन्ति **नवम्युपोषणप्राप्त्या** इति. यथायथम् अष्टम्यविद्धायां दशम्यविद्धायां च इति अर्थः. दशमीत्यागस्तु नान्तरीयकः तं विना नवम्युपोषणासिद्धेः. तेन पारणतिथौ एकादशीवेधपरिहारः. तदिदम् आहुः **विद्धात्यागैव आशयगोचरः** इति. विद्धानाम् अष्टमीदशम्येकादशीविद्धानां त्यागः इति विग्रहः. **तेन चारितार्थ्यादेव दशमीवृद्धिवचनम् अनुवादकम्** इति. तथाच **‘दशम्यादिषु’** इति पदस्य न पूर्वपक्षिपक्षेण अर्थः. **“नवमी च अष्टमी...”** इति वाक्येन विरोधात् शिष्टानादरणात् च निर्मूलत्वापत्तेः. किन्तु आदिश्च आदिश्च आदी दशमीप्रागभावाधिकरणकालभूते नवम्यष्टम्यौ तिथी. दशमी च नवम्यष्टम्यौ तिथी च **दशम्यादयः** तेषु. तथाच अष्टमीवृद्धौ तद्विद्धा नवमी त्याज्या. नवमीवृद्धौ दशमीविद्धा द्वितीया त्याज्या. दशमीवृद्धौ एकादशीविद्धा द्वितीया दशमी त्याज्या उपोषणे पारणे च यथायथम् इति तदर्थाद् न कश्चिदपि स्वार्थबाधावसरः, विरोधश्च गुणवादहेतुभूतो वर्तते. मूलवचने तिथीनां साम्ये अष्टमीवेधस्यैव परिहार्यत्वम्, दशम्येकादशीवेधयोस्तु प्राचुर्याभिभावकत्वाभावाभ्याम् अपरिहार्यत्वम् इति विशेषः. वृद्धौतु तौल्यम्

इति अनुवादस्य एकदेशित्वात्. एवञ्च अनुवादकत्वेनैव स्वार्थेऽपि प्रामाण्यसिद्धिः गुणानुवादत्वञ्च इति उभयमपि सुसिद्धम् इति सर्वम् अविरुद्धं न कश्चिदपि विप्रितिपत्त्यवसरावशेषः. अत्र केचिद् “**दशम्यादिषु वृद्धिः चेद्**” इत्यादौ पूर्णायां वृद्धौ नवम्याः विद्धात्वं न सम्भवतीति भिया उदयानुदयभेदेन दिनद्वयोपलब्धिं ‘**वृद्धि**’ पदेन गृह्णन्तो दशमीक्षयेऽपि नवमीवृद्धौ नवम्याम् उपोषणप्राप्त्या विद्धात्यागएव आशयगोचर इत्यनेन दशमीक्षये शुद्धोपोषणम् इति आहुः, तद् न; नवमीवृद्धौ इत्येतस्य निष्प्रयोजनत्वापातात्. दशमीक्षये नवम्याम् उपोषणप्राप्त्या इति एतावतैव विवक्षितार्थलाभात्. ‘वृद्धि’पदस्य उदयानुदयभेदेन दिनद्वयोपलब्धौ शक्तेः अगृहीतत्वात्. नवम्युपोषणविधेः दशम्युपोषणप्रतिविधानार्थतायाः मूलनिर्णयव्याख्यायां निरवशेषेण निर्णीततया दशमीपारणप्रतिविधानार्थतायाः एकान्ततएव असम्भवेन दशम्यां पारणस्य आवश्यकत्वात् च. किञ्च आरम्भे **तत्त्वन्तु** इति उपक्रम्य **वैष्णवैस्तु पारणदिवसे दशमीलाभे विद्धा त्याज्यैव** इति उक्त्वा तत्र प्रमाणम् उपन्यस्य तस्या अन्यथार्थतां **नच इदं दिनद्वये** इत्यादिना **दत्तोत्तरं ज्ञेयम्** इत्यन्तेन मतान्तरत्रयापाकरणेन प्रतिविधाय **वैष्णवैस्तु पारणदिवसे दशमीलाभे विद्धा त्याज्यैव** इति यदुक्तं तदेव “**नवमी च अष्टमी विद्धा**” इत्यस्य तात्पर्यम् इति स्थापितम्. तदेतत् स्थूणानिखननन्यायेन पुनः द्रढयितुं **यत्तु** इत्यादिना **रामार्चनचन्द्रिकायाम् उक्तम्** इत्यन्तेन विद्धात्यागे पारणदिनमात्रलाभः तन्त्रं नतु दशम्यादिः अवच्छेदविशेषोपि तेन दिनद्वये मध्याह्नव्याप्त्यादिभावे विद्धायामपि उपोषणम् उभयैकवाक्यतालाभाद् अन्यथा विरोधाद् इति अभिप्रायपूर्णां शंकाम् अनूद्य **हेमाद्रिमाधवाभ्याम्** इत्यादिना **दिनकरोद्योत** इत्यन्तेन. पराभिप्रायेण **तत्त्वन्तु** इत्यादिना **दशमीवृद्धिवचनम् अनुवादकम् इति** इत्यन्तेन स्वाभिप्रायेण च तत्समाधानं विधाय “**नवमी च अष्टमीविद्धा**” इत्येतस्यैव वचनस्य प्रामाण्यं वैष्णवैस्तु पारणदिने दशमीलाभे विद्धा त्याज्यैव इत्येतदेव च तत्तात्पर्यम् इति स्थिरीकृतम्. एवञ्च **तत्त्वन्तु** इत्यादिः **अनुवादकम्** इत्यन्तः ग्रन्थः पारणार्थं दशमीलाभे विद्धात्यागएव आशयगोचरः इति इमम् अर्थं वक्तुं प्रवृत्तः इति सुविशदम् एतत्. तस्याः अस्य दशमीपारणानपेक्षया विद्धात्यागपरत्ववर्णनं सर्वथैव असंगतम् इति. एवं तात्पर्यवर्णने दोषविस्तरस्तु

मूलनिर्णयविवृतितो अनुसन्धेयः. एवं पारणदिने दशमीलाभे विद्धा त्याज्यैव इति तत्त्वं निर्धार्य तदेतावतः कथनस्य पूर्वांगत्वेन श्रीमत्प्रभुचरणतात्पर्यगोचरत्वं प्रदर्शयन्तः श्रीमत्प्रभुचरणकृतनिर्णयसिद्धान्तांशम् उपन्यस्यन्ति **तदेतत् सर्वम्** इत्यादिना **कल्प्यते** इति इत्यन्तम्.

अत्र **तथाच** इत्यादिना **व्यर्था स्याद्** इत्यन्तेन पारणदिने दशमीलाभे विद्धा त्याज्यैव. तदलाभेतु अगत्या विद्धापि उपोष्या. किं बहुना. दशमीपारणान्वयव्यतिरेकानुविधायिनी सर्वथा व्रतपूर्तिः इति अभिप्रायेण दशमीतदभिभूतयोः उपोषणप्रतिविधानाय सनियमं पुनर्नवम्युपोषणविधानम् इति निर्णीतम्. **यद्यपि एवम्** इत्यादिना **एकादशीपूर्वदिनपरत्वं कल्प्यते** इत्यन्तेन च यदुक्तं तस्य अयम् आशयः. ननु प्रयोजनाभावात् किम् इदानीं पारणविधिना कार्यम्? दशमीपारणस्य दशमीतदभिभूतयोः उपोषणप्रतिविधायकेन सनियमेन पुनर्नवम्युपोषणविधानेनैव संसाधनाद् इति चेद्, मैवम्, पारणविधेः अभावे व्रतपारणयोः मध्ये व्रतस्य इष्टसाधनत्वं मुख्यम् अंगित्वाद् उपजीव्यत्वात् साक्षात् श्रुतत्वात् च. पारणस्य इष्टसाधनत्वम् अमुख्यम् अंगत्वाद् उपजीवित्वाद् अर्थापत्तिलभ्यत्वात् च. तथा सति मुख्यकल्पेन दशमीक्षये शुद्धायां व्रतलब्धिसम्भवे पारणस्य अमुख्यकल्पेन अनुष्ठानं न इष्टसाधनताविरोधि. व्रतस्य अमुख्यकल्पेन विद्धायाम् अनुष्ठानन्तु इष्टसाधनताविघातकं भवेत्. तेन दशमीक्षये मुख्यकल्पेनैव शुद्धायाम् उपोषणम् अमुख्यकल्पेनैव च एकादश्यां पारणम् अनुष्ठीयेत. नच एवम् उपोषणविधिसमभिव्याहृतस्य नियमांशस्य किं स्याद् इति वाच्यम्, तस्य विद्धात्यागवचनानवसरे द्वितीयनवम्यां सावकाशतायाएव योग्यत्वात्. विद्धात्यागवचनावसरे कुण्ठितत्वात्. तदिदम् अनिष्टम् इत्येतदर्थं पारणविधिवाक्यम् आवश्यकम्. तथापि उपोषणविधेः मुख्यत्वात् पारणविधिवाक्यस्य अमुख्यत्वेन मुख्ये पक्षपातः स्यात्. तदैव तत्तात्पर्योपपत्तेः. मुख्यो हि सः. प्रधानेष्टसाधनत्वादिभ्यः. तेन अमुख्यस्य पारणवाक्यस्य व्रतैकादशीपूर्वदिनपरत्वेन लक्षणयैव निर्वाहः करणीयः स्यात्. वैयर्थ्यन्तु तदापि नैव निवर्तेत. वाक्याभावेऽपि व्रतैकादशीपूर्वदिनस्य न अप्राप्तत्वात्, ‘दशमी’पदश्रुतेः बाधात् अतिरिक्तार्थस्य सिद्ध्यभावात् च.

तेन दशमीक्षये 'दशमी'पदम् एकादशीतिथिपूर्वदिनपरतया शुद्धोपोषणव्रतैकादशीपूर्वदिन- पारणविरोध्यर्थोपस्थापनसमर्थ- समानबलोपस्थितिकं कृत्वा सार्थकं सम्पाद्यते. एवञ्च सनियमेन पुनर्नवम्युपोषणविधानेनैव दशमीपारणप्राप्तावपि तेन तद्विधानवैयर्थ्येऽपि मुख्यामुख्यत्वकृततदुभय- प्रबलनिर्बलभावनिवारणाभिप्रायेण दशमीपारणविधानं सार्थकत्वाद् उपोषणविधितुल्यबलं मुख्यमेव च इति सर्वत्रापि उपोषणपारणयोः उभयोरपि समानएव आग्रहो नतु क्वचिदपि बाध्यबाधकभावसम्भावनागन्धोऽपि. तत्साध्वेव एतदुक्तं यत् पारणदिने दशमीलाभे विद्धा त्याज्यैव. तदलाभेतु अगत्या विद्धापि उपोष्या. किं बहुना. दशमीपारणान्वयव्यतिरेकानुविधायिनी सर्वथा व्रतपूर्तिः इति. एतेन यद्यपि द्वावपि विधी मुख्यौ तथापि दशमीपारणविधिः तयोः मुख्यतरः इति सिद्ध्यति इति स्तोकोऽपि नावशिष्टः शंकावसरः इति. अधिकन्तु निर्णयव्याख्यानतो अवगन्तव्यम्. अभिप्रायविरुद्धाभ्यः उपगमः मा भूद् इति अल्पज्ञम् अनुगृह्णन्ति **अत्र 'एकादशी'पदम्** इत्यादिना **पारणविधानाद्** इत्यन्तेन. यद्यपि "**यद्यपि एवम्**" इत्यादिः ग्रन्थो दशमीक्षये नवमीद्वयाभावे व्यवस्थाविशोधनार्थः. तथापि केचित् परिहरणीयमेव अर्थम् अत्र विधित्सितं पश्यन्ति. तद्यथा. उपोषणविधेः मुख्यत्वात् तदादरएव युक्तः. पारणविधिवाक्यस्य अमुख्यत्वेन तदादरः न युक्तः तेन पारणवाक्यं व्रतैकादशीपूर्वदिनपरमेव. **अत्र एकादशीपदम्** इति इयं पंक्तिस्तु विरोधात् प्रक्षिप्ता. उपलम्भात् न इति चेद् तदा तिथिपरं न इति पृथग्वाक्यम् तु किन्तु व्रतपरम् इति पृथक्. तत्र हेतुः **दशम्यां पारणविधानाद्** इति. दशमी हि एकादशीव्रतपूर्वदिनम् इति. तद् न. **पुनः तदुक्तिः व्यर्था स्याद्** इत्यन्तेन उक्तस्य अर्थस्य विरोधेन अस्य उज्झितार्थसम्बन्धित्वात्. तस्यापि प्रक्षिप्ततया वक्तव्यत्वापत्तेः वैयर्थ्यस्य अनिवारणात् कृतहान्यकृताभ्यागमाभ्यां च. विशेषस्तु मूलव्याख्याने द्रष्टव्यः.

उत्तरांगम् आहुः **अत्र यद्यपि** इत्यादिना **स्मृतेः नैर्बल्याद्** इत्यन्तेन. विवक्षितं वेधस्वरूपं ग्राहयन्तः सम्प्रदायानुसरणाभावे केवलशास्त्रतः शास्त्राशयो न लभ्यतइति इदं तावद् आदौ दर्शयन्ति **तथा सति** इत्यादिना पूर्वैव

उपोष्या इति आयाति इत्यन्तेन. **पूर्वैव** इति. मध्याह्नव्याप्त्योत्कर्षादपि इति भावः. सम्प्रदायानुसरणैव शास्त्राशयलाभः **इत्येतद् दर्शयन्ति तथापि** इत्यादिना **वर्षवृद्धिन्यायश्च** इत्यन्तेन. **एतादृशस्थले** अष्टम्याः त्रिमुहूर्तत्वाद्यभावेन वेधाभावेऽपि “**चैत्रशुद्धातु नवमी पुनर्वसुयुता**” इत्यादि वचनानुगुण्येऽपि पारणकाले दशमीप्राप्तावपि. **द्वितीयामेव**. उदयमात्रेऽपि अष्टमीसंसर्गाभावाद् औदयिकनवमीलाभात् पारणदिनेऽपि औदयिकदशमीलाभात् च. साम्प्रदायिकं वेधस्वरूपं व्युत्पादयन्ति **तेषाम् अयम्** आशयः इत्यादिना. न्यायसाम्याद् इति. जन्माष्टम्यां सप्तम्याः कलाकाष्ठादि वेधत्यागे हेतुः प्रादुर्भावदिने तदभावः तेन स्वल्पेऽपि तत्संसर्गे नवम्याम् उपोषणादि. एवमत्रापि प्रादुर्भावदिने अष्टम्यभावादेव तद्वेधनिषेधेन स्वल्पादपि तत्संसर्गात् पूर्वात्याग आवश्यक इति न्यायसाम्यम्. तस्मात्. द्वितीयादरे हेत्वन्तरमपि आहुः **युगाद्या** इति वचनोपन्यासेन **युक्तत्वाच्च** इत्यन्तेन. **प्रातिस्विकत्वाद्** इति. श्रीरामनवमीमात्रविषयत्वात्. विद्धानिषेधस्य विशेषशास्त्रत्वेन सामान्येन अविरोधाद् इति अर्थः. **सामान्यवाक्यानाम्** इति. “**दैवकार्ये तिथिः ग्राह्या यस्याम् अभ्युदितः रविः उदयेतु उपवासस्य नक्तस्य अस्तमये तिथिः मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथि आदित्योदयवेलायां या अल्पापि च तिथिः भवेत् पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विना**” (   ) इत्यादीनाम् इत्यर्थः. एवं साम्प्रादायिकं वेधस्वरूपं व्युपाद्य नवमी-दशम्योः क्षये व्यवस्थां जन्माष्टमीतो विशेषं च वदन्तः तत्र प्रमाणञ्च पुरस्कुर्वन्तो उपसंहरन्ति **न चैवम्** इत्यादिना. **एवम्** इति, जन्माष्टमीन्यायेन वर्षवृद्धिन्यायेन च द्वितीयाग्रहणे सति वर्षवृद्धौ विद्धाक्षये विद्धाकरणाद् अत्रापि विद्धाक्षये विद्धाकरणसिद्धौ एतन्न्यायेन जन्माष्टम्यामपि विद्धाक्षये विद्धाकरणं प्रसज्यते. तदा तदनुकल्पतया तत्र शुद्धनवमीग्रहणञ्च अयुक्तं प्रसज्यते. तेन न्यायप्राप्तग्रहणम् अयुक्तं शास्त्रप्राप्तग्रहणमेव युक्तम्. तेन शास्त्रीयत्रिमुहूर्तत्वादिवेधाभावे पूर्वस्याः करणे महापुण्यतमात्त्ववचनानुगुण्यमपि. अथ यदि जन्माष्टमीन्यायेन वचनाभावेऽपि अष्टम्याः कलाकाष्ठावेधोऽपि परिहार्यः तदा तु तेनैव न्यायेन विद्धाक्षय इहापि तदनुकल्पतया दशम्युपोष्यतां न्यायसाम्यात्. तदेवं विरुद्धन्यायद्वयावतारे उभयत्रापि नान्यतरपक्षावधारणे विनिगमना भवति

